Samanvaya Series

भाषासङ्गमनी

तत्त्वसङ्कलनीसहिता ।

प्रथमखण्डः ।

कलिकाताराजधान्यां

२ संख्यक रमानाथमजुमदार-वर्त्मस्थे

मङ्गलगञ्जमिशनप्रेसे मुद्रिता

नवविधानमण्डल्या उपाध्यायेनोद्भाविता ।

१८२५ शाके ।

मूल्यं १ मुद्रा ।

भाष्यसङ्क्रमनी।

——:——

प्रथमोऽध्यायः।

—•—

उपाध्यायोपदेशेन विना यत्कृपया सुखम्।
प्राविशं भाष्यसन्दर्भे वन्दे तं परमेश्वरम्॥
भाष्यानुगामिनी साक्षात् काशिका तेन तां पुनः।
भाष्यसङ्क्रमनी ह्येषा व्याख्या सङ्क्रमयिष्यति॥

१। अथ शब्दानुशासनम्।

म, वृ,। केषां शब्दानां? लौकिकानां वैदिकानाञ्च। कथमनुशासनम्? प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन। अथ किमर्थो वर्णानामुपदेशः? प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः।

भा. सं.। अथ भाष्यकारेण शब्दस्वरूपादिनिर्वचनमतिविस्तीर्णं भाष्यमुपनिबद्धम्। वृत्तिकारस्तु सारमात्रसङ्कलनव्यग्रतया तत् सर्वमुपेक्ष्य संगृहीतवान् तत्सारांशं प्रायो भाष्यकारवाक्येनैव। अथ पुनर्भाष्यकारविहितो बालानां सुखप्रवेशाय विस्तारादनतिविस्तीर्णं विवरणमुपनिबध्नामः।

,

COOCH BEHAR

सूत्र शब्दानुशासन''मित्यत्र, अथशब्दोऽधिकारार्थः (१)। शब्दानुशासनं नाम शास्त्र-

---

उपाध्यायोपदेशेन विना यद्विधिनोदितः ।
समन्वयं विचिन्तुमत् कृतार्थस्तं परं श्रये ॥
अर्व्वाचीनप्रबन्धा हि विचारकर्कशा इयम् ।
अनुव्याख्या ततस्तत्सङ्गत्यतिविस्फुटा ॥
यदपि कृतिरियङ्कृपया परस्य तदपि भ्रमाकुलनरेऽस्याः ।
अवतरणनिमित्तं स्यादवबद्धप्रसरताभूमिः ॥

(१) अथेति। अथशब्दः प्रारम्भस्य द्योतको वाचको वेति विवादविषयः। निपाता-नाञ्च द्योतकत्वं वाक्यपदीये निर्णीतम्। विवरणकारास्तु वाचकत्वमेवेच्छन्ति। स्वरा-दयो वाचकाश्चादयो द्योतका इति विषयविभागोऽप्यत्र दृश्यते। वाचका हि तदर्थ-पर्य्यायरूपेण प्रयुज्यन्ते, द्योतकाः केवलमर्थप्रकाशकरूपेण। तद्यथा स्वर्शब्दस्य निपात-त्वेऽपि स्वर्गपर्य्यायरूपेण प्रयोगात् वाचकत्वम्; चशब्दस्य समुच्चयपर्य्यायरूपेणाप्रयोगात् केवलं तदर्थद्योतकत्वम्। निपातेषु "चादयोऽसत्त्वे" इति निर्द्धारणात् द्रव्याद्रव्यविभेदेन वाचकत्वद्योतकत्वयोरवकाश इत्यपि तेषां मतम्। अथशब्दस्य वाचकत्वे अधिकारं जानातीत्यर्थे अथ जानातीति प्रयोगापत्तिः। अत्र वाचकत्वपक्षपातिनो वदन्ति;— प्रारम्भार्थस्याथशब्दस्यास्ति स्वसमभिव्याहृतस्य प्रथमान्तपदस्यार्थान्वयबोधं प्रति साकाङ्क्षता। अतो नास्त्यत्र तद्विपरीतप्रयोगस्य सम्भावना। अतएव शब्दानुशासनस्य प्रारम्भ इत्यर्थे शब्दानुशासनस्याथेति न प्रयोगः। द्योतकत्वपक्षे उपसर्गाणां द्योतकत्वं संस्थाप्य तद्युक्त्या-न्येषां निपातानाञ्च तत् केनचित् साधितम्। तद्यथा सुखमनुभूयतेऽत्र कर्म्मणि लकारः क्रियामधिकृत्यैव व्यवस्थापितः, न तूपसर्गमुपलक्ष्य, अतोऽस्य द्योतकतैव न वाचकता। अत्रेदं विविच्यम्। भूधातुः स्वयमकर्म्मकः, तस्य सकर्म्मकत्वमनुयोगादेव सिद्ध्यति। शाकल्यस्य संहितामनु-निशम्य प्रावर्षीदित्यत्र पूर्व्वं क्रियायोगिनीशक्तिः पश्चाच्छब्दपदतिरो-धानेऽपि वर्त्तमानान्वादीनां कर्म्मप्रवचनीयसंज्ञया द्वितीयोत्पत्ती शक्तिः सर्व्वेषां बुद्ध्यनु-मेया। सैवात्रोपसर्गसंज्ञया धातुनाभिन्नाकारतामापन्नानां संसृष्टा सकर्म्मकत्वमुपस्था-पयतीति सरलसिद्धान्तः। न खलूपसर्गं विना धातोरत्र कर्म्मग्रहणसामर्थ्यं, नापि धातुं विनोपसर्गस्य कर्म्मग्रहणे शक्तिरतः परस्परसापेक्ष्यत्वादुभयोस्तुल्यं वाचकत्वं द्योतकत्वञ्च स्थितम् भाष्ये तदुभयस्य सत्त्वात्। तद्यथा "भुवादयोधातव" इति सूत्रे "क्रियाविशेषक उपसर्ग" इत्युपक्रम्य "न चेदं नास्ति, बह्वो अपि धातवो

अधिकृतं वेदितव्यम्। केषामनुशासनम्? शब्दानां लौकिकानां वैदिकानाञ्च। गौरश्वः पुरुष इत्यादयो लौकिकाः। "शं नो देवीरभिष्टये" इत्यादयो वैदिकाः।

भवन्तीती"ति उपसर्गाणां द्योतकता, क्रियाणां वाचकता। 'उपपदमतिङि'"ति सूत्रे "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि। अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्" इति उपसर्गाणां वाचकता क्रियाणां तदधीनता प्रस्फुटा। धातूपसर्गाणामपृथक्त्वं हि परमार्थं, साधनार्थं यद्धातोः पृथक्त्वेन ग्रहणं तदपि तमभ्यन्तरीकृत्यैव, अन्यथाकर्मकाणां सकर्मकत्वं न सिद्ध्यतीति "गतिर्गता"विति (८।१।७०) सूत्रे भाष्यकृता स्पष्टमुक्तम्। तद्यथा "यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तरीकृत्य धातुः साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति; आस्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति केन सकर्मकः स्यात्।" अत्र द्योतकत्वपक्षपातिना कैयटेनाप्युपसर्गाणां विशेषार्थवाचकत्वं स्वीकृतम्। तद्यथा "उपसर्गः क्रियायाः समानाधिकरणो विशेषकः। तत्रान्वयव्यतिरेकाभ्यां धातुः क्रियावचनः उपसर्गास्तु विशेषस्य वाचका इति धातूपसर्गसमुदायं क्रियाविशेषवचनम्।" यत्तु तद्व्याख्याता निपातानां द्योतकत्वं वाचकत्वमुभयं स्वीकृत्य "उपसर्गाणां द्योतकत्वमेवेति स्पष्टं गतिर्गताविव्यत्र भाष्ये" इत्युक्तं तदनुपपन्नम्। अधीत इत्यादौ धातोरनर्थकता उपसर्गविशिष्टस्यैव वाचकतेत्युक्तिः समानन्यायेन धातोरेव वाचकता कर्माद्युतपक्षानुपसर्गस्यैव निरर्थकतेति प्रत्युक्त्या बाध्यते। केन वा सिद्धान्तेनास्य विपरीतयुक्तिद्वयस्य मीमांसा सम्भवति विना तद्दक्षाभिरुपन्यस्तम्। अनुभवतीत्यादौ धातूपसर्गयोरपृथक्त्वमङ्गादिसिद्ध्यर्थमेव पृथक्त्वव्यवस्थेत्यादि वाक्यमप्येवं सङ्गच्छते। उपसर्गाणां धात्वर्थविवर्तने सामर्थ्यमनेन मार्गेण सिद्ध्यति। नायमर्धजरतीन्यायः, स्वभाव एव हि वस्तुद्वयस्यापृथक्सम्मेलनस्य। यत्राभेदसम्मेलनं तत्रैवमेवापरिच्छेद्यत्वं दृश्यते, तद्यथा तरणेः पश्चिमाभिमुखायाः तत्स्थस्य नरस्य च पूर्वाभिमुखस्य गतिश्चेत् समतुल्या, गतिस्तदसम्भावना च युगपत् बुद्धौ प्रतिभासते, अथवा हरिद्राचूर्णयोर्योगेन वर्णान्तरोत्पत्तावुभयोः समकारणता नैकस्य तत्र निरर्थकता विभाव्या। किञ्च यद्दक्षाभिरुक्तं तेनाविभक्तपदार्थस्य विभागकल्पनेनैव व्याकरणस्य कृतार्थता सम्भवति। पूर्वं धातुरुपसर्गेणासम्य

अथ कोऽयं शब्दः? गौरित्युच्चार्यमाणे यत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं बुद्धौ प्रतिभासते, न स शब्दः, द्रव्यत्वात् ; नापि तच्छरीरपरिचालनादिकं, क्रियात्वात्, नापि शुक्लादिकं गुणत्वात् ; नापि सामान्यभूतस्य गोव्यक्तिनाशेऽपि यस्य न विनाशः सः, आकृतित्वात्। किन्तर्हि, "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः (२) शब्द इत्युच्यते।"

पश्चात् साधनन्तु येषामभिमतं तदपि न तेषां भाष्यविरुद्धमिति पूर्व्वोक्तेनैवोपपन्नम्। उपसर्गव्यतिरिक्तानां निपातान्तराणामपि वाचकता पदान्तरार्थान्वयबोधं प्रति साकाङ्क्षतया, द्योतकता तु पदान्तराध्याहारेण सिद्ध्यत इत्युभयी गतिः। तद्यथा "अथ शब्दानुशासनम्" इत्यत्र प्रथमान्तस्य शब्दानुशासनपदस्यार्थान्वयबोधं प्रति अथशब्दस्याधिक्रियमाणार्थकतायाः साकाङ्क्षता ; अधिकारद्योतकत्वपक्षे तु अधिक्रियत इति क्रियाध्याहारः। सुतरां द्योतकत्वं वाचकत्वमुभयमेव सिद्ध्यतीति बोध्यम्। "अव्ययं विभक्तिसमीपे" त्यादि (२।१।६) सूत्रे "अथवा नेमे समासार्था निर्दिश्यन्ते। किन्तर्हि। अव्ययार्था इमे निर्दिश्यन्ते" इति भाष्येण अव्ययानां वाचकत्वं द्योतकत्वमुभयमेवोपन्यस्तम्। व्याख्यानावसरे "अव्ययं समुच्चयादीनां वाचकमिति" वदता कैयटेनापि तदङ्गीकृतम्। अत्र तु द्योतकत्वपक्षमाश्रित्य कैयटेनोक्तम् "अनेकक्रियाविषयस्यापि शब्दानुशासनस्य प्रारभ्यमाणतार्थशब्दसन्निधाने प्रतीयते।" सर्व्वेषां पक्षाणामेकैकस्य स्थानगतप्रयोजनमनुसृत्य ग्रहणं मुनित्रयस्य समीचीनः पन्थाः।

शब्दानुशासनशब्देनात्र पाणिनिप्रणीतं व्याकरणशास्त्रं विवक्षितम्। बुद्धिस्थान् विविच्य असाधुभ्यः प्रविभज्य साधवो बोध्यन्तेऽनेनेत्यनुशासनम्। शब्दानामनुशासनं शब्दानुशासनम्। "कर्म्मणि चेति" (२।२।१४) सूत्रस्य निषेधविषयः 'उभयप्राप्तौ कर्म्मणि' इति (२।३।६६) सूत्रसिद्धा षष्ठी। अत्र प्रयोजनाभावादाचार्य्यपदानुपादानात् नास्त्युभयप्राप्तिः। अतएव "कर्तृकर्म्मणोः कृति" (२।३।६५) इत्यनेन प्राप्ता या कर्म्मणि षष्ठी तदन्तेनेध्मप्रव्रश्चनवत् समासः। वेदे भवा वैदिकाः, अध्यात्मादित्वाट्ठञ्, लोके भवा यद्वा लोके विदिता लौकिकाः "लोकसर्व्वलोकाट्ठञ्" (५।१।४४)।

(२) ध्वनिरिति। लोके ध्वनिशब्दयोरभेदो दृश्यते। तद्यथा शीघ्रकारं ध्वनिं कुर्व्वन्तं लोका वदन्ति शब्दं मा कार्षीः, मनोहरध्वनेरनिरूपत्ते तु शब्दं कुर्व्वन्ति। अ

कानि पुनः शब्दानुशासनस्य प्रयोजनम् ?

भाष्यकृता भेदेऽपि ध्वनिस्फोटयोरभेदेन ग्रहणं कृतम्। "स्फुट्यते व्यज्यते वर्णैरिति स्फोटः।" "वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोटः।" "स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मैव।" इत्यादिभिर्दर्शनकृद्वचनैर्भावो हि स्फोटः, तस्य च श्रुतिगोचरध्वनितोऽतएव भेदः प्रतीयते। कथं भाव इति? अव्यक्तं किमपि यद्ध्वन्यात्मकैर्वर्णैर्व्यज्यते स स्फोटः। तत्तु निर्व्विशेषसत्तामात्रमिति ब्रह्मशब्दयोरभेदोपादानम्। सत्ता हि अभावप्रतिद्वन्द्वी भावः। भावस्तु तत्परिभाषितद्रव्यादिष्वन्तर्भूतः। अतएव स एव हि स्फोट इति वक्तुं सुकरम्। तत्तथैवास्तु। स्फोटवादेषु अष्टौ पक्षाः १ वर्णस्फोटः २ पदस्फोटः ३ वाक्यस्फोटः ४ अखण्डपदस्फोटः ५ अखण्डवाक्यस्फोटः। एते पञ्च व्यक्तिस्फोटाः। वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोट इत्यष्टौ। निर्द्देष्टुमशक्यत्वात् नह्येकस्य वर्णस्य अपि तु सर्व्वेषां वर्णानामानुपूर्व्विकावस्थितानां वाचकतेति वर्णस्फोटपक्षः। वर्णसमष्ट्यैव पदमुपलभ्यते। तत्र तु वृक्षं वृक्षेणेत्यादौ परिनिष्ठितरूपे क्रियांशो द्रव्यमभिव्यनक्ति क्रियांशो वा कर्म्मत्वादिकमिति विनिर्द्देष्टुमशक्यत्वात् परिनिष्ठितपदमेव वाचकं कर्म्मत्वादिविशिष्टस्येति पदस्फोटपक्षः। सर्व्वेषु पदेषु चास्ति वाक्यशक्तिः। यथा वृक्ष इत्युक्ते वृक्षोऽस्तीति गम्यते। पचतीत्युक्ते कर्त्तृकर्म्मकरणादि-सर्व्वकारकाणामुपस्थितिः। वाक्यप्रतिपादनायैव पदानां प्रयोगः। तेषु च केनैकेन या वाक्यमभिव्यक्तमिति निर्द्देष्टुमशक्यत्वात् वाक्यमेव विशिष्टार्थशक्तमिति वाक्यस्फोटपक्षः। एतत् पक्षत्रयं जातिव्यक्तिघटितं सत् षट्। अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चैवमेवावगन्तव्यः। कतिभिर्वर्णैरेकीभूयान्त्यवर्णप्रतीतं पदमेकं भवति न तत्र भिन्नेषु वर्णेषु पदत्वमस्ति, पदे वा परस्परासंस्पृष्टोभिन्नोभिन्नो वर्णोनास्ति, अतएव पदस्याखण्डता सिद्धा। पदैर्वाक्यस्यार्थप्रतीतिः, सापि सर्व्वेषां पदानां सम्मेलनेन सम्भवति, अनेनैकेन पदेनेति प्रविवेकाभावात् वाक्यस्याखण्डत्वमुपपन्नम्। वर्णपदवाक्यभेदेन पक्षत्रयमुपलक्ष्य कैयटस्त्वाह "वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य च वाचकत्वमिच्छन्ति।" अत्रापि सर्व्वे पक्षा भाष्ये प्रयोजनानुसारेण परिगृहीता इति सुधीभिस्तत्र द्रष्टव्यम्।

कानीति। प्रश्ने कानि प्रयोजनमिति बहुवचनान्तेन विशेषणेनैकवचनान्तस्य

२। रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।

(१) रक्षा वेदस्य, (२) ऊहः—मन्त्रशब्दानां यज्ञगतेन पुरुषेण भिन्नलिङ्गविभक्तिषु यथायथं विपरिणामनम्, (३) आगमः—अतो नित्याध्ययनम्, (४) लघुनोपायेन शब्द-विज्ञानम्, (५) असन्देहार्थम्—सन्दिग्धार्थपदेषु स्वरतोऽर्थाध्यवसायेनासन्देहः।

विशेष्यस्यान्वयः "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" (१।२।६९) इति सूत्रे नैकवद्भावस्य वैकल्पिकतया एकत्रैकवद्भावविरहेणान्यत्रैकवद्भावेन सिद्ध्यति। एवमस्योत्तरेऽपि बोध्यम्। प्रयुज्यते प्रवर्त्त्यतेऽनेनेति प्रयोजनः करणे ल्युट्। प्रवर्त्तयतीति प्रयोजनः बाहुलकात् कर्त्तरि ल्युट्। "उभयथापि प्रवर्त्तकविधिपरः पुंलिङ्गः। प्रयोजनंशब्दः एकः फलपरः क्लीवपरः।"

रक्षेति। वेदे लोपागमवर्णविकाराश्च दृश्यन्ते। लोपागमौ यथा—"देवा अदुह्र" अदुहतेत्यर्थः। अत्र दुहेर्लङि झस्यादेशे कृते "लोपस्त आत्मनेपदेषु" (७।१।४१) इत्यनेन तकारस्य लोपः "बहुलं छन्दसि" (७।१।८) इत्यनेन रुडागमः। वर्णविकारा यथा—"उदग्राभञ्च निग्राभञ्च ब्रह्म देवा अवीवृधन्" इत्यत्र "हृग्रहोर्भश्छन्दसि" इति सूत्रे "उदग्राभनिग्राभौ च छन्दसि स्रुगुद्यमननिपातनयो"रिति वार्त्तिकेन स्रुगुत्तोलनाव-तारणयोरर्थयोर्घञ् "हृग्रहोर्भश्छन्दसि हस्येति वक्तव्य" मित्यनेन हस्य भकारः। ये त लोपागमवर्णविकारानभिज्ञा न ते वेदान् परिपालयिष्यन्तीति तत्परिपालनाय व्याकरणा-ध्ययनं प्रयोजनम्।

ऊहेति। यत्राङ्गजातं पूर्णमुपदिष्टं सा प्रकृतिः। यत्र न तथोपदिष्टं सा विकृतिः। "सौर्य्यं चरुं निर्व्वपेद्ब्रह्मवर्चसकाम" इत्यनेन विकृतौ योगोविहितः; निर्व्वपणमन्त्रस्तु प्रकृतावभिहितः। तद्यथा तत्राग्नेर्मन्त्रोऽस्ति "अग्नये त्वा जुष्टं निर्व्वपामी"ति। इह तु ब्रह्मवर्चसकामेनाग्नयविकारभूतसूर्य्योपयोगी निर्व्वपणमन्त्रस्तत ऊहनीयः। व्याकरणज्ञो हि विभक्तिविपरिणामेन तन्निर्वहति "सूर्य्याय त्वा जुष्टं निर्व्वपामी"ति। एवं "देवीरापः शुद्धाः स्थ" इत्यत्र लिङ्गवचनविपरिणामेन "देवाज्य शुद्धमसी"ति। न ह्यव्याकरणज्ञेन तन्निर्वाहः। अतोऽध्येयं व्याकरणम्।

३। इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। तेऽसुराः। दुष्टः शब्दः। तदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्व्वन्ति। यो वा इमाम्। चत्वारि। उतः त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवोऽसिवरुण इति।

(६) अपशब्दनिवारणम्, (७) दुष्टशब्दाप्रयोगः, (८) स्वरादिसंस्कारेणार्थपरिग्रहेण

आगम इति। वेदा हि षडङ्गः। षडङ्गेषु व्याकरणञ्च प्रधानम्। तत्र कृतप्रयत्नोऽन्यत्राप्रधानेषु फलवान् भवति। शास्त्रविध्यनुसारेण तदनध्ययने प्रत्यवायोऽध्ययने दुष्कृतिनिवृत्तिः। अतो हेत्वनुसन्धानं विनापि तन्नित्यध्येयम्, नित्यकर्म्मवत्।

लघ्वनेति। साध्वसाधुविवेकेन वैदुष्यलाभाय शब्दा अवश्यं विज्ञेयाः। शब्दानामानन्त्यान्न प्रतिपदपाठेन तदायत्तीकरणं सम्भवति। अतएव लघुनोपायेन तद्यथा निष्पद्येत तत् करणीयम्। न तद्विना व्याकरणेन सम्भवति। अतस्तदध्येयम्।

असन्देहेति। "स्थूलपृषतीमनड्वाहीमालभेत"इत्यत्र स्थूला चासौ पृषती चेति कर्म्मधारयः। अत्र पक्षे गौः स्थूला पृषती बिन्दुमती च। स्थूलानि पृषन्ति यस्या इति बहुव्रीहिः। अत्र स्थूलत्वं बिन्दूनां गौः स्थूला वा कृशा वेति न कापि क्षतिः। इह वैयाकरणा लकाराकारे उदात्तत्वं दृष्ट्वा पूर्व्वपदप्रकृतिस्वरेण बहुव्रीहिं निश्चिन्वन्ति। न त्ववैयाकरणास्तत् कर्त्तुं समर्थाः। अतः स्वरतोऽर्थनिरूपणेन सन्देहनिरसनायाध्येयं व्याकरणम्।

अपशब्दनिवारणमिति। "म्लेच्छा मा भूमेत्यध्येयं व्याकरण"मिति भाष्यग्रन्थस्य स्वरसतो निबद्धम्। "तेऽसुरा"इति ब्राह्मणप्रतीकः। तद्यथा—"तेऽसुरा हेलयो हेलय इति कुर्व्वन्तः पराबभूवुस्तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यद-

अधीतस्यापि निष्फलत्वाय, (९) अभ्युदयहेतुभूतकुशलप्रयोगः, (१०) प्रत्यभिवादे प्लुतकरणम्,

---

पशब्दः ।" अत्रासुराणां पराभवे कारणं "हे ऽलयो हे ऽलयः" इत्यपशब्दकरणम् । "हैहेप्रयोगे हैहयो"रिति (८।२।८५) प्लुते 'हे अलयः, हे अलयः' इति प्रकृतिभावे कर्त्तव्ये (६।१।१२४) तदकरणं म्लेच्छनम् । "सर्व्वः प्लुतः साहसमनिच्छता विभाषा कर्त्तव्ये"ति प्लुतकरणस्य विवक्षाधीनत्वात् प्रकृतिभावाभावे दोष इति मत्वा "हे ऽलयो हे ऽलयः" इति वाक्यद्विर्व्वचनमत्र म्लेच्छत्वं कथमन्यथा "सर्व्वस्य द्वे" (८।१।१) इत्यत्र पदग्रहणस्य चोदितत्वात् । नात्र शास्त्रीयद्विर्व्वचनमैच्छिकमाम्रेड़ितस्वरविहीनत्वादिति चेत् 'अलयः' इत्यत्रारिशब्दगतरेफस्य लत्वमपशब्दः ।

दुष्टशब्दाप्रयोग इति । "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।" इति शिक्षासु पठ्यते । 'यथेन्द्रशत्रु'रिति प्रतीकघटितस्ये'न्द्रशत्रुर्वर्द्धस्वे'त्यूह्यमानस्यामन्त्रत्वात् भाष्यकारेण मन्त्रशब्दमत्र शब्दमात्रपरत्वेन गृहीत्वा "दुष्टः शब्दः स्वरतो वर्णतो वे"ति पाठः कृतः । पुरा किल पुत्रहन्तारमिन्द्रं प्रति प्रकुपितेन त्वष्ट्रा तद्विनाशाय वृत्राख्यं पुत्रान्तरमुत्पादयितुमिच्छुनाभिचार आरब्धः । 'तत्रे न्द्रशत्रुर्वर्द्धस्वे'ति मन्त्र ऊहितः । इन्द्रस्य शातयिता इन्द्रशत्रुः इन्द्रस्य हिंसकः सन् वर्द्धस्वेति तत्पुरुषघटितान्तोदात्ते कर्त्तव्ये प्रमादादृत्विजाद्युदात्तः प्रयुक्तः । ततः पूर्व्वपदप्रकृतिस्वरत्वेन बहुव्रीह्यर्थो लब्धः, इन्द्रस्य तेन वृत्रस्य शातयिताऽभवत् । "इन्द्रशत्रुर्वर्द्धस्वे"त्यत्र विधेयत्वान्न सम्बोधनविभक्तिस्तस्या अनुवाद[illegible]त्वात् । यो हि पूर्व्वमिन्द्रशत्रुरभवत् तस्यैव सम्बोधनविभक्तियुक्तत्वं युक्तम् । यथा "राजन् युद्धस्व" इत्यत्र राजत्वसिद्धस्यैव न तु "राजा भव" इत्यत्र राजत्वासिद्धस्य सम्बोधनम् । "यज्ञकर्म्मण्य (१।२।३४)" इत्यत्र जपादिपर्य्युदासेन मन्त्राणामेकश्रुतिर्विहिता । "इन्द्रशत्रुर्वर्द्धस्वे"त्यूह्यमानस्यामन्त्रत्वान्नैकश्रुतिः । कैश्चिज्जपादिषु प्रसज्यप्रतिषेधमाश्रित्यैकश्रुतिर्विहिता । तेषां मते एकश्रुत्यकरणं बहुव्रीहिस्वरकरणञ्चापराधः ।

स्वरादिसंस्कारेणेत्यादि । "यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।" इत्यस्यार्थतः संग्रहः । अतएव "अनर्थकं माधिगीष्महीत्यध्येयं व्याकरण"मिति भाष्यकारनिवचनम् । निगदेन पाठमात्रेण न ज्वलपि न प्रकाशं निष्फलं भवतीत्यर्थः ।

(११) प्रयाजादिमन्त्रेषु विभक्तिकरणम्, (१२) पदशः स्वरशोऽक्षरशो वाग्विधानेनार्त्विजीनत्वम्

अभ्युदयेनेति । अत्र "यस्तु प्रयुङ्क्ते" इत्ययं प्रतीको भाष्ये कात्यायनप्रणीतभ्राजाख्यश्लोकेभ्यः परिगृहीतः । तद्यथा—"यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले । सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ।" इति । अत्र "दुष्यति चापशब्दै"रित्यस्य कर्त्ता कः ? अवाग्योगविन्न तु वाग्योगवित् । कथम् ? यो हि वाग्योगवित् स यद्यप्यपशब्दान् जानाति तथापि साधुशब्दानेव प्रयुङ्क्तेऽतएवाभ्युदयभाग् भवति । विज्ञानाश्रितत्वात् भूयांसोऽप्यपशब्दा न तस्याभ्युदयरोधिनो भवन्ति । अवाग्योगविदोऽज्ञानं न तमपशब्दप्रयोगजनिताधर्माद्रक्षति । अजानन्नपि महापातकी यतः पतितो भवति । "यस्तु प्रयुङ्क्ते" इत्यादि श्लोकः "एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवती"ति श्रुत्यनुगृहीतत्वात् प्रमाणम् ।

प्रत्यभिवादे प्लुतकरणमित्यत्र "अविद्वांस" इति भाष्ये प्रतीकः । श्लोकस्तु—"अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः । कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ।" "प्रत्यभिवादेऽशूद्रे" (८।२।८३) इति नियमेन गुरुणा प्रत्यभिवादे प्लुतः कार्य्यः । यो हि न प्लुतं कर्त्तुं जानाति स स्त्रीवदयमहमिति वक्तव्यो न त्वभिवादये देवदत्तोऽहमित्यादिना संस्कृतवाक्येन । अतः "स्त्रीवन्मा भूमे"त्यध्येयं व्याकरणम् ।

प्रयाजादिमन्त्रेष्विति । याज्ञिकाः पठन्ति । "प्रयाजाः सविभक्तिकाः कार्य्या" इति । प्रयाजमन्त्राः सविभक्तिका एव पठ्यन्ते । यदा हि विपत्पातेन व्यवच्छेदस्तदा पुनर्नैमित्तिकामिष्टिं विधाय तत्रेदमाम्नातम्—"प्रयाजाः सविभक्तिका" इति । अत्राग्निशब्दप्रकृतिकविभक्तियुक्ता एव मन्त्रा ऊह्याः ।

पदश इति । "यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति, स आर्त्विजीनो भवति" इत्यतो "यो वा इमा"मिति भाष्ये प्रतीकः । पदं पदमिति पदशः—"संख्यैकवचनाच्च वीप्सायां"(५।४।४३)मिति शस् । "स्वरशः"—स्वर उदात्तादिः । "अक्षरशः"—अक्षरं व्यञ्जनसहितोऽच् । "आर्त्विजीनः"—"यज्ञर्त्विग्भ्यां घखञौ" (५।१।७१)वित्यनेन ऋत्विजम् अर्हतीति आर्त्विजीनो यजमानः, "यज्ञर्त्विग्भ्यां तत्-

कीनत्वलाभः, (१३) शब्दब्रह्मणा साम्यसम्पादनार्थम्, (१४) वाचामप्रकटत्वापवारणम्,

---

कर्म्मार्हतीत्युपसंख्यान"मिति वार्त्तिकेन ऋत्विक्कर्म्मार्हतीति आर्त्विजीनो याजकः। तस्मात् यजने याजने च विदुष एवाधिकार इति फलितार्थः।

शब्दब्रह्मणेति। "चत्वारीति" भाष्ये प्रतीकः। चत्वारि शृङ्गेति वेदा वा एत उक्ता (नि १३।७) इति यास्कोक्त्या यज्ञात्मकाग्निं स्तौत्रेय सायनेनान्यथेयमृक् व्याख्याता। सूक्तेऽस्मिन् अग्निसूर्य्याबगोघृतानामन्यतमो देवता। ततो यद्यपि भाष्यकारव्याख्या केवलं स्वमतपक्षपातेन प्रतीयते, तथापि वेदशब्दयोरभेदग्रहणेनेयं सिद्धा भवतीति तद्व्याख्यानं वयमनुसरामः। महान् देवः शब्दो वृषभत्वेनात्र वर्णितः, स च मानवे प्रविष्टः। तद्यथा "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।" इति। (४म. ५८सू. ३ऋक्)। नामाख्यातोपसर्गनिपाताश्च चत्वारि शृङ्गाणि। भूतभविष्यद्वर्त्तमानाः कालास्त्रयः पादाः। व्यङ्ग्यव्यञ्जकभेदेन नित्यः कार्य्यश्चेति द्वौ शब्दात्मानौ द्वे शीर्षे। सप्त विभक्तयः सप्त हस्ताः। उरसि कण्ठे शिरसीति त्रिषु स्थानेषु बद्धः त्रिधा बद्धः। ज्ञानपूर्व्वकानुष्ठानेष्ट कामदत्वात् वर्षणात् वृषभः। रोरवीति शब्दं करोति। महः महान्। देवः शब्दः। मर्त्त्यान् मरणधर्म्मणो मनुष्यान्। आविवेश प्रविष्टवान्। अन्यत्र च "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।" (१म. १६४सू. ४५ऋक्) नामाख्यातोपसर्गनिपाताश्च चत्वारि पदजातानि। प्रत्येकं तानि चतुर्भिर्भागैर्विभक्तानि। सम[illegible] तानि के विदुः? ब्राह्मणा ये मनीषिणः। मनस ईषिणो मनीषिणः—पृषोदरादित्वात् साधु। कथं मनीषिण एव विदन्ति? गुहा गुहायाम् "सुपां सुलुक्" (७।१।३९) इत्यनेन सप्तम्या लुक्। गुहायामज्ञाने त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्ति न प्रकाशन्ते इत्यर्थः। केवलं व्याकरणप्रदीपेन तानि प्रकाशन्ते इति भावः। तुरीयं चतुर्थं पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा वदन्ति। पूर्व्वोक्तानृचमालम्ब्य भाष्यकारेणोक्तम्—"महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरण"मिति। तदनुसरणेनैवात्र—"शब्दब्रह्मणा साम्यसम्पादनार्थ"मिति संक्षेपः।

वाचामिति। "उत त्व" इत्यत्र भाष्ये प्रतीकः। ऋक् तु तत्रैव—"उत त्वः पश्यन

(१५) वाचां संस्करणम्, (१६) अपशब्दप्रयोगजनितप्रायश्चित्तपरिहारः, (१७) अतद्धित-

---

ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः।" (१०म. ७१सू. ४ऋक्)। उत अपि खलु त्वः एकः अविद्वानिति शेषः एनां वाचं पश्यन् प्रत्यक्षेण शब्दस्वरूपाण्यवलोकयन्नपि न ददर्श न पश्यति। उत अपि खलु त्व एकः शृण्वन्नपि न शृणोति। अविद्वांसमुक्त्वा विद्वांसमाह—उत उ अपि खलु त्वस्मै विदुषे, पत्ये उशती कामयमाना सुवासा जायेव तन्वं विसस्रे तनुं विवृणुते। "वाङ्मो विवृणुयादात्मानमित्यध्येयं व्याकरण"मिति भाष्यस्वरसात् "वाचामप्रकटत्वा-पवारण"मिति मूले।

वाचां संस्करणमिति। "सक्तुमिवे"ति भाष्ये प्रतीकः। ऋक् तु तत्रैव—"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधि वाचि।" (१ म. ७१सू. २ऋक्)। सच सेचन इत्यतः सक्तुः दुर्धावः दुःशोध इति तदर्थः। कसतेर्वा पृषोदरादित्वाद्वर्णव्यत्ययेन सक्तुः विकसित इति तदर्थः। ततवद्विस्तारयुक्तं वा तुन्नवद्बहुच्छिद्रं वा परिपवनं शोधनसाधनं तितउ तनोतेर्डउः सन्वच्च (उ ५।५२)। "चालनी तितउः पुमानि"ति अमरः। पुंनपुंसकवर्गे—"स्याद्वास्तु ह्रिङ्गु तितउ" इति त्रिकाण्डशेषः। अमरस्य केवलं पुंस्त्वनिर्देशो भाष्यानुरोधाद्व्यवच्छेदः। तितउना सक्तुं पुनन्तः तुषाद्यपनयनेन पवित्रं कुर्वन्त इव धीराः ध्यानवन्तः वैयाकरणाः मनसा प्रज्ञानेन वाचम् अक्रत—"मन्त्र घस ह्वर णश वृ दहाद्वृच् कृ गमि जनिभ्यो लेः" (२।४।८०)रित्यनेन लेः (च्लेः) लुकि कृधातोरक्रतेति रूपम्—अकृषत शोधितवन्त इत्यर्थः। अत्रा—"ऋचि तु-नु-घ-मक्षु-तङ्-कु-त्रो-रुष्याणाम्" (६।३।१३३) इत्यनेन दीर्घः—अत्र दुरधिगम्ये मार्गे ते वैयाकरणाः सखायः सन्तः सख्यानि सायुज्यानि समानख्यातिनिबन्धनैकत्वानि जानते। कुत एतदधिगम्यते ? एषां वाचि भद्रा शोभना लक्षणाभासनात् परिवृढा प्रभुत्व-सम्पन्ना संविल्लक्षणा लक्ष्मीर्भवति। अधिः सप्तम्यर्थद्योतकः।

अपशब्देति। "आहिताग्नि"रिति प्रतीकः। "याज्ञिकाः पठन्ति—'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदि'ति। प्रायश्चित्तीया माभूमेत्यध्येयं व्याकरणम्।" "अपशब्दप्रयोगजनितप्रायश्चित्तपरिहारः" इत्यस्यैव भाष्यग्रन्थस्यानुसृतिः।

नामकरणम् (१८) अध्ययनेन वसुवत् सत्यदेवत्वलाभः।

प्रायश्चित्तीयामित्यत्र भवार्थे "वृद्धाच्छः" (४।२।११४)। प्रायश्चित्तीया इत्यत्र प्रायश्चित्ताय हितास्तन्निमित्तोत्पादना इत्यर्थः।

अतद्धितेति। "दशम्यां पुत्रस्ये"ति प्रतीकः गृह्यकारवचनाद्भाष्ये स्थितः। तत्र दशम्यामिति सामीपिकमधिकरणम्। तेन दश दिनानि व्यतीत्य तत्समीपवर्त्तिदिनमेव गृह्यते। "याज्ञिकाः पठन्ति—'दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात्। घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नामकृतं कुर्यान्न तद्धित'मिति।" दशम्या उत्तरः दशम्युत्तरः "पञ्चमीति" (२।१।३७) योगविभागात् समासः। दशम्युत्तरः कालो यस्मिन् कर्म्मणीति दशम्युत्तरकालम् अशौचविधायकदशदिनानन्तरं जातस्य पुत्रस्य नाम विदध्यात्। किंविधं तत्? घोषवदादि घोषवान् वर्ण आदिर्यस्य। अन्तरन्तःस्थम् अन्तर्मध्ये अन्तःस्था य र ल वा यस्य, अवृद्धम् आदैचौवर्ज्जितम्, त्रिपुरुषानूकम् नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषाः ताननुकायति अभिधत्त इति त्रिपुरुषानूकम् "अन्येषामपि दृश्यते" (६।३।१३७) इत्यनेन दीर्घः। त्रिपुरुषमित्यत्र "अकारान्तोत्तरपदद्विगुः स्त्रियां भाष्यते" इत्यनेन स्त्रीत्वे प्राप्ते "पात्रादिभ्यः प्रतिषेधो वक्तव्यः" इत्यनेन पात्रादित्वात् स्त्रीत्वप्रतिषेधः। त्रिपुरुषमनुकायतीति मूलविभुजादित्वात् कः। "आतश्चोपसर्गे कः" (३।१।१३६) इत्यनेन कं विधाय पश्चात् षष्ठीतत्पुरुष इत्यत्र नानुमन्यते "यू स्त्र्याख्यौ नदी" (१।४।३) इति सूत्रे "ननु चोक्तं स्त्र्याख्यायाविति प्राप्नोति अनुपसर्गे हि कौ विधीयत इति। मूलविभुजादिपाठात् को भविष्यती"ति भाष्योक्तिसाम्यात्, "कर्म्मण्यण्" (३।२।१) इति सूत्रे पठितेन "अकारादनुपपदात् कर्म्मोपपदो विप्रतिषेधेने"ति वार्त्तिकेन कर्म्मोपपदस्यानुगृहीतत्वाच्च। अनरिप्रतिष्ठितम् शत्रुनामवर्ज्जितम्। पुनः किंविधम्? द्व्यक्षरं चतुरक्षरम्। किञ्च भो न कर्त्तव्यम्? न तद्धितम् कर्त्तव्यम्। "न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्" इत्युक्तिमनुसृत्योक्तम्—"अतद्धितनामकरण"मिति।

अध्ययनेनेति। "सुदेवो असी"ति भाष्ये प्रतीकः। ऋक् च तत्रैव—"सुदेवो असि

"वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः" अतोऽनर्थकं व्याकरणमिति विप्रतिपन्नबुद्धीनां व्याकरणाध्ययनविमुखानां प्रवृत्त्यर्थं प्रयोजनान्याख्यातान्याचार्येण ।

वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ।" (८म. ६९सू. १२ऋक्) इति । हे वरुण सुदेवोऽसि सत्यदेवोऽसि । यस्य ते काकुदं तालु—काकुः जिह्वा साऽस्मिन्नुद्यते इति काकुदम्, धातूनामनेकार्थत्वात् वदेरुत्क्षेपणार्थः, "घञर्थे कविधान"मिति अधिकरणे कः, सम्प्रसारणम् ; अनुपपदाश्रयकविधानात् पाणिक-षष्ठीसमासः ; तत्र शकन्ध्वादित्वात् पररूपम् । नुदधातोरधिकरणे कः पृषोदरादित्वा-न्नोलोप इत्यपरे—सप्त सिन्धवः नद्य इव सप्त विभक्तयः अनुक्षरन्ति तालुनुप्राप्य प्रकाशन्ते; सुषिरां सच्छिद्राम्—"ऊषिसुषिमुष्कमधो रः" (५।२।१०७) इति सुषेर्मत्वर्थीयो रः "रन्ध्र-श्वभ्रं तथा सुषि" रित्यमरः । "सरन्ध्रे सुषिरं त्रिषु" इति च ' सुष्ठु स्यतीति सुषि''रिति क्षीरस्वामी – सूर्म्यं सूर्मीं—"अमि पूर्वः" (६।१।१०७) इत्यत्र "वा छन्दसि" (६।१।१०६)त्यनुवृत्तेर्यणादेशः—लौहमयीं प्रतिमामिव । यथा सच्छिद्रां लौहमयीं प्रतिमां प्रविश्याग्निस्तां मलशून्यां करोति, तथा सप्त विभक्तयः शरीरगतं पापमपाकुर्वन्तीति फलितार्थः । यतो व्याकरणज्ञानात् वरुणः सत्यदेवत्वमापन्नः, अन्येऽपि तज्ज्ञानात्तथा भविष्यन्तीत्याह "सत्यदेवः स्यामित्यध्येयं व्याकरणम्" । इममेवार्थं वाक्यान्तरेण व्यव-धात्—"अध्ययनेन वरुणदेववत् सत्यदेवत्वलाभ" इति ।

वेदान्न इति । पुरा व्याकरणाध्ययनव्युत्पन्नेभ्यो वैदिकाः शब्दा उपदिष्टाः । अधुना तु न तथा । विवाहादौ त्वरमाणा वेदमधीत्य त्वरितवक्तारो भवन्ति । ते पुनरावा-र्येण व्याकरणशिक्षार्थमभ्यर्थिता अपि "वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिका" इति वादमवलम्ब्य तदध्ययने निवृत्ता भवन्ति । तान् प्रति सुहृद्भूत्वाचार्यः प्रयोजना-न्यन्वाचष्ट । मन्वादिषु वेदवेदाङ्गानां युगपदध्ययनं दृश्यते । तत्कथं भाष्यकारेणोक्तं "पुरा कल्प एतदासीत् । संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । तेभ्यस्तत्त-स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते ।" अत्रार्थाद्यनुसन्धानेन विशे-षतोऽध्ययनमभिप्रेतम्, न तु कण्ठस्थकरणमात्रम् । मन्वादीनां युगपदध्ययननिबन्धनन्तु आदौ कण्ठस्थकरणे व्याकरणज्ञानानन्तरं विशेषाध्ययने पर्यवसितमिति सर्वं समञ्जसम् ।

कथं शब्दानुशासनं कर्त्तव्यम्? इदमत्र विचार्य्यते। किं शब्दोपदेशः कर्त्तव्यः, आहोस्वित् अपशब्दोपदेशः, आहोस्विदुभयोपदेशः? अन्यतरोपदेशेन कृतं स्यात्। तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधः, अभक्ष्यप्रतिषेधेन भक्ष्यनियमो भवति। किन्तर्हि अपशब्दोपदेशो विधातव्यः? एकैकस्य शब्दस्य बहवोऽपभ्रंशाः, अतः

४। लघुत्वाच्छब्दोपदेशः।

अनेन च

५। इष्टान्वाख्यानं खल्वपि भवति।

साधुशब्दप्रयोगात् धर्म्मावाप्तिः। साध्यनेन सिद्ध्यति।

तत्र शब्दानामानन्त्यात् प्रतिपदपाठो न सम्भवति। कथं तर्हि शब्दानां प्रतिपत्तिः? तत्राह

कथमिति। को वा शब्दः, किं वा तत्स्वरूपम्, कानि वा शब्दानुशासने प्रयोजनानि, सर्व्वमिदमुक्तम्। अधुना कथं शब्दानुशासनं कर्त्तव्यं तदुक्तमाह कथमिति। प्रथमं तावत् शब्दानामपशब्दानामुभयेषां वानुशासनमिति प्रश्नः। तत्र शब्दानामपशब्दानामन्यतरोपदेशेन मनोरथसिद्धिरित्याह। कथम्? भक्ष्याभक्ष्यनियम निषेधवत्। तद्यथा पञ्च पञ्चनखा भक्ष्या इत्युक्त्या भक्ष्यनियमे कृते ततोऽन्येऽभक्ष्या इत्युपलभ्यते। अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यशूकर इत्युक्त्या अभक्ष्यप्रतिषेधे वन्यकुक्कुटो वन्यशूकरो भक्ष्य इत्युपलभ्यते। एवं गौरिति शब्दोपदेशे गाव्यादयोऽपशब्दा इति प्रतीयते। यद्यन्यतरोपदेशेन साफल्यं स्यात्, तत् किम् अपशब्दोपदेशेन तदन्याः शब्दाः प्रत्येतव्याः? न, गौरवापत्तेः। तद्यथा गौरित्येकः शब्दः, तस्यापभ्रंशाः गावी गोणी-गोपलिकेत्येवमादयो बहवः। अतएवापशब्दोपदेशस्य गरीयस्त्वाल्लघीयान् शब्दोपदेश एव ज्यायान्। तेन च इष्टलाभोऽपि भवेत्।

तत्रेति। गौरश्वः पुरुष इत्येवमादयः प्रतिपदपाठो न सम्भवति शब्दानामपरिगणनीयत्वात्। तत्रेयमाख्यायिका—इन्द्रो बृहस्पतिमुपगम्य प्रतिपदोक्तानां शब्दानां

६। किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्त्यं येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्।

किं पुनस्तत्? उत्सर्गापवादौ। सामान्येनोत्सर्गः। विशेषतोऽपवादः। तद्यथा—"कर्मण्यण्" (३।२।१)—उत्सर्गः; तस्य विशेषेणापवादः—"आतोऽनुपसर्गे कः" (३।२।३) इति। इममेवार्थं संक्षिप्य वृत्तिकार आह "प्रकृत्यादि-विभागकल्पनया सामान्यविशेषवता लक्षणेने"ति।

केचिद्वदन्ति आकृतिरेव शब्देन प्रतिपाद्यते, केचिच्च द्रव्यमिति। पाणिनाचा-

---

शब्दपारायणं नाम शास्त्रविशेषं दिव्यं वर्षसहस्रमधिजगे, नान्तं जगाम। तामिमामाश्रित्य भाष्यकार आह "बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः न चान्तं जगाम। किं पुनरद्यत्वे यः सर्व्वथा चिरं जीवति स वर्षशतं जीवति।" ग्रहणाभ्यासाध्यापनव्यवहारभेदेन चतुर्भिः प्रकारैर्विद्योपयोगः। तत्र प्रतिपदपाठानुसरणे ग्रहणकालेनैव कृत्स्नायुःपर्य्यवसानं स्यात्, अभ्यासादिकन्तु न भवेदेव। अतएवोक्तं महर्षिवर्य्येण "तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः।"

केचिदिति। लक्ष्यसिद्ध्यर्थं सूत्रकृता पक्षद्वयमप्याश्रीयते अन्यथा प्रक्रियासिद्धौ व्याघातापत्तिः। तद्यथा केवले जातिपक्षसमाश्रये "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे"ति न सिद्ध्येत् केवले व्यक्तिपक्षसमाश्रये "पुनःप्रसङ्गविज्ञानादि"ति न घटेत। जातौ पदार्थे द्वयोर्विध्योः क्वचिदेकत्र प्रसङ्गे परस्परप्रतिबन्धान्न कार्य्यं स्यात्। यतस्तयोस्तुल्यत्वात् परस्परपरिहारेण स्वजातिगतव्यक्तिविशेष एव चरितार्थता। "विप्रतिषेधे परं कार्य्यं"(१।४।२)मिति विप्रतिषेधसूत्रेण परं तावद्भवतीति अप्राप्तिप्रापको विधिर्भवति। सुतरां यदि पूर्व्वस्य निमित्तमस्ति तत्प्रसङ्गे न बाधापत्तिः। यथा भिन्धकीत्यत्र भिनद्-हि इति स्थिते "हुझल्भ्यो हेर्धिः" (६।४।१०१) इत्यनेन हेर्धिभावः, "अव्ययसर्व्वनाम्नामकच् प्राक् टेः"(५।३।७१)रित्यत्र "तिङश्च" (५।

र्थयोभयथा हि सूत्राणि पठितानि । तद्यथा आकृतिं पदार्थमभ्युपगम्य "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" (१।२।५८) इत्युच्यते, द्रव्यं पदार्थमभ्युपगम्य "सरूपाणामेकशेष एकविभक्तौ" (१।२।६४) इत्येकशेष आरभ्यते ।

३।५६)त्यस्यानुवृत्तेः अकृत, इत्युभयोर्विध्योः परत्वात् हिर्धिर्भवति अथच बाधाभावात् पुनः प्रसङ्गविज्ञानादकृतमपि प्राप्नोति । किन्तु जुहुतात्त्वमित्यत्र धिभावं बाधित्वा परत्वात् "तुह्योस्तातङाशिष्यन्यतरस्याम्"(७।१।३५)मित्यनेन तातङि कृते स्थानिवद्भावात् धिप्राप्ति-र्यन्निमित्तमस्ति न तद्बाध्यते । व्यक्तिपक्षे तु सकलव्यक्तिविषयकस्य विधेः एकस्यां व्यक्तौ चरितार्थस्य अन्यस्यां प्राप्तौ न बाधाप्नोतीति विकल्पप्रसङ्गात् विप्रतिषेधसूत्रं तत्र परमेव भवति न तु पूर्वमिति नियमार्थं भवति । अत एकत्र विधिद्वयप्रसङ्गे परमेव भवति न तु पूर्वमिति नियमात् विकल्पत्वं व्याहतं भवति । अत्र भिन्धकीतिवत् जुहुतात्त्वमिति न सिद्ध्यति पुनः प्रसङ्गविज्ञानात्, किन्तु "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव"इत्यस्य विषयत्वात् जुहुतात्त्वमित्यत्रस्य पुनर्धिभावत्वं बाधते । अतः पक्षद्वयाश्रयेणैव लक्ष्यसिद्धिर्भवतीति "आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामित्युच्यते द्रव्यं पदार्थं मत्वा सरूपाणामित्येकशेष आरभ्यते ।"

जातिव्यक्तिघटितोऽयं विचारोऽवगन्तव्यः । जातिवादिन आहुः—जातिरेव शब्देन प्रतिपाद्यते, व्यक्तीनामानन्त्यात् तासु शब्दसम्बन्धग्रहणस्यासम्भवात् । सर्वव्यक्तिषु जातिरेकाकारताप्रतीतिमुत्पादयति, अतोऽस्या अस्तित्वमवसीयते । अत एव भिन्नेषु द्रव्येषु भिन्नेषु गुणेषु भिन्नासु क्रियासु भिन्नाकारतया भासमानया भिन्नद्रव्याद्भिन्नद्रव्यं भिन्नगुणाद्भिन्नगुणः भिन्नक्रियाया भिन्नक्रियावच्छिद्यते । गवादयो द्रव्यवाचकाः, शुक्लादयो गुणवाचकाः, गमहनपठादयः क्रियावाचकाः शब्दा भिन्नद्रव्यगुणक्रियासमवेतां जातिमभिदधति । तस्यां प्रतीतायां तदावेशात् तदवच्छिन्नानि द्रव्यादीनि प्रतीयन्ते । अतो लाघवाज्जातिरेव शब्दस्य वाच्या न तु व्यक्तिः । उक्तञ्च हरिणा—"सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।" स्फोटत्वमपि जातिरेव, उक्तञ्च तेनैव "अनेकव्यक्त्यभिव्यङ्ग्या जातिस्फोट इति

किं पुनः नित्यः शब्दः, आहोस्वित्कार्य्यः । उभयथापि लक्षणं प्रवर्त्त्यम् । कथं पुनरिदं पाणिनेराचार्य्यस्य शास्त्रं प्रवृत्तम् ?

७ । सिद्धे शब्दार्थसम्बन्धे । * ।

सिद्धे शब्दे अर्थे सम्बन्धे चेति । सिद्धशब्दो नित्यपर्य्यायवाची, अतएव शब्दो नित्यः

स्मृतम् । कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥" इति । गोत्वादिजातिसम्बन्धाद्द्रव्यस्य, द्रव्ये गुणादेः प्रतीतिरिति भेदः । व्यक्तिवादिनस्त्वाहुः, व्यक्तिरेव स्वभावतः प्रतीयते ; जातिस्तु समधर्म्मिणामेकत्वनिर्व्वाहाय साधारणधर्म्मग्रहणेन त्वप्रत्ययादियोगेन । तदुपलक्षणेन हि व्यक्तेरानन्त्यदोषापनयः । नन्वेवं जात्या व्यक्तिप्रतीतेस्तस्या एव वाच्यत्वमायाति । न, स्वयमसदपि प्रतीतिमुत्पादयति । तद्यथा गमनस्यागमनं भोजनस्याभोजनम् । अगमनेन हि गमनमभोजनेन हि भोजनमवच्छिद्यते । एवमिहापि व्यक्त्यतिरिक्तजातेरसत्त्वेऽपि तया व्यक्तिपरिग्रहः । जातिराकृतिः, व्यक्तिर्द्रव्यम् ।

किं पुनरिति । अत्र भाष्यकृता शब्दानां नित्यत्वकार्य्यत्वनिर्द्धारणाय विचारो नोत्थापितः । संग्रहग्रन्थे दोषान् प्रयोजनानि च सयुक्तिकं प्रदर्श्य नित्यत्वं कार्य्यत्वमुभयमेव निर्णीतमित्युक्ताह "उभयथापि लक्षणं प्रवर्त्त्य"मिति । संग्रहो व्याड़िकृतो लक्षश्लोकसंख्यो ग्रन्थ इति प्रसिद्धिः । अत्र नित्यत्वकार्य्यत्वयोः स्वरूपं कैयटेनैवमुक्तम् "केचिद्धनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दमाहुः । अन्ये वर्णव्यतिरिक्तं पदस्फोटमिच्छन्ति । वाक्यस्फोटमपरे संगिरन्ते । अन्ये तु ध्वनिरेव शब्दः स च कार्य्यस्तद्व्यतिरेकेणान्यस्यानुपलम्भादित्याचक्षते ।"

कथं पुनरिति । प्रश्नोऽयं शब्दार्थसम्बन्धानां स्रष्टृत्वमथवा कर्त्तृत्वमाचार्य्यस्येति प्रदर्शनाय ।

नित्यत्वमत्र शब्दस्य स्फोटत्वेन । ये तु शब्दानां कार्य्यत्वं मन्यन्ते तेषां मतेऽपि प्रवाहनित्यतया नित्यत्वम् । अर्थस्यापि जातित्वेन नित्यत्वम्, व्यक्तिपक्षे तु प्रवाहनित्यतया नित्यत्वम् । शब्दार्थयोः सम्बन्धस्यापि नित्यता व्यवहारपरम्परया अनादित्वात् ।

अर्थो नित्यः, तदुभयोः सम्बन्धो नित्यः। ननु सिद्ध आकाश इत्यादिष्वविनाशिदेशान्तरप्राप्तिरहितभावेषु सिद्धशब्दो यथा प्रयुक्तस्तथा सिद्ध ओदन इत्यादिषु कार्य्येष्वपि, तत् कथं नित्यपर्य्यायवाची? संग्रहग्रन्थे कार्य्यप्रतिद्वन्द्विभावादस्य नित्यपर्य्यायवाचकत्वम्। अथवा सिद्धसाध्ययोः सिद्ध एव न साध्य इत्येकपदेनावधारणम्। तद्यथा अब्भक्षशब्देन अप एव भक्षयतीति गम्यते। अत्यन्तसिद्धः सिद्ध इति पूर्व्वपदलोपो वात्र द्रष्टव्यः। "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षण"मिति न्यायमाश्रित्य व्याख्यानतो नित्यपर्य्यायवाचिनो वा ग्रहणम्। ननु नित्यशब्द आभीक्ष्ण्यार्थेऽपि वर्त्तते तद्यथा नित्यप्रहसितः। अत्रापि व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायेनैवार्थः स्यात्। इहासन्दिग्धार्थं नित्यशब्दमनुपादाय सिद्धशब्दोपन्यासो मङ्गलार्थम्।

कं पुनः पदार्थं मत्वैष विग्रहः क्रियते, सिद्धे शब्दे अर्थे सम्बन्धे चेति। आकृति-

---

सिद्ध ओदन इति। सिद्धशब्दोऽत्र निष्पन्नार्थकः। संग्रहग्रन्थ इति। संग्रहग्रन्थे शब्दः कार्य्योऽथवा सिद्ध इति पक्षद्वयं विचारितम्। तत्र सिद्धशब्दः कार्य्यप्रतिपक्षार्थाभिधायित्वेन प्रयुक्त इत्यत्र नित्यपर्य्यायवाचित्वेन तस्य ग्रहणम्।

एकपदेनावधारणमिति। एवशब्दप्रयोगे द्विपदमवधारणम्, तदप्रयोगे यत्र सामर्थ्यादवधारणमवगम्यते तदेकपदमिति। पूर्व्वपदलोप इति। यथा देवदत्त इत्यत्र दत्तः, सत्यभामेत्यत्र भामा। मङ्गलार्थमिति। "सिद्धे शब्दार्थसम्बन्धे" इति वार्त्तिकेन वार्त्तिकपाठ आरभ्यते। तदुपलक्ष्य भाष्यकार आह "माङ्गलिक आचार्य्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। 'मङ्गलादीनि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च, अध्येतारश्च सिद्धार्था यथा स्यु'रिति।" सिद्धशब्दस्य नित्यपर्य्यायवाचित्वेन वर्णने शक्तिमनुभूयाचार्य्यस्तमादितो मङ्गलार्थं प्रायुङ्क्तेति प्रथमव्याख्याने न दोषः।

विग्रह इति। सिद्धे शब्दे अर्थे सम्बन्धे चेति विग्रहो नित्यत्वपक्षे। अनित्यत्वपक्षे तु सिद्धे शब्दे अर्थसम्बन्धे चेति। अर्थेऽनित्येऽपि सम्बन्धस्य नित्यता शब्दाश्रयत्वात्। अर्थवतां शब्दानां नित्योऽभिसम्बन्धोऽर्थैरिति सम्बन्धविशेषणतयार्थग्रहणम्। युक्तितोनित्यत्वानित्यत्व इति। प्रथमन्तावदाकृतिर्हि नित्या द्रव्यमनित्यम्। द्रव्यस्योत्पत्तिविनाशादिकं दृश्यते न तथाकृतेरतएव सा नित्या। द्वितीये द्रव्यं हि नित्यम् आकृतिरनित्या,

द्रव्ययोर्गुणितोर्नित्यत्वानित्यत्वे सिद्धे, अनित्यं तं पदार्थं मत्वैष विग्रहः, सिद्धे शब्दे अर्थे सम्बन्धे च ।

८। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्म्मनियमः । * ।

अथ कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति । लोकतः । लोको हि बुद्ध्या वस्तु निरूप्यार्थावगमाय शब्दान् प्रयुङ्क्ते, न च घटादिवत् तेषां निवृत्तौ यत्नं कुरुते । यदि तर्हि लोक एव प्रमाणम् किं शास्त्रेण ? धर्म्मनियमः । धर्म्माय नियमः धर्म्मनियमः, धर्म्मार्थो वा नियमो धर्म्मनियमः, धर्म्मप्रयोजनो वा नियमो धर्म्मनियमः । यथा लौकिक वैदिकेषु "अभक्ष्यो ग्राम्यकुक्कुटः ।" "भृगूणामङ्गिरसा"मित्यादि ।

तद्यथा मृत् कयाप्याकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते । एवं सुवर्णादिष्वपि बोध्यम् । मृदादि द्रव्यं यथावतिष्ठति तदाश्रयेण त्वाकृतिरन्यान्या भवति । अतएव द्रव्यं नित्यमाकृतिरनित्या । न खल्वनेनाकृतेरनित्यत्वं सिद्ध्यति । एकत्राकृतेरदर्शनेन न तस्याः सर्व्वत्रादर्शनं भवति, सा तु द्रव्यान्तरस्थोपलभ्यते । "ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्य्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्य"मिति लक्षणं नैकमात्रनित्यलक्षणम् "तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते ।" तद्भावो हि तत्त्वम् । आकृतेस्तद्भावो न कदाचन विहन्यते । यन्नित्यमिति । शब्दार्थौ हि बुद्धौ प्रतिभासते । शब्द उच्चारिते तदर्थस्तत्क्षणादेव बुद्धावुपस्थितो भवति । अतो द्रव्याकृतिसम्बन्धेन नित्यत्वानित्यत्वमिति विचारं विनापि प्रवाहनित्यत्वादर्थस्यापि नित्यत्वमायातम् ।

न च घटादिवदिति । यो हि घटेन कार्य्यं कर्त्तुमभिलषति स कुम्भकारगृहं गत्वा तं वदति, कुरु घटं कार्य्यमनेन करिष्यामि । न तथा वैयाकरणगृहं गत्वा कोऽपि वदति कुरु शब्दान् तान् प्रयोक्ष्य इति । धर्म्मनियम इति । धर्म्माय नियमः धर्म्मनियमः । "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" (२।१।३६) इत्यत्र तदर्थेन चतुर्थ्यन्ता विकृतिः प्रकृत्या सह समस्यते । धर्म्माय नियम इत्यत्र नास्ति प्रकृतिविकार-

६। समानायामर्थावगतौ शब्देनापशब्देन च शब्देनैवार्थोऽभिधेय इति नियमः। *।

लोकतोऽर्थमुपादाय शब्दान् प्रयुञ्जते। शब्दप्रयोगे तु शास्त्रेण धर्म्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देनेति, एवं क्रियमाणं कर्म्माभ्युदयकारि भवति।

ननु प्रयोगाद्यदि शब्दानां साधुत्वमप्रयुक्तानां का गतिः?

भावः। अत्र तु समासः "विकृतिः प्रकृत्येति वेदश्वघासादीनामुपसंख्यान"मित्यनेन। इह तादर्थ्यमस्ति न तु प्रकृतिविकारभावः। अश्वघासादिषु सम्बन्धसामान्ये षष्ठीं विधाय समासः क्रियते "अश्वघासादयः षष्ठीसमासा भविष्यन्ती"ति चोदितत्वात्। तादर्थ्यं सम्बन्धविशेषः, विशेषे च सामान्यं सम्भवतीति सम्बन्धसामान्ये षष्ठी प्रवर्त्तते। धर्म्माय नियमइत्यत्र चतुर्थी तादर्थ्ये प्रतिपाद्यते, समासस्तु सम्बन्धसामान्ये षष्ठ्या।

यथेति। तत्र लोकानुसारिप्रयोगस्य दृष्टान्तः लौकिकवैदिकेषु। इह लोके वेदे चेति प्रयोक्तव्ये तद्धितप्रिया दाक्षिणात्या लौकिकेषु वैदिकेष्विति वदन्ति। लोके भवा लौकिकाः वेदे भवा वैदिका इति सिद्धपदत्वात् नायमपशब्दः। प्रियतद्धितत्वन्तु एकत्राधाराधेयत्वकल्पनेनाविष्कृतम्। अथवा लौकिकेषु वैदिकेषु सिद्धान्तेष्विति लोकवेदव्यतिरिक्तसिद्धान्तशब्दार्थमभिधातुं तद्धितप्रयोग इति युक्त एव तद्धितार्थः। लौकिकनियमदृष्टान्तो यथा भाष्ये "लोके तावदभक्ष्यो ग्राम्यकुक्कुटः। अभक्ष्यो ग्राम्यशूकर इत्युच्यते। भक्ष्यं नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यं चानेनाश्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्। तत्र नियमः क्रियते। इदं भक्ष्यमिदमभक्ष्यमिति।" शक्यं चानेनेत्यत्र कैयटः "शकेः कर्म्मसामान्ये लिङ्गसर्व्वनामनपुंसकयुक्ते कृत्यप्रत्ययः। ततः पदान्तसम्बन्धादुपजायमानमपि स्त्रीत्वं बहिरङ्गत्वादन्तरङ्गसंस्कारं न बाधते इति शक्यं चुदित्युक्तम्।" अथेदं विवेच्यम्। इह क्षुत् प्रतिहन्तुमित्युभयं शकेः कर्म्मत्वे परिगृह्य कर्म्मसामान्ये लिङ्गसर्व्वनामनपुंसकं कृतम्। स्वरसर्व्वनामैकश्रुतिवत् "नपुंसकं लिङ्गसर्व्वनामे"ति "दाण्डिनायन" (६।४।१७४) सूत्रे भाष्ये स्पष्टम्। सर्व्वेषां नाम सर्व्वनाम, लिङ्गानां सर्व्वनाम लिङ्गसर्व्वनाम। शक्यं क्षुदित्यत्र स्याद्यदीह पूर्व्वमेव विशेषविवक्षा तदा शक्या क्षुदिति भवेदेव।

१०। अस्त्यप्रयुक्तः।

तद्यथा ऊष, तेर, चक्र, पच। न सन्ति चेदप्रयुक्ताः, कथं पुनः सन्ति? सन्ति शास्त्रदृष्ट्या।

११। अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्।

सन्ति चैतेषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते।

यदि केवलं प्रतिहन्तुं शक्तेः कर्म्म स्यात्, तृन् तु प्रतिघातस्य, तदा तृधं प्रतिहन्तुं• शक्यमिति भवेत्। प्रकृतमनुसरामः। तथा च तत्र वैदिकस्यान्तिमदृष्टान्तः। "तथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते। 'भृगूणामङ्गिरसां धर्म्मस्य तपसा तपध्वमिति। अन्तरेणापि मन्त्रमग्निर्दहनकर्म्मा कपालं सन्तापयति। तत्र च नियमः क्रियते, एवं क्रियमाणमभ्युदयकारि भवतीति।" एवमिहापि शब्देनापशब्देन च समानार्थावगतिर्भवति। तत्र धर्म्माय नियमः क्रियते शब्देनैवार्थोऽभिधेयः, नापशब्देन। तत्र वार्त्तिकं "समानायामर्थावगता"वित्यादि। अपभ्रंशानां साक्षाद्वाचकता नास्ति वाचकता तु साधुशब्दस्मरणद्वारेति पक्षोऽत्र नादृतः। साधुशब्दवत् पदार्थस्मरणद्वारैव तेषामर्थवाचकता।

अस्त्यप्रयुक्त इति। यतः प्रयोगात् साधुत्वं ततो येषां नास्तीदानीं प्रयोगस्तेषामसाधुत्वमित्यभियोक्ताऽभिधत्ते। तत्र भाष्यकारः प्रत्यभिवदति "यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति; यदि सन्ति, नाप्रयुक्ताः। अथाप्रयुक्ता न सन्ति, सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भवानाह सन्ति शब्दा अप्रयुक्ता इति।" उपहसति च "कश्चिदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्।" तत्रोत्तरे— शास्त्रदृष्ट्या सन्ति, लोकेऽप्रयुक्तत्वादप्रयुक्ता इति न विप्रतिषिद्धम्, उपहासस्य च, नास्माभिरप्रयुक्ताः, किन्तर्हि, लोकेऽप्रयुक्ता इति। "ननु च भवानप्यभ्यन्तरो लोके? अभ्यन्तरोऽहं लोके न त्वहं लोकः।" लोको हि यथार्थावगमाय शब्दान् प्रयुङ्क्ते, न तथैव शब्दा मयाऽर्थे प्रयुक्ताः, किन्तर्हि शास्त्रेणानुविधीयमानास्तत्स्वरूपाः शब्दाः प्रयुक्ताः।

१२। अप्रयोगः प्रयोगान्यत्वात्।

एतेषां शब्दानामप्रयोगो न्याय्यो यत एषामर्थेऽन्यान् शब्दान् प्रयुञ्जते। तद्यथा ऊषेत्यस्यार्थे, क्व यूयमुषिताः, तेरेत्यस्यार्थे क्व यूयं तीर्णाः, पचेत्यस्यार्थे क्व यूयं पक्ववन्तः।

१३। अप्रयुक्ते दीर्घसत्रवत्।

यद्यप्यधुनैतेषां नास्ति प्रयोगः, पूर्वं प्रयुक्तत्वात् दीर्घसत्रवदनुशासनं कर्त्तव्यम्। न चेदिदानीं दीर्घसत्राणि सन्ति तथापि ऋषिसम्प्रदायधर्म्मपरिज्ञानाय याज्ञिकाः शास्त्रेणानुविदधते।

१४। सर्व्वे देशान्तरे।

येऽप्रयुक्तास्ते देशान्तरेषु प्रयुज्यन्ते। यदि नोपलभ्यन्ते, उपलब्धौ यत्नः कर्त्तव्यः। महान् हि शब्दस्य प्रयोगविषयः। तथा च भाष्यम् "सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्याः बहुधा भिन्नाः, एकशतमध्वर्य्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाहृच्यं, नवधा आथर्व्वणो वेदः, वाकोवाक्यमितिहासः, पुराणं, वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः।" एतावति प्रयोगविषये सत्यप्रयुक्तवचनं साहसिकतैव। अपि च एकत्रानुपलभ्यमानानामन्यत्र प्रयोगो दृश्यते। तद्यथा शव गतावित्यस्य व्यवहारः काम्बोजे, आर्य्या विकार एनं भाषन्ते शव इति। शव गतावित्यस्य

महान् हि शब्दस्य प्रयोगविषय इति। न खलु निखिलशास्त्रज्ञानेन प्रयोगाप्रयोगनिर्णयः सम्भवति। अतएव लक्षणानुगतानां प्रयोगोऽस्तीति परिगणनाशक्तैरनुमेयम्। एवं यवन्त्यादीनामपि सिद्धिरिति चेन्न हि वर्त्तिरन्तिपरः प्रयुज्यत इति परिगीतव्यवहार एव तद्विषये भवेत्। वाकोवाक्यमिति। "वाकोवाक्यशब्देनोक्तिप्रत्युक्तिरूपो ग्रन्थ उच्यते। यथा 'किं स्विदावपनं महत्? भूमिरावपनं महत्।' पूर्व्वचरितसंकीर्त्तनमितिहासः। वंशाद्यनुकीर्त्तनं पुराणम्"मिति कैयटः। उदाहृताप्रयुक्तेषु ऊष चक्र एतदुभयस्य प्रयोगो भाष्यकृता प्रदर्शितः न तु तेर पचेत्युभयस्य। पदद्वयमेतत् "महान् हि शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती"त्यादि भाष्यग्रन्थस्य विषयः।

सुराष्ट्रेषु, रंहि गतावित्यस्य प्राच्यमध्येषु, गमन्तु गतावित्यस्य त्वार्य्यावर्त्तेषु। ये त्वप्रयुक्ता-त्वेन प्रदर्शितास्तेऽपि वेदे दृश्यन्ते, तद्यथा "सप्तास्मे रेवती रेवदूष" (४म. ५१सू. ४ऋक्) "यद्दो रेवती रेवत्यां तमूष" "यन्मे नरः श्रुत्यं ब्रह्म चक्र" "यत्रानश्चक्राजरसं तनूनाम्" "भूरि चक्र मरुतः पित्र्याण्युक्थानि" (७म. ५६सू. २३ऋक्)।

किं पुनः शब्दज्ञाने धर्म्मः, आहोस्वित् प्रयोगे?

१५। ज्ञाने धर्म्म इति चेत्तथाधर्म्मः।

यो हि शब्दान् जानाति, सोऽपशब्दानपि जानाति। अतो यथा तस्य शब्दज्ञाने धर्म्मः, तथापशब्दज्ञानेऽधर्म्मः। अथवा भूयानधर्म्मः, यत एकैकस्य शब्दस्य बहवोऽपभ्रंशाः।

१६। आचारे नियमः।

प्रयोगेऽस्य वेदप्रवक्ता ऋषिर्नियमं वेदयते "तेऽसुरा हेऽलयो हेऽलय इति कुर्व्वन्तः पराबभूवु"रिति।

अस्तु तर्हि प्रयोगे।

१७। प्रयोगे सर्व्वलोकस्य।

यदि प्रयोगे धर्म्मः सर्व्वेषां लोकानामभ्युदयो भवति, प्रयत्नवैयर्थ्यं स्यात्।

दृश्यते च लोके कृतप्रयत्नाश्चाप्रवीणा अकृतप्रयत्नाश्च प्रवीणाः। कुतस्ततो यत्नेनैव फलातिरेकः? अतो नापि ज्ञाने, नापि प्रयोगे। किन्तर्हि,

१८। शास्त्रपूर्व्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन।

यो हि शास्त्रपूर्व्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। "योऽग्निष्टोमेन

किमिति। "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गलोके कामधुग्भवती"ति श्रुतौ सम्यग्ज्ञानं सुप्रयोग इत्युभयं दृश्यते, तत् किं ज्ञानात् स्वर्गलोके कामधुग्भवत्यथवा प्रयोगादिति प्रश्नः;—"किं पुनः शब्दज्ञाने धर्म्मः आहोस्वित् प्रयोग" इति।

यजते । य उ चैनमेवं वेद ।" इत्यादिषु वेदशब्देषु यथा ज्ञानपूर्व्वकानुष्ठानस्याभ्युदयकारित्वमभिधीयते तथात्रापि प्रकृत्यादिविभागपूर्व्वकप्रयोगस्य । अथवा वेदशब्दा यथा नियमपूर्व्वकमधीताः फलवन्तो भवन्ति तथा शास्त्रपूर्व्वके प्रयोगेऽभ्युदयः । तथा च वार्त्तिकम् ।

१९ । तत्र ज्ञानपूर्व्वके प्रयोगे धर्म्मः । * ।

सिद्धान्तपक्षे ज्ञान एव धर्म्म इत्यत्र तथाधर्म्म इति दोषापत्तिः । तत्राह "शब्दप्रमाणका वयं, यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्च शब्दज्ञाने धर्म्ममाह नापशब्दज्ञाने अधर्म्ममाह ।" ये चाशिष्टाः शब्दा न प्रतिषिद्धाः, न तेषां प्रयोगे दोषो वाभ्युदयो वा । यथा हि किकतादीनि न दोषायाभ्युदयाय वा । उपायस्वरूपेणापशब्देन शब्दज्ञानञ्च भवति । अतः शब्दज्ञाने धर्म्म इत्यस्यार्थतोऽपशब्दज्ञानपूर्व्वकशब्दज्ञाने धर्म्म इत्यायाति । यदि वापशब्दज्ञानेऽधर्म्मसञ्चारस्तथापि शब्दज्ञाने यो धर्म्मो भवति तेन च तस्यापनयः, यथा कूपखानकस्य कर्द्दमलिप्तं शरीरं तदुत्थापितजलेन विगतमलं भवति । न केवलं तेन दोषापनयो भूयसा चाभ्युदयेन योगः । यदुक्तं "आचारे नियम" इति ; स तु नियमो यज्ञकर्म्मणि तदन्यत्रानियमः । यतो यर्व्वाणस्तर्व्वाणो नाम ऋषयो योगजनितप्रत्यक्षज्ञानसम्पन्ना अपि यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्व्वाणस्तर्व्वाण इति प्रायुञ्जत, यज्ञकर्म्मणि तु न पुनरपाभाषन्त ।

य उ चैनमिति । "य उ चैनमेवं वेद"इत्यत्र वेदशब्देन ज्ञानपूर्व्वकानुष्ठानं प्रदर्श्यते, समासस्तु वेदः शब्दो यस्यार्थस्य स वेदशब्दः । न तेषां प्रयोगे दोषो वाभ्युदयो वेत्यत्र टिघुभादयो व्याकरणोक्ता लाघवेनार्थबोधार्थं प्रयुक्ताः संज्ञा अपि ग्राह्याः । ते हि नापभ्रष्टाः शक्तिवैकल्य-प्रमादादिजन्यान्यथोच्चारणाभावात् ।

कूपखानकस्येति । कूपं खनतीति विग्रहे कर्म्मण्यण् प्राप्नोति । तत्र वाऽसरूप- (३।१।९४) इति न्यायेनासमानरूपो ण्वुल् कृतः । अतो नित्यसमासत्वाभावात् कूपस्य खानक इति स्वपदविग्रहः । "शिल्पिनि ष्वुन्" (३।१।१४५) इति समानरूपः प्रत्ययोऽत्र न ण्वुलो बाधकः खननकर्तृत्वव्यतिरिक्तशिल्पित्वस्यात्राविवक्षितत्वात् ।

व्याकरणमित्यस्य शब्दस्य कः पदार्थः ? सूत्रम् ।

२० । सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ।

सूत्रे व्याकरणे व्याकरणस्य सूत्रमिति षष्ठ्यर्थो नोपपन्नो भवति । सूत्रादन्यद्व्याकरण-मतो व्याकरणस्य सूत्रमिति प्रयोगः ।

२१ । शब्दाप्रतिपत्तिः ।

व्याकरणात् शब्दाः प्रतिपद्यन्ते । न हि व्याख्यानरहितात् सूत्रात् शब्दप्रतिपादनं सम्भवति । व्याख्यानन्तु न केवलं सूत्राणां पदविभागः, किन्तर्हि उदाहरण-प्रत्युदा-हरण-वाक्याध्याहार-समवायः । एवं तर्हि, शब्दः ।

२२ । शब्दे ल्युडर्थः ।

शब्दे व्याकरणे ल्युडर्थो न प्रतिपन्नो भवति । व्याक्रियन्ते शब्दा अनेनेति व्याकर-णम् । न हि शब्देन किञ्चिद्व्याक्रियते किन्तु सूत्रेण ।

२३ । भवे ।

भवार्थे च तद्धितप्रत्ययो न प्रतिपन्नो भवति । न हि शब्दे भवः, किन्तु व्याकरणे भवो योगो वैयाकरण इति । योगस्तु सूत्र एव दृश्यते ।

२४ । प्रोक्तादयश्च तद्धिताः ।

पाणिनिना प्रोक्तं पाणिनीयमित्यादिषु प्रोक्ताद्यर्थास्तद्धिताश्च नोपपन्ना भवन्ति । पाणिन्यादिभिराचार्य्यैर्न शब्दाः प्रोक्ताः, किन्तर्हि, सूत्रम् ।

सूत्र इति । सूत्रं व्याकरणमित्युभयं यद्यष्टाध्यायाः प्रतिपादकं भवति तदाप्रति-पत्तिः । व्याकरणंसूत्रमित्यनेन यदि सामान्यविशेषप्रदर्शनविवक्षा तदा भवत्येव । व्याकरणशब्देन तदाष्टाध्यायी, सूत्रशब्देन तदेकदेशः ।

ल्युडर्थ इति । करणे ल्युट् । व्याक्रियन्ते शब्दा अनेनेत्यत्र शब्दस्य व्याक्रियमाण-त्वात् कर्मत्वं न तु करणत्वम् ।

प्रोक्तादय इत्युक्ते भवेऽपि स्यात् । कथं भवे प्रोक्तादयश्चेत्युभयमुक्तम् । पुरस्तादाचार्य्येण दृष्टं भवे च तद्धित इति तत्पठितम् । तत उत्तरकालं दृष्टं प्रोक्तादयश्च तद्धिता इति तदपि पठितम् ।

२५ । न चेदानीमाचार्य्याः सूत्राणि कृत्वा निवर्त्तयन्ति ।*।

अथ दोषपरिहारः । यदुक्तं "शब्दे ल्युडर्थे" इति न हि केवलं करणाधिकरणयोर्ल्युड् भवति, "कृत्यल्युटो बहुलम्"(३।३।११३) मित्यनेन अन्येष्वपि कारकेषु, तद्यथा प्रपतनं, प्रस्कन्दनम् । अथवा शब्दैरपि शब्दाः व्याक्रियन्ते, तद्यथा गौरित्युक्ते सर्व्वे सन्देहा निवर्त्तन्ते नाश्वो न गर्द्दभ इति । भवे प्रोक्तादयश्च तद्धिता इति तावद्दोषः । एवं तर्हि,

---

प्रोक्तादय इति । आदिपदेन भवग्रहणसम्भावनामुत्पश्यन्नाह कथमुभय विन्यस्तम् ।

न चेदानीमिति । सूत्रकृता "तत्र भव" (४।३।५३) इति प्रथमं "तेन प्रोक्तम्" (४।३।१०१) इत्यादयस्तत्पश्चादुपन्यस्ताः । तदेवोपलक्ष्य भवे प्रोक्तादयश्चेत्युक्तम्, न तु नूतनं सूत्रं विरच्य तानि सूत्राणि निवर्त्तितानि । 'न चेदानीमाचार्य्याः' इत्यादि वार्त्तिककृता धीमता कात्यायनेनोक्तम् । तत्रेदमभिप्रेतम्, यद्यप्यत्र बहूनि वार्त्तिकानि निबद्धानि, तथापि न तैः सूत्राणि निवर्त्त्य लक्षणान्तरविधानम्, सूत्रतात्पर्य्यग्रहणेनैव लक्षणप्रपञ्चनम् । सूत्रे बहुलग्रहणादिभिस्तदनुमोदितञ्च । अतएवोक्तम् "सूत्रेष्वपि हि तत्सर्व्वं यद्दृष्टं यच्च वार्त्तिके ।"

प्रपतनमिति । प्रपतत्यस्मादिति प्रपतनं प्रस्कन्दत्यस्मादिति प्रस्कन्दनम् । "भीमादयोऽपादाने" (३।४।७४) इत्ययं "कृत्यल्युटो बहुल"(३।३।११३)मित्यस्य प्रपञ्चः ।

शब्दैरपीति । सास्नालाङ्गूलादिमन्तं कञ्चिदभिलक्ष्य अयं गौरित्युक्ते तच्छब्दस्यान्यत्र वाचकता निवर्त्तते, तेनैव च शब्दान्तराणां प्रतीतिः संजायते यथा गौरन्योऽश्वो गर्द्दभ इति ।

२६। लक्ष्यलक्षणे व्याकरणम्।

लक्ष्यः शब्दः, लक्षणं सूत्रं, लक्ष्यलक्षणसमुदितं व्याकरणम्।

एवं सति, समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपन्नो भवति। दृश्यते चावयवभूतानि सूत्राण्यधीत्य वैयाकरणो भवति। नैष दोषः, समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तन्ते, तद्यथा पूर्व्वे पाञ्चालाः, घृतं भुक्तम्, शुक्लः। एवं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवभूते सूत्रेऽपि वर्त्तते।

अथवा पुनः पक्षान्तरेऽस्तु सूत्रम्। अत्र षष्ठ्यर्थानुपपत्तिपरिहारस्तु व्यपदेशिवद्भावेन भवति। शब्दाप्रतिपत्तिपरिहारस्तु व्याख्यानार्थमुदाहरणादिसमवायोऽज्ञानां बोधनाय न तु ज्ञानवताम्, एषान्तु सूत्रपदच्छेदमात्रेणैव। न हि कदाचिदुत्सूत्रेण तत्परिग्रहो भवति।

पूर्व्वे पाञ्चाला इति। जनपदान्तरनिवृत्तिविवक्षायां पूर्व्वे पाञ्चाला इति न तु समुदायपूर्व्वपाञ्चालविवक्षायाम्। अत एकदेशस्यात्र समुदायरूपेण प्रयोगः। घृतमिति। न हि कृत्स्नमौषधसंस्कृतं घृतमुपयुक्तं किन्तु कियत्परिमाणमिति। शुक्ल इति। न हि शुक्ल इत्युक्ते नयनतारकादिसर्व्वावयवस्य शुक्लत्वं गम्यते।

व्यपदेशिवदिति। एकस्मिन्नपि वस्तुनि शब्दार्थभेदाद्भेदव्यवहारो व्यपदेशिवद्भावः। तद्यथा राहोः शिरः। राहौ शिरसाऽभिन्नेऽपि राहुः शिर इति शब्दार्थभेदाद् भेदग्रहणेनोक्तं राहोः शिर इति।

न हि कदाचिदिति। अत्र भाष्ये "आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत।" आत इति निपातः, अतश्च हेतोः। सूत्रत एव शब्दप्रतिपत्तिः सूत्रमुल्लङ्घ्य किञ्चित् कथनं न तत्प्रतिपत्तये भवति। न अदः नादः नैतत्, अथवा नादः अर्थविरहितत्वात् घोषमात्रमित्यर्थः। इममेवाश्रित्य दीक्षित आह "अतएव ह्युत्सूत्रमुच्यमानमप्युपेक्षते। यत्रैव सूत्रस्य तात्पर्य्यलेशोऽप्यस्ति तदेव गृह्यते।"

अथ किमर्थो वर्णानामुपदेशः ?

२७। वृत्तिसमवायार्थ [उपदेशः] ।*।

वृत्तिः शास्त्रप्रवृत्तिः। समवायः वर्णानामानुपूर्व्येण सन्निवेशः। उपदेश उच्चारणम्। शास्त्रप्रवृत्त्यर्थो वर्णानां क्रमेण निवेशः। तादृशनिवेशार्थं पुनस्तेषामुच्चारणम्। न विनोच्चारणमुपदेशः सम्भवति।

२८। अनुबन्धकरणार्थश्च ।*।

अनुबन्धानासङ्क्तुं वर्णानामुपदेशः कर्त्तव्यः। वर्णानामानुपूर्व्यसन्निवेशोऽनुबन्धकरणश्च प्रत्याहारार्थम्। प्रत्याहारः शास्त्रप्रवृत्त्यर्थः। अतएव,

२९। वर्णानामुपदेशः शास्त्रप्रवृत्तिफलको वर्णानां क्रमेण निवेशो वृत्तिसमवायः ।*।

इममेवार्थं वृत्तिकारः संक्षेपेणाह 'अथ किमर्थो वर्णानामुपदेशः ? प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः।"

वृत्तिसमवायार्थ इति। लाघवेन शास्त्रप्रवृत्त्यर्थः। धर्मनियमवत्समारः। तद्यथा वृत्तये समवायो वृत्तिसमवायः, वृत्त्यर्थो वा समवायः वृत्तिसमवायः, वृत्तिप्रयोजनो वा समवायः वृत्तिसमवायः। अत्र समासे वृत्त्यर्थं इति समवायस्य शास्त्रप्रवृत्तेः प्रत्यासन्नत्वं ; वृत्तिप्रयोजन इति पारम्पर्य्येणास्य शास्त्रप्रवृत्तावङ्गत्वं दर्शयति। तद्यथा वर्णानां सन्निवेशवशात् "इग्यणः सम्प्रसारणम्"(१।१।४५)मित्यादौ "यथासंख्यमनुदेशः समानाम्"-(१।३।१०)मिति यथासंख्यशास्त्रस्य साक्षात्प्रवृत्तिर्भवति। तथाच पारम्पर्य्येण "हलन्त्यम्"-(१।३।३)मिति इत्संज्ञा, ततः 'आदिरन्त्येन सहेता" (१।१।७१) इति, ततः "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (६।३।१११) इत्यादि शास्त्रप्रवृत्तिः।

प्रत्याहार इति। अणादिसंज्ञाः प्रत्याहारशब्देनोच्यन्ते। प्रत्याह्रियन्ते वर्णा एभिरिति प्रत्याहारः।

३० । दृष्टबुद्ध्यर्थश्च ।

दृष्टान् वर्णान् बोद्धुं तेषामुपदेशः ।

३१ । दृष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ।

दृष्टान् वर्णान् बोद्धुं चेदुपदेश उदात्तादीनामप्युपदेशः कर्त्तव्यः । यत एवंगुणा अपि वर्णा दृष्टाः ।

३२ । आकृत्युपदेशात् सिद्धम् ।

अवर्णाद्याकृत्युपदेशेन तत्तद्गुणयुक्तानां निखिलानां ग्रहणं भविष्यतीति सिद्धत्वात्तेषां न स्वतन्त्रोपदेशः ।

३३ । आकृत्युपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ।

अवर्णाद्याकृत्युपदेशेन यदि सिद्धं भवति तदा तेनोपस्थितानां संवृतादीनां दोषाणां प्रतिषेधः कर्त्तव्यः । संवृतादयो यथा—संवृतः, कलः, ध्मातः, एणीकृतः, अम्बूकृतः,

---

दृष्टानिति । दृष्टान् कलादिदोषविरहितान् । दोषा वक्ष्यन्ते ।

उदात्तादिस्वराणामभेदोच्चारणरूपयैकश्रुत्या सूत्राणां पाठात् तेषामुपदेशः कर्त्तव्य इत्याह "दृष्टबुद्ध्यर्थश्चेति चे"दित्यादि ।

अवर्णादीति । उपदिष्टा अकारादिवर्णा विशेषा अपि न तन्निष्ठानां गुणानां तिरोधायकाः, अतो जातिप्राधान्येन विवक्षा न प्रतिहता । तेन जातित्वेन ग्रहणात् अवर्णाकृतिः सर्व्वमवर्णकुलम्, इवर्णाकृतिः सर्व्वमिवर्णकुलम्, उवर्णाकृतिः सर्व्वमुवर्णकुलं ग्रहीष्यतीति न पृथगुपदेशः ।

संवृत इति । अकारस्य संवृतत्वान्न तदुच्चारणे संवृतत्वं दोषाय । एकारादिषु सन्ध्यक्षरेषु संवृतोच्चारणं दोषाय तेषां विवृततमत्वात् । कलः स्थानभ्रष्टत्वेनोच्चारणम्, अयं

अर्द्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, क्ष्विण्णः, रोमश इति। अपर आह

ग्रस्तं निरस्तमविलम्बितं निर्हत-
मम्बूकृतं ध्मातमथो विकम्पितम्।
सन्दष्टमेणीकृतमर्द्धकं द्रुतं
विकीर्णमेताः स्वरदोषभावनाः॥

अतोऽन्ये व्यञ्जनदोषाः।

नैष दोषः। गर्गादि-विदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति। तेषां पाठेऽन्यत् प्रयोजनमस्ति। किम्? गर्गादीनां गार्ग्यादीनाञ्च समुदायानां साधुत्वं यथा स्यात्।

एवं तर्हि शास्त्रान्ते कलादिदोषशून्यामष्टादशधा भिन्नामकारस्य प्रत्यापत्तिं वक्ष्यामि। सा तर्हि वक्तव्या।

काकलीत्वेन प्रसिद्धः। ध्मातः श्वासभूयिष्ठतया ह्रस्वानामपि दीर्घत्वेन प्रतीतिः। एणीकृतः अविशिष्टत्वेनोच्चारणं यथोच्चारितवर्णोऽवर्ण ओवर्णो वेति सन्देहः। अम्बूकृतः व्यक्तोच्चारितोऽपि मुखाभ्यन्तरावस्थित इव श्रूयमाणः। अर्द्धकः दीर्घोऽपि ह्रस्ववत् कालसङ्कोचेनोच्चार्यमाणः। ग्रस्तः जिह्वामूले निगृहीतः, अतोऽस्याव्यक्त इत्यपरा [illegible]ज्ञा। प्रगीतः सामवदुच्चारितः। उपगीतः समीपवर्त्तिवर्णान्तरगीत्यानुरक्तः। [illegible]ः कम्पमान इव। रोमशः गम्भीरः। अविलम्बितः वर्णान्तरैरसंभिन्नः। निर्हतो रूक्षः। सन्दष्टः वर्द्धित इव। विकीर्णः वर्णान्तरे प्रसृतः, एकोऽप्यनेकनिर्भासी वा। स्वरदोषभावनाः स्वरदोषाणां गोचोल्लेखः, अशक्तिप्रमादकृता बहवोऽन्ये सन्तीति भावः।

गर्गादीति। शास्त्रे यद्यपि गर्गादि-विदादिपाठः प्रत्ययविध्यर्थस्तथापि प्रसङ्गतः समुदायानां साधुत्वमपि भवति।

शास्त्रान्त इति। शास्त्रान्ते "अ अ" (८।४।६८) इति सूत्रेण कार्य्यार्थं विवृतत्वेन गृहीतस्याकारस्य संवृतत्वे प्रत्यापत्तिः। तत्र कलादिकानामपि भविष्यति।

सा तर्हि वक्तव्येति। शास्त्रान्ते "अ अ" इत्यनेनाकारस्यैव प्रत्यापत्तिर्भविष्यति नान्येषाम्, अतोऽन्येषामपि प्रत्यापत्तिर्वक्तव्येत्यर्थः।

३४। लिङ्गार्था तु प्रत्यापत्तिः।

सा प्रत्यापत्तिर्लिङ्गार्था भविष्यति।

तर्हि वक्तव्यं, यद्यप्येतदुच्यते।

अथवा कलादिका अनुबन्धत्वेन ग्राह्याः। तेनानुबन्धशतानामुच्चारणगौरवं न भवति, इत्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः। सिद्धात्येवम्, अपाणिनीयत्तु भवति।

भवतु तावत् "आकृत्युपदेशात् सिद्ध"मिति। कथं दोषपरिहारः? संवृतादीनां निवृत्तिस्तु गर्गादिपाठादेव भविष्यति। तत्र समुदायानां साधुत्वमिति प्रयोजनेऽपि कलादिनिवृत्तिरपि भविष्यति। कथं पुनरुभयमेकेन यत्नेन सेत्स्यति? एकोऽपि हेतुः प्रयोजनद्वयं साधयति, एकमपि वाक्यं वाक्यद्वयनिष्ठं भवति। यथाद्ये "आम्राश्च

लिङ्गार्थेति। अकारस्य प्रत्यापत्तिनिदर्शनार्थम्। अतोऽन्येषामपि तन्निदर्शनेनैव सा सिद्ध्यति।

तर्हीति। अवर्णस्य प्रत्यापत्तिर्लिङ्गार्थेत्युक्तेऽपि तत् सुस्पष्टं तत्र वक्तव्यमन्यथा विवृतग्रहणस्यैव प्रयोजनं दृष्ट्वा तस्यैव निवृत्त्यर्थमियं प्रत्यापत्तिरिति परिग्रहो भविष्यति, न पुनः कलादीनाम्।

अथवेति। आकृत्युपदेशे निखिलकलादिग्रहणं भवति सत्यम्, किन्तु न तद्दोषाय, प्रत्युत लाघवाय। धात्वादिषु सर्वत्र कलादिग्रहणमेव भविष्यति। शीङ्धातोर्ङकारं परिहाय इकारं कलं पठिष्यति। "ङित आत्मनेपद"मित्यस्य स्थाने कलादात्मनेपदमिति करिष्यते। एवं सर्वत्र। कलादयस्तु प्रक्रियादशायां स्युर्न तु प्रयोगे। शास्त्रान्ते प्रत्यापत्तिर्निखिलशास्त्रीयकार्यं प्रति तेषामसिद्धत्वप्रदर्शनाय, सुतरां परिनिष्ठितेषु न तेषां स्थितिः।

सिद्धात्येवमिति। अनुबन्धशतकरणादिगौरवपरिहारफलत्वेऽपि पाणिनिना न तत् कृतमिति न तदत्र ग्राह्यम्।

सिक्ताः, पितरश्च प्रीणिताः।" द्वितीये "श्वेतो धावति" "अलम्बुसानां याता।"

अथवा आगमादयः सर्व्वे गृह्यन्ते: प्रत्यन्ते। ये च प्रातिपदिका न पठितास्तेऽपि प्रयः षष्ठः, पलाशः पलाशो मा भूदिति स्वरवर्णानुपूर्व्वीज्ञानार्थमुपदेष्टव्याः। सुतरां न कुत्रचित् कलादीनामवकाश इत्यदोषः।

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।
उच्चार्य्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः॥

इति श्रीभाष्यसङ्गमन्यां प्रथमस्याध्यायस्य
प्रथमे पादे प्रथमाह्निकम्।

श्वेत इति। श्वेतो धावति। को धावति? श्वा इतो धावति। अलम्बुसानां याता। कः समर्थः। वृषः पलालवर्णो जनः*।

ये चेति। अपठितानामुणादिसूत्रात् पृषोदरादिसूत्राद्वा साधुत्वमतोऽत्र सर्व्वेषां संग्रहः, विशेषावधारणन्तु निघण्ट्वादिना भवति। एवं कलादिनिवृत्तिः प्रतिपदपाठेन सम्भवति, विशेषज्ञानन्तु शिक्षादिग्रन्थात्लभ्यम्। इह कलादिनिवृत्तिविषयको विचार आनुषङ्गिकः, वर्णोपदेशः पुनर्मुख्यत्वेन प्रत्याहारनिष्पत्त्यर्थः। "आदिरन्त्येन सहेते"ति ग्रहणकशास्त्रेण सिद्धाः संज्ञाः प्रत्याहारवाच्याः। न च तत्रस्थानामेकैकवर्णानां तत्-संज्ञाः प्रत्येतव्याः, तासां संज्ञानां प्रत्याहृतवर्णसमष्टिबोधनाय योगरूढित्वात्।

वाणीं परेशस्य हृदा बिभर्त्तुं
भान्तिस्तु यासौघ्नु मनेति सन्तः।
अर्हन्ति तां वस्तुमहो कुतो वा
तस्याः प्रकाशोऽपगतापनिम्नः॥

इति श्रीभाष्यसङ्गमन्यनुव्याख्यायां तत्त्वसङ्कलन्यां प्रथमाध्यायस्य
प्रथमे पादे प्रथमाह्निकम्।

---

* कोऽसौ गन्तुम्? वृषाणां पलालवर्णानामेक इति।

द्वितीयोऽध्यायः ।

---:---

अ इ उ ण् । १ ।

म. द. । अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन "उरण्

अ इ उ ण् इति । स्वरूपाणामनुकार्य्याणां वाकारादीनामर्थवत्त्वेऽपि तदविवक्षितत्वान्नेह विभक्त्युत्पत्तिः । "छन्दोवत्सूत्राणी"ति भाष्योक्त्या "सुपां सुलुक्" (७।१।३९) इति विभक्तिर्लुग्वा । अः इ इत्यत्र रुत्व-यत्व-यलोप-सन्ध्यभावेन इ उ ऋ इत्यत्र प्रकृतिभावेन स्वरूपावस्थितिसम्भवेऽपि एदैतोरयायौ दुर्निवारौ । "सन्धिस्तु न प्रवर्त्तते वर्णोपदेशकालेऽणादिसंज्ञानामनिष्पादादि"ति कैयटोक्तिर्दीक्षितेन नातिमन्यते । तथा सति येन यत्र सूत्रे यद् यद् विधीयमानं तत्तत् तत्र तत्र सूत्रे न प्राप्नोति । यथा "तुल्यास्यप्रयत्नं सवर्णम्"(१।१।९)मित्यत्र 'तुल्यास्ये'ति सवर्णदीर्घो न भवति सवर्णत्वमनेनैव विधानात् । एवमन्यत्र । सूत्रान्तरैरणादिसंज्ञानां प्रकारान्तरताप्राप्तौ तदपि ग्रहणकशास्त्रे (१।१।६९) प्रवर्त्ततेति चेत्, न, अणादिसंज्ञया बोध्यमानानां प्रकारान्तरता तत्तुल्या, न त्वणादिसंज्ञायाः । तद्यथा "अचोऽप्रगृह्यस्य"(८।४।५७)त्यादौ अच्संज्ञयोपस्थितेषु वर्णेषु प्रगृह्यसंज्ञकावीदूता(१।१।११)वेव वर्जनीयौ भवतः, न तु दीर्घाणामनण्त्वम् । अच्छब्दो हि "आदिरन्त्येन"(१।१।७१)त्यनेनाक्षरसमाम्नायपठितेषु सङ्केतितः । सङ्केतितानां बोधानन्तरमेव तेषामन्यत्र प्रतिपत्तिः प्रकारान्तरता वा । न हि पदबोधं विना वाक्यबोधः सम्भवति । अचेति पदबोधं विना "अचोऽप्रगृह्यस्ये"त्यादेर्वाक्यस्य बोधो दुर्लभ एव । इह सूत्रे स्वरसन्धेरप्रवर्त्तनं "संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥" इति प्राचीनपरिभाषया । एकपद इत्यनेन समासपदस्य सिद्धे पुनस्तत्कथनं गोबलीवर्दन्यायेन । कार्य्ये विसन्धिर्दोषायापि न श्रुतसंस्कृतिः । चादिषु निपातेष्वकारादीनां पाठात् "निपात एकाजि"(१।१।१४)त्यनेन प्रगृह्यत्वम्, ततः प्रकृतिभाव इति केषाञ्चिन्मतम् । एत-

रपर" (१।१।५१) इत्यकारेण । इत्थमवर्णं प्रयोगे संवृतं, दीर्घप्लुतयोस्तु विवृतत्वम् । तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते । तस्य प्रयोगार्थं "अ अ" (८।४।६८) इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते ।

१। अकारस्य विवृतोपदेश आकारग्रहणार्थः ।

भा. सू. सवर्णग्रहणेऽकारेणाऽऽकारग्रहणार्थमकारस्य संवृतस्य विवृतोपदेशः

न्यते निपातानिपाताकारादिषु निपातग्रहणं तुल्यप्राभावेन स्वरूपावस्थानसिद्धये, व्यक्ति-सामान्यान्निपातैरनिपातानान्तु ग्रहणम् । अकारादिषु न कारप्रत्ययः, "वर्णात् कारः । * ।" इत्यत्र "रोगाख्यायां ण्वुल् बहुलम्" (३।३।१०८) इत्यतो बहुलग्रहणादथवा "इक् श्तिपौ धातुनिर्देशे इति वक्तव्यम् । * ।" इत्यतो निर्देशशब्दानुवर्त्तनेन । निर्देशो हि कुत्रचिदवस्थितानां भवति । इह त्वकारादीनामानुपूर्व्वीनिवेशमात्रम् । अथवाऽर्थस्याविवक्षया वर्णवाचकत्वाभावान्न कारप्रत्ययः ।

विवृतोपदेश इति । "स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् । तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥" इति पाणिनीयशिक्षामतेन स्वराणां विवृतत्वम् ; मतान्तरे तु, अकारः संवृतः, विवृतकरणाः स्वराः, तेभ्य ए ओ विवृततरौ, ताभ्यामै औ, ताभ्यामप्याकार इति । इदं मतान्तरमाश्रित्य कैश्चिद्विवृतोपदेश इत्यत्र प्रकृततरोऽपि ग्राह्य इति युक्त्या विवृतशब्दस्य विवृततरत्वं साधितम् । न खलु वक्तव्यम् विवृतसामान्यात् विवृतविवृततरयोः साम्यम् । तथा सति "विवृतमूष्मणा"मित्यत्रैव न "स्पृष्टमक्षराणा"मित्यत्र ईषदनुवर्त्त्यौष्मणामीषद्विवृतत्वेन विवृतेभ्योऽज्भ्यस्तेषामसावर्ण्यं सिद्धमिति भाष्यसिद्धान्तो व्याकुप्येत । अनेन नयेन भाष्यकृता नाज्झला(१।१।१०)विति सूत्रं प्रतिविहितम् । वस्तुतस्तु ईषद्विवृत-विवृत-विवृततराणां सामान्येन ग्रहणं कृत्वा सूत्रकृता नाज्झलाविति सूत्रं प्रवर्त्तितम् । अस्मिन् पक्षे एङैचोस्तु वर्णसमाम्नाये पृथङ्निर्देशसामर्थ्यान्न सावर्ण्यम् ।

कर्त्तव्यः । "तुल्यास्यप्रयत्नं सवर्णम्"(१।१।९)मित्यत्रास्यग्रहणेन विवारभेदस्य ग्रहणं न त्वास्याद्बाह्यस्य कालभेदस्य । सूत्रकृतोपदिश्यमानस्य विवृतस्याणेन वार्त्तिकेन प्रयोजनं प्रदर्श्यते ।

"अ अ" (८।४।६८) इत्यनेन विवृतस्य या संवृततापत्त्यापत्तिस्तस्याः प्रयोजनान्तरमस्ति । किम् ? 'अतिखट्वः', 'अतिमालः' इत्यत्रागत्यर्थतो विवृतस्याऽऽकारस्य स्थाने जायमानस्याऽकारस्य विवृतत्वं प्राप्नोति तदनया प्रत्यापत्त्यायं संवृतः स्यादिति प्रतिपादयति । न लोके न वा वेदेऽकारो विवृतोऽस्तीत्यतः प्रत्यापत्तिवचनं ज्ञापकमेव विवृतस्योपदिश्यमानस्य ।

२ । तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः ।

तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्र धातुप्रातिपदिकप्रत्ययनिपातस्थस्यापि विवृतोपदेशः कर्त्तव्यः । किं प्रयोजनं ? सवर्णग्रहणार्थः ।

"अकः सवर्णे दीर्घः" (६।१।१००) इति सूत्रकरणेन आचार्यप्रवृत्त्या भवति हि आच-

---

विवारेति । विवारयति विकासयति आस्यमिति विवारः प्रयत्नः ।

आस्याद्बाह्यस्येति । वर्णानां प्रयत्ननिष्पन्नमात्रादिकृतो भेदो निमेषादिक्रियाभेदजनितः, सोऽपि वक्तृचारणवैचित्र्याद्विचित्र इति प्रयत्नाद्बाह्यम् ।

अतिखट्व इति । विवृतोपदेशं विनाऽकाराकारयोः सावर्ण्याभावादप्रत्यासिद्धौ न स्यादकार इति चेत्, न, "ऊदोचामात: स्थान" (७।३।४६) इति ज्ञापकेन आदेशाकारस्य ह्रस्वत्वम् ।

यदि केवलमक्षरसमाम्नायस्थ एवाऽकारो विवृत उपदिश्यते तदा धात्वादिस्थाकारस्याविवृतत्वान्न प्रक्रिया सिद्ध्येदत आह तस्य संवृतोपदेशस्यान्यत्रापीति ।

अक इति । अक इति कथनेनात्र अकारेण चिह्नेन प्रत्याहारस्थो विवृतोनिर्दिष्टः । यदि धात्वादिस्थाकारस्य संवृतस्य विवृतत्वेन ग्रहणं न स्यात्तदा "अकः सवर्णे दीर्घः"

क्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणम्, अन्यथा 'दण्डाग्रम्' 'क्षमाग्रे'त्यत्र सवर्णदीर्घो न स्यात्। न ह्यत्र द्वयोराक्षरसमाम्नायिकयोर्युगपद्दर्शनमस्ति। नैतज्ज्ञापकम्। आक्षरसमाम्नायिकेन यस्य ग्रहणमस्ति तदर्थमेतत्सूत्रकरणम्। यथा 'खट्वाढकम्,' 'मालाढकम्'। अत एतेनाभ्युपायेन यथा सर्वेषामुपदेशः स्यात् तत् कर्त्तव्यम्। तथा-हवक्तव्यं धात्वादिस्थश्च विवृत इति।

३। दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः।

दीर्घप्लुतौ संवृतौ मा भूतामिति तन्निवृत्तये विवृतोपदेशः कर्त्तव्यः। नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः। किन्तर्हि, विवृतौ। अतो विवृतावेव तौ भविष्यतः।

स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्।
संवृतः स्थानी संवृतौ दीर्घप्लुतौ प्रकल्पयेत्॥

यथानुस्वारो यथा यणमनुनासिकं कल्पयेत् तथा स्थानी संवृतः दीर्घप्लुतौ संवृतौ प्रकल्पयेत्। न स्यात्। कथम्? यणोऽनुनासिका निरनुनासिकाः सन्ति, ततोऽनुनासिका भवन्ति। न पुनर्दीर्घप्लुतौ संवृतौ स्तः, अतो न तौ संवृतौ भवेताम्। एव-

---

इति नोक्ता "इकः सवर्णे दीर्घ" इत्येव ब्रूयात्। दण्डाग्रमित्यत्र यद्यप्येकोऽप्याक्षरसमाम्नायिको विवृतो न विद्यते, तथापि द्वयोरितिकथनमेकादेशस्य द्व्यधिष्ठानत्वात्।

नैतदिति। अक इत्यकारेण विवृतेन दीर्घस्य विवृतस्य ग्रहणं भवति, अतो नैतज्ज्ञापकमित्यर्थः।

अत एतेनेति। प्रतिपदपाठस्याशक्यत्वाद्यथा ग्रहणप्रातिपदिकार्थं विवृतोपदेशे यत्नः कर्त्तव्यः, तथा धात्वादिस्थस्यापि। अन्यथा धात्वादिस्थस्याकारस्य दीर्घरूपविवृतोच्चारणेन प्रत्यक्षकरणं गौरवं स्यात्।

नैव लोक इति। असति दीर्घप्लुतयोः संवृतत्वे सावर्ण्याभावात् संवृतस्याकारस्य

नपि ईकार ऊकारश्च क्वचित् संवृतत्वेन परिगृह्यीत: । अकारस्य विवृतस्याप्रतिज्ञाने तस्यैकारौकारौ संवृतौ भवत: । न भवति, तुल्यप्रयत्नत्वेऽपि स्थानभिन्नत्वात् । "स्थाने-ऽन्तरतम" (१।१।५०) इत्यत्र स्थान इत्यनुवर्त्तमानेऽपि पुन: स्थानग्रहणस्य प्रयोजनं "यत्रानेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीयो भवतीति"। अतएव हि "तुल्य-स्थानौ प्रयत्नभिन्नौ भविष्यत:, न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्याताम् ।"

४ । तत्रानुवृत्तिनिर्द्देशे सवर्णाग्रहणमनण्त्वात् ।

प्रत्याहारशास्त्रस्य लक्ष्ये प्रवृत्त्यर्थं तदनुगतनिर्द्देशे "अस्य च्वौ" (७।४।३२), "यस्येति च"(६।४।१४८)त्यादौ न सवर्णानां ग्रहणं स्यात्, अनण्त्वात् ।

५ । एकत्वादकारस्य सिद्धम् ।

एकोऽकारो यथाक्षरसमाम्नाये यथानुवृत्तौ यश्च धात्वादिस्थ: ।

दीर्घप्लुतौ न स्त: । "अतो दीर्घो यञि" (७।३।१०१) "अतो रोरप्लुतादप्लुते" (६।१।११३) इति सूत्रलिङ्गात् भविष्यत: ।

प्रत्याहारशास्त्रस्येति । "वृत्ति: शास्त्रस्य लक्ष्ये प्रवृत्ति:, तदनुगतो निर्द्देशोऽनुवृत्तिनिर्द्देश: ।"

अनण्त्वादिति । "अक: सवर्णे दीर्घ" इत्यत्र ककारेण चिह्नेनायमकार: प्रत्याहारस्थस्याकारस्यानुकृतिरिति विज्ञायते । "अस्य च्वा"वित्यत्रस्थेऽकारे न तादृशं चिह्नं दृश्यते, नापि "यस्येति च"त्यत्रेकाराकारयोरकारस्तादृक्चिह्नेन चिह्नित: । तत: प्रत्याहारगताकारानुकृतिरियमिति विज्ञातुमशक्यत्वादकारस्यानण्त्वम्, अनण्त्वाच्च न सवर्णग्रहणं भवति ।

एक इति । एकैवाकारव्यक्ति: । व्यञ्जकध्वनिकृता उदात्तादयो गुणास्तस्या अभेदका: । अकारोऽयं निदर्शनार्थ:, तत इकारादीनामपि एवं बोध्यम् ।

६ । अनुबन्धसङ्करस्तु ।

अकारस्यैकत्वे "कर्मण्यण्" (३।२।१) "आतोऽनुपसर्गे कः" (३।२।३) इत्यादौ केऽपि णित्कार्यं प्राप्नोति ।

७ । एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ।

यत्र एकाज्ग्रहणमनेकाज्ग्रहणं वा कर्तव्यं भवति, तत्र तदुपपत्तिर्न स्यात् । तद्यथा 'किरिणा' 'गिरिणे'त्यनेकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति, घटेन तरति "घटिक" इति द्व्यज्लक्षणष्ठन् प्राप्नोति ।

८ । द्रव्यवच्चोपचाराः ।

द्रव्यवदकारस्य व्यवहाराः प्राप्नुवन्ति । यथानेको नैकेन घटेन युगपत् कार्यं करोति तथैनमकारं नानेको युगपदुच्चारयेत् ।

अनुबन्धसङ्कर इति । अनुबन्धानां सङ्करो विमिश्रभावः । क्-ण्-टादीनामनुबन्धानामेकेनैवाकारेण सम्बन्धवशात् तस्यैकत्वात्तेषामप्यनुगतानामेकत्वम् । सुतरां गोदादौ टित्त्वान्ङीप् सामगीत्यादौ कित्त्वान्टाप् प्राप्नोति । एवमन्यत्रापि साङ्कर्यम् ।

किरिणेति । "सावेकाचस्तृतीयादिर्विभक्तिः" (६।१।१६८) इत्यनेन सप्तमीबहुवचने सौ य एकाच् तस्मात् परा तृतीयादिर्विभक्तिरुदात्तो भवति । 'किरिणा' 'गिरिणे'त्यत्र इकारद्वयस्यैकत्वादेकाच्त्वं सिध्यति, सुतरामनेन सूत्रेणान्तोदात्तत्वं घटते, न पुनस्तत्प्रतीकारः । कथमन्याकारो नोदाहृतः ? "न गोश्वन् साववर्णे"ति (६।१।१८२) प्रतिषेधात् ।

घटेन तरतीति । अकारस्यैकत्वाद्घटशब्दगतयोरकारयोरेकत्वम्, सुतरां "नौद्व्यचष्ठन्" (४।४।७) इत्यनेन घटेन तरति घटिक इति द्व्यज्लक्षणष्ठन् न प्राप्नोति । सूत्रस्य का गतिः ? बाहुकादिषु तस्य चरितार्थता ।

९ । विषयेण तु नानालिङ्गकरणात् सिद्धम् ।

प्रथमामापत्तिं तावत्परिहरति । नानुबन्धसङ्करोऽस्ति । कथम्? यतो विषये विषये नानालिङ्गमकारं करोति, तद्यथा "कर्मण्यण्" 'आतोऽनुपसर्गे कः' । न पुनरनुबन्धसाङ्कर्ये नानालिङ्गं कुर्यात् । किन्तर्हि, एकमेव निखिलानुबन्धैरुच्चारयेत् । नानालिङ्गकरणस्यान्यत् प्रयोजनमस्ति । किम्? इत्संज्ञाप्रकॢप्त्यर्थम् । यदुक्तम्, एकमेव निखिलानुबन्धैरुच्चारयेत् । तन्न सम्भवति । न ह्येकोऽकारः प्रत्येकवदनुबन्धैः एक उपचेतुम् । अपि च इत्संज्ञायां दोषः स्यात्, यतः आद्यन्तयोरेवेत्संज्ञा विधीयते । भवतु तदा—

१० । विषयेण तु पुनर्लिङ्गकरणात् सिद्धम् ।

विषये विषये एकमेव लिङ्गं पुनरन्यत्र करणात् ज्ञायते नानुबन्धसङ्करोऽस्ति, तद्यथा "प्राग्दीव्यतोऽण्" (४।१।८३) "शिवादिभ्योऽण्" (४।१।११२) । यदि साङ्कर्यं स्यात् तदा पुनस्तल्लिङ्गकरणमनर्थकं स्यात् ।

विषयेणेति । वार्त्तिके सामान्यरूपतया अभेदेन गृहीत्वा विषयः करणत्वेन निर्दिष्टः, विवृतौ तु व्यक्तिभेदेन वीप्सायामधिकरणत्वेन ।

इत्संज्ञाप्रकॢप्त्यर्थमिति । प्रथमन्तावत् वर्णानामुपदेशः, तदनन्तरं "हलन्त्यम्" (१।३।३) इति इत्संज्ञा, तदनन्तरम् "आदिरन्त्येन सहेता" (१।१।७१) इति प्रत्याहारः । अतः अण् अक् अङ् अच् इत्यादि नानालिङ्गकरणमित्संज्ञासिद्ध्यर्थम् ।

अपि चेति । यद्यप्येकोऽकारः अण् इत्यादिरूपेणानुबन्धयुक्तः स्यात्, इत्संज्ञाप्रकॢप्तिर्दुरुपपादा । यतश्चान्त्येनेतादेर्ग्रहणं भवति, तेन च मध्यपतितानां संज्ञा ।

एकमेवेति । "प्राग्दीव्यतोऽण्" इत्यनेन अण् विधाय "शिवादिभ्योऽण्" इति पुनर्णित्त्वविधानेन दर्शयति, स एवायमण् योऽयं पूर्वविहितः । यदि साङ्कर्यं स्यात् शिवादिभ्यः केवलोऽकार एव विदध्यात् । ञित्कार्यं मा भूदिति नियमार्थं णिदिति चेत्, न, नियमाद्धि विधिर्बलीयान् ।

अथवा पुनरस्तु "विषयेण तु नानालिङ्गकरणात्सिद्धम्"। ननु चोक्तम्, इत्संज्ञाप्रक्लृप्त्यर्थमेतत् स्यात्। नैष दोषः।

११। लोकत एतत्सिद्धम्।

लोके यथा इह मुण्डो भव, इह जटिलो भव, इह शिखी भवेत्यनुज्ञानेन एक एव देवदत्तस्तत्र तत्र लिङ्गान्तरेणोपस्थाप्यते, तथैकोऽयमकारो यत्र येन लिङ्गेनोच्यते तत्र तेनैवोपस्थास्यते।

यदुक्तम् "एकाजनेकाज्ग्रहणेषु चानुपपत्ति"स्तत्रापि—

१२। एकाजनेकाज्ग्रहणेष्वावृत्तिसंख्यानात्।

प्रथमोत्तमयोस्त्रिरावृत्त्या यथा सप्तदश सामिधेन्यो भवन्ति, एवमिहाप्यावृत्तेः संख्यानादनेकाच्त्वं भविष्यति। भवेदावृत्तितो गौणं कार्य्यं, तत्परिहृतम्। मुख्यैकाच्त्वन्तु न निवर्त्तते। अतः 'किरिणा' 'गिरिणे'त्यत्रैकाजलक्षणमन्तोदात्तत्वं प्राप्नोत्येव। एतदपि सिद्धं लोकतः। तद्यथा, एकां कपिलामृषिसहस्रमेकैकशः सहस्रकृत्वो दत्त्वा तया ते सर्व्वे सहस्रदक्षिणाः सम्पन्नाः, एवमिहापि अनेकाच्त्वम्।

प्रथमोत्तमयोरिति। विकृतियागे त्रयोदश सामिधेन्यः प्रथमोत्तमयोस्त्रिरावृत्त्या सप्तदश भवन्ति। द्वयोः त्रिरावृत्त्या षट्, शिष्टैरेकादशभिः सप्तदश इति गणना भवति।

भवेदिति। त्रयोदश सामिधेन्य एव मुख्याः, तत्रावृत्त्या यत् सप्तदशत्वं तद्गौणम्। एवमेकाच्त्वमेव मुख्यम्, आवृत्तितो यदनेकाच्त्वं भवति तद्गौणम्। "नौ द्व्यचष्ठन्" इत्यस्य वाहुकादौ मुख्ये द्व्यचि कृतार्थतायां कथं स्याद्गौणे द्व्यच्त्वे कार्य्यम्? "गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्" (५।१।३९) इत्यत्र द्व्यच्तयाश्वशब्दस्य प्रतिषेधात् ज्ञापयति आवृत्तिभेदेनापि भेदमाश्रित्य कार्य्यं भवति। तेनात्र गौणस्यापि मुख्यसमकक्षता।

लोकत इति। मुख्येन गौणेन च संख्यान्तरेण पूर्व्वा संख्या बाध्यते, तद्यथा एकां कपिलामित्यादिदृष्टान्ते।

यदप्युच्यते द्रव्यवदुपचाराः प्राप्नुवन्तीति तत्रापि यदसम्भवि कार्य्यं तत्रानेको युगपन्न कार्य्यं कुर्य्यात् यत्तु सम्भवि कार्य्यं तत्रानेको युगपत् कार्य्यं करोति, यथा घटस्य दर्शनं स्पर्शनं वा । अकारोच्चारणं सम्भवि कार्य्यं, तदनेकोऽपि युगपत् करिष्यति ।

१३ । आन्यभाव्यन्तु कालशब्दव्यवायात् ।

कालव्यवधानात् शब्दव्यवधानात् भवत्यकारस्यान्यभाव्यम् । तद्यथा दण्ड अग्रम् इत्यत्र कालव्यवधानम् । दण्ड इति शब्दव्यवधानम् । न ह्येकस्यात्मनो व्यवधानेन भवितव्यम् ।

१४ । युगपच्च देशपृथक्त्वदर्शनात् ।

यदयं युगपद्देशपृथक्त्वेषूपलभ्यते, ततो भवत्यस्यान्यभाव्यम् । द इत्यत्र दृश्यमानोऽकारः पुनर्ण्ड इत्यत्र वेगगामिशकुनिवद्दृश्यत इति चेत्, अनित्यत्वं स्यात् । आदित्यवद्वर्णा अनेकाधिकरणस्था युगपत् देशपृथक्त्वेषूपलभ्यन्त इति चेत्, न सिद्ध्यति ।

आन्यभाव्यमिति । "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च" (५।१।१२४) इत्यनेन अन्यो भावोऽन्यद्वस्तु, तस्य भाव इति भावे ष्यञ्, अन्यस्य भावस्ततः स्वार्थे ष्यञ्, तत्रैव स्वार्थे विधानार्थोऽपि पाठो दृश्यते । उभयथापि अन्यत्वमित्यर्थः ।

दण्ड अग्रमिति । दण्ड अग्रम् इत्यत्र असंहितायां कालव्यवधानम् । दण्ड इत्यत्र णकारडकाराभ्यामकार उभयत्र व्यवहितः । ततः शब्दव्यवधानम् ।

देशपृथक्त्वेष्विति । अश्वः अर्कः अर्थः इत्यादौ पृथक् पृथक् देशेषु अकारस्य स्थितिः । न ह्येको देवदत्तो युगपत् स्रुघ्ने च भवति मथुरायाञ्च ।

वेगगामिशकुनिवदिति । व्यञ्जकध्वनिसन्निधानात् द इत्यत्रोपलभ्यमानोऽकारस्तत्र तदसन्निधानेन शकुनिवदाशुसञ्चारित्वात् ण्ड इत्यत्रोपलभ्यते ; यथा शकुनिः पञ्जरादावस्थितः द्रुतवेगत्वात् पश्चाद्दृश्यते । सुतरां व्यञ्जकध्वनीनामेव कालशब्दाभ्यां व्यवधानं न तु ध्वनिव्यङ्ग्यस्य ।

अनित्यत्वं स्यादिति । एकस्यैकत्र व्यञ्जकध्वनिसन्निधानेनोपलब्धिस्तदसन्निधानेनानुपलब्धिरित्यनित्यत्वमायाति । कथम् ? "नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णै-

नैको द्रष्टानेकाधारगतमादित्यं युगपद्देशपृथक्त्वेनोपलभते, अकारन्तूपलभत एव। नोपलभते । कथम् ? "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः, एकञ्च पुनराकाशम् । यतः आकाशदेशा अपि बहवः, तत आन्यभाव्यमकारस्य ।

१५ । आकृतिग्रहणात् सिद्धम् । * ।

अवर्णाकृतिरुपदिष्टा सर्व्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिस्तथोवर्णाकृतिः ।

भवितव्यमनपायोपजनविकारिभिः ।" स यदि दरत्यव हृष्टोऽकारोऽहरत्यत्र दृश्यते कूटस्थादिकं व्याहन्यते ।

एकञ्च पुनराकाशमिति । जातिस्फोटवादिनाऽकारस्य भेदः परिगृह्यते व्यक्तिस्फोट-वादिना त्वभेदः । एकस्याकारस्योदात्तादिभेदात् भिन्नत्वादुदात्तत्वं परिहायानुदात्तत्व-ग्रहणे तस्यानित्यत्वप्रसङ्ग इत्यभियुक्तोपन्यस्तवादनिराकृतये व्यक्तिस्फोटवादी त्वाह, आकाशदेशः शब्दः, एकञ्च पुनराकाशमिति । कथमाकाशदेशः शब्दः ? पुरुषो-दीरितव्यञ्जकध्वनिः श्रोत्रेणोपलभ्यते, श्रोत्रन्तु पुनराकाशप्रदेशविशेषः । न हीन्द्रियाणां सम्बन्धेन विना विषयग्रहणं सम्भवति । श्रोत्रन्तु पुनर्निश्चलं क्रियाहीनम् । प्रयोगेण पुरुषोदीरितेन अभिज्वलितः अभिव्यक्तोध्वनिरतएव आकाशप्रदेशएव । कथम् ? श्रोत्रे-न्द्रियस्य तद्व्यतिरिक्तान्यसम्बन्धविरहितत्वात् । स च ध्वनिरेव शब्दः । शब्दस्तु बुद्धि-निर्ग्राह्यः, यतः पूर्व्वपूर्व्वध्वन्यभिव्यक्तिजन्या या संस्कारपरम्परा उपजायते तस्या यथान्त्य-बोधस्तेनैव तत्परिग्रहः ।

आकाशदेशा अपि बहव इति । श्रोत्रवर्त्ति आकाशं घटवर्त्ति आकाशम् एव-मेकस्यापि आकाशस्य भेदव्यवहारादाकाशदेशा अपि बहवो यथा एकस्याः पृथिव्याः कुरुमथुरादिदेशाः ।

व्यक्तिपक्षे निराकृते जातिपक्षएवाश्रीयते आकृतिग्रहणादिति । सर्व्वप्रदेशेष्वकार-जातिर्निर्द्दिश्यते, व्यक्तिनिर्द्देशो न जातेरनुपस्थापको नान्तरीयकत्वात् । प्रत्याहारे निर्द्दिष्टाया एवाकारजातेर्विवृतत्वप्रतिज्ञानम्, तस्या एव शास्त्रान्ते प्रत्यापत्तिः "अ अ" (८।४।६८) इति । एवमनुवृत्तिनिर्द्देशेऽनाकारेण जातिनिर्द्देशादाकारस्य ग्रहणम् ।

अतिप्रसङ्गस्तु तपरकरणेन बाध्यते। सवर्णग्रहणजनितातिप्रसक्तिनिवारणाय तपरकरणमिति चेत्, न। प्रत्याख्यायते तत् "सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्चेति।" हल्ग्रहणेषु चाकृतिग्रहणात्सिद्धम्। यथा "झलो झलि" (८।२।२६) अवात्ताम्, अवात्तम्, अवात्त।

यत्राकृतिग्रहणं नास्ति तत्राण् सवर्णान् गृह्णाति।

"अष्टन आ विभक्तौ" (७।२।८४) इत्यत्र जातिनिर्देशे ह्रस्वस्यापि ग्रहणं भवतीति चेत्, न, दीर्घोच्चारणसामर्थ्यात्, अन्यथा ह्रस्वमेवोच्चारयेत्। कथम् न प्लुतस्य ग्रहणम्? "प्लुतश्च विषये स्मृत" इति न्यायात्। विषयं दूराद्धूतादौ। "त्यदादीनाम" (७।२।१०२) इत्यत्र "अप्रत्यय" (१।१।६९) इति ज्ञापकात् परिगृहीतया "भाव्यमानेन सवर्णानां ग्रहणं ने"ति परिभाषया आदेशादौ यथाश्रुतोऽकार एव गृह्यते। "अस्य च्वौ" (७।४।३२) इत्यत्र व्यक्तिनिर्देशस्य नान्तरीयकत्वात् सकलव्यक्तिग्रहणम्। व्यक्तिपक्षं समाश्रित्य "अणुदित् सवर्णस्य चाप्रत्ययः" (१।१।६९) इति सूत्रं सूत्रकृतोपन्यस्तम्, भाष्यकृता तु जातिपक्षमवलम्ब्य सूत्रं प्रत्याख्यातम्, प्रत्याख्यातमपि कुशकाशविधिनेन पुनस्तत्परिगृहीतम् दोषनिवृत्त्यर्थेन, तद्यथा "अष्टन आ विभक्तौ" इत्यत्रैव भाष्ये। विस्पष्टार्थं दोषनिवृत्त्यर्थञ्च सूत्रकृता जातिपक्षं परिहाय व्यक्तिपक्षः समाश्रितः। यतोऽनेन लघ्वानुरोधात् व्याख्यानानुसरणगौरवं न भवति, अप्रत्ययोऽविधीयमानोऽण् सवर्णस्य ग्राहक इति झटिति स्फुटतरप्रतीतिः। व्यक्तिपक्षे सादृश्यसम्बन्धान्निखिलव्यक्तिग्रहणमस्तीत्यदोषः।

अवात्तामिति। वसेर्लुङि अवात्+स्+ताम् इति स्थिते व्यक्तिपक्षे पूर्वपरयोस्सकारयोरन्यतरोऽस्यक्षरसमाम्नाये सुतरां तयोर्झलत्वं न स्यात्। सूत्रस्य तु चरितार्थता भिदेर्लुङि अभित्ता इत्यादौ स्यात्।

यत्राकृतिग्रहणमिति। यत्राकृतिपक्षो नाश्रीयते, तत्र अणा सवर्णग्रहणं भवतीत्यर्थः।

१६ । रूपसामान्याद्वा ।*।

रूपसामान्याद्वा सिद्धमेतत् । तद्यथा तानेव शाटकानाच्छादयामः ये मथुरायामित्यत्र रूपसामान्यादेव मथुरायां परिगृहीतानां शाटकानामन्यत्र तत्त्वेन परिग्रहः ।

ऋ लृ क् । २ ।

म. ह. । ऋ लृ इत्येतौ वर्णावुद्दिश्य पूर्व्वांशान्ते ककारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः । "अकः सवर्णे दीर्घ" (६।१।१००) इत्यकारेण, "इकोगुणवृद्धी" (१।१।३) इतीकारेण, "उगितश्च" (४।१।६) (६।३।४५) इत्युकारेण । अकारादयो वर्णाः प्रचुरप्रयोगविषयास्तेषां सूत्रानुपदेशे प्रयोजनम् । लृकारस्तु क्लृपिस्थएव प्रयुज्यते, क्लृपेश्च "पूर्व्वत्रासिद्ध"मिति लत्वमसिद्धम् । तस्यासिद्धत्वात् ऋकार एव अच्कार्य्याणि भविष्यन्तीति किमर्थम् लृकार उपदिश्यते ? लत्वविधानाद्यानि पराण्यच्कार्य्याणि तानि लृकारे यथा स्युरिति । कानि पुनस्तानि ? प्लुतः, स्वरितो-द्विर्व्वचनम् । 'क्लृ३प्तशिखः' 'प्रक्लृप्तवान्' इति । यथाशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते । ततस्तस्यापि लृकारस्याच्कार्य्यप्रतिपत्त्यर्थम् लृकारोपदेशः क्रियते । ऋतक

रूपसामान्यादेति । भेदप्रतिरोधिनि व्यक्तिनिर्द्देशे रूपसामान्यतोऽभेदव्यवहारोऽस्ति यथा लोके ।

इति प्रयोक्तव्ये शक्तिवैकल्यात् कुमारी ऌतक इति प्रयुङ्क्ते । तदन्योऽनुकरोति "कुमारी ऌतक इत्याह" इति ।

भा. स. । अथ किमर्थं ऌकारोपदेशः ? किं विशेषेण ऌकारस्य न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते ? यद्यस्ति किञ्चिदन्येषां वर्णानामुपदेशे प्रयोजनम् ऌकारस्यापि तद्भवितुमर्हति । को वा विशेषः ? विशेषोऽत्र, ऌकारस्य लघीयान् प्रयोगविषयः । यश्चास्ति प्रयोगः स क्लृपिस्थ एव । क्लृपेश्च लत्वस्यासिद्धत्वात् ऋकारस्यैवाच्कार्याणि भविष्यन्ति, किम् ऌकारोपदेशेन । तत्राह

१ । ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुताद्यर्थः ।

(१) यदृच्छाशब्दार्थो यथा 'दध्य्‌ऌतकाय देहि' । यदृच्छया कश्चिद्-ऌतको नाम,

---

अथ किमर्थं इति । "ऋकारऌकारयोः सवर्णविधि"रिति वार्त्तिकवाक्यमनपेक्ष्य सूत्रकृता ऌकारोपदेशः कृतः । यदि पुनस्तदपेक्ष्यैवैतत्पुनः कृतं, सवर्णविधेरनित्यत्वप्रदर्शनार्थैवेति सिद्धान्तः, अन्यथा 'क्लृप्तशिखः' इत्यत्र "गुरोरनृत" (८।२।८६) इति निषेधः प्राप्नुयात् । बह्वृचप्रातिशाख्ये ऋ ऌ वर्णयोरुपजिह्वामूलीयत्वेन स्थानसाम्यमस्ति ततः सवर्णतायामपि तथा । एवञ्च प्लुताद्यर्थम् ऌकारोपदेशे कर्त्तव्ये प्रश्नमुखेन तदाक्षिपति, अथ किमर्थं ऌकारोपदेश इति ।

किं विशेषेणेति । उपदेशं विनापि ऌकारप्राप्तिसम्भावनां पश्यन्नाह किं विशेषेणेति । तदप्रत्युक्त्या बाध्यते यद्यस्ति किञ्चिदित्यादिना ।

यश्चास्तीति । अल्पप्रयोगविषयादृकारादपि अल्पीयान् ऌकारस्य प्रयोगविषयः, तथापि प्रयोगविषयत्वादुपदेशः कर्त्तव्य इति पश्यन् परिहरति, ऋकारस्यैवाच्कार्याणि भविष्यन्तीति । ऋकारावस्थायामेवोदात्तादिषु कृतेषु "स्थानेऽन्तरतम" इति स्थानिसदृशलकारो भविष्यतीत्यभिप्रायः ।

तस्मिन्नच्कार्य्याणि यथा स्युः। चतुष्टयी शब्दानां प्रवृत्तिः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः।

(२) अशक्तिजानुकरणार्थो यथा "कुमारी ऌतक इत्याह"। अशक्त्या कुमारी ऌतक इत्याह तस्येदमनुकरणम्।

(३) प्लुतिद्विर्वचनस्वरिताः प्लुताद्यास्तदर्थाः, तद्यथा 'कॢ३प्तशिख' 'कॢप्तः' 'प्रकॢप्तः'। परेषु प्लुतादिषु लत्वं पूर्व्वत्वात्सिद्धम्। सुतरामच्कार्य्याणि न प्राप्नुवन्ति। तत्सिद्धये ऌकारोपदेशोऽत्रैव कर्त्तव्यः।

नैतानि सन्ति प्रयोजनानि। कथम्?

२। न्याय्यभावात्कल्पनं संज्ञादिषु।

न्याय्यस्य ऋतकशब्दस्य संज्ञादिषु कल्पनं साधु, ऋतक एवासौ न ऌतकः। अथवा न्याय्यः ऋतकशब्दः शास्त्रसिद्धोऽस्ति, संज्ञादिषु स एव कल्पयितव्यः, ऋतक एवासौ

परेष्विति। "कृपो रो लः" (८।२।१८) इति सूत्रेण लकारादेशो विहितः। स च "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" (८।२।८६) "अनचि च" (८।४।४७) "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इत्येतैः परविहितान् प्लुतद्विर्वचनस्वरितान् प्रति नासिद्धः। "पूर्व्वत्रासिद्धम्" (८।२।१) इत्यनेन परं हि पूर्व्वं प्रत्यसिद्धम्, न तु परं प्रति पूर्व्वम्, सुतरां लसामान्यस्य ऌकारस्याच्त्वं व्याहन्यते।

प्रकॢप्त इति। अन्तर्भावितण्यर्थात् कर्मणि क्तः, तेन "गतिरनन्तरः" (६।२।४९) इत्यनेन पूर्व्वपदप्रकृतिस्वरः। ततः शेषनिघाते "उदात्तादनुदात्तस्य स्वरितः"।

न्याय्यभावादिति। प्रथमप्रयोजननिराकरणार्थं वार्त्तिकमिदम्। ऋत्यनुसारेण कृदन्तं नाम कर्त्तव्यम्। ऋतिः सौत्रो धातुः। ततः "क्वुन् शिल्पिसंज्ञयोरपूर्व्वस्यापी"त्यनेन ऋतकः सिद्धः। अतः शास्त्रसिद्धत्वान्न्याय्य एवायम्। ऌतकस्त्वशक्तिजत्वादस्यैवापभ्रंशः।

संज्ञादिष्विति। आदिपदेन जातिशब्दाः गुणशब्दाः क्रियाशब्दाः सर्व्व एव शास्त्रान्विताः प्रयोक्तव्या इति दर्शयति।

न ऌतक इति । ऌफिड: ऌफिड्डश्चावत् यदृच्छाशब्द: । ऋधातोरौणादिक फिड-फिड्डप्रत्ययाभ्यां निष्पन्नौ ऋफिडऋफिड्डौ शब्दावेतौ । चतुष्टयी शब्दानां प्रवृत्तिः, जातिशब्दा: गुणशब्दा: क्रियाशब्दा:, न सन्ति यदृच्छाशब्दा: ।

सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति कृत्वा परिहार: ।

३ । समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्त्तकोभवति । * ।

तद्यथा शास्त्रान्वितोदेवदत्तशब्द: समानार्थं देवदिन्नशब्दं निवर्त्तयति, न गाव्यादीन् । नैष दोष: ।

४ । पक्षान्तरैरपि परिहारा भवन्ति ।

व्युत्पन्नपक्षमाश्रित्य यदृच्छाशब्दा निवर्त्तिता:, अव्युत्पन्नपक्षमाश्रित्य सन्तीति परिहारा भवन्ति ।

सन्तीति । अव्युत्पत्तिपक्षमाश्रित्य सन्तीति, व्युत्पत्तिपक्षमाश्रित्य न सन्तीति फलितार्थ: ।

समाने चेति । यत्र समानार्थत्वं, तत्रैव साधुरसाधुशब्दस्य निवर्त्तकोभवति । ऌतक: ऋतकश्चेत्येतौ भिन्नस्वरूपौ, यत: ऌतकशब्द: कस्मिंश्चिज्जने संज्ञात्वेन नियुज्यते सुतराम् ऌतकस्वरूप एवासौ ।

पक्षान्तरैरिति । कुत्रचिद्व्यक्तिपक्ष आश्रित:, स एव जातिपक्षे समाश्रिते प्रत्याख्यात: । एवं पक्षान्तरैरिति । व्युत्पन्नसंज्ञाशब्दपक्ष:, अव्युत्पन्नसंज्ञाशब्दपक्ष: । यदा व्युत्पन्नसंज्ञाशब्दपक्षाश्रय:, तदा अव्युत्पन्नसंज्ञाशब्दपक्ष: प्रत्याख्यात: । अव्युत्पन्नसंज्ञाशब्दपक्षाश्रये तु शिष्टप्रयुक्ता: पारम्पर्य्यागता: संज्ञा: सिद्ध्यन्ति । टिघुभादिवत् ऌतकशब्द: साध्वसाधुवहिर्भूत: साधुरेव वेति पक्षान्तरे भाष्यकृता स्थापित: ।

५ । अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ।

अनुकरणं शिष्टस्य साधु भवति । अशिष्टाप्रतिषिद्धस्य तु नैव दोषायाभ्युदयाय वा । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावत्—एवमसौ ददातीत्यनुकुर्व्वन् यो दद्यात् सोऽभ्युदयेन युज्यते । वेदेऽपि—एवं विश्वसृजः सत्राण्यध्यासत इति तेषामनुकुर्व्वन् यः सत्राण्यध्यासीत सोऽभ्युदयेन युज्यते । अशिष्टाप्रतिषिद्धम्—एवमसौ हिक्कतीति तस्यानुकुर्व्वन् यो हिक्केत् नैव तस्य तद्दोषायाभ्युदयाय वा ।

एवमसौ सुरां पिबतीति तस्यानुकुर्व्वन् यः सुरां पिबेत् सोऽपि मन्ये पतितः स्यात् । विषमउपन्यासः । यश्चापि पिबति यश्चानुपिबति उभौ तौ पिबतः । यस्तु खलु एवमसौ पिबतीति तस्यानुकुर्व्वन् पयः पिबेत् न स मन्ये पतितोभवेत् । एवमिहापि एवमसौ अपशब्दं प्रयुङ्क्त इति तस्यानुकुर्व्वन्नपशब्दं प्रयुञ्जीत सोऽपशब्दभाक् भवेत् । न खल्वपशब्दपदार्थकः शब्दोऽपशब्दोभवति । अतस्तदर्थ उपदेशः कर्त्तव्यः ।

अनुकरणमिति । द्वितीयप्रयोजननिराकरणार्थं वार्त्तिकमिदम् ।

कृतान्तेष्विति । कृतान्तेषु सिद्धान्तेषु ।

विषम इति । सुरापानानुकरणे सुरापानं न त्वनुकरणं तत्कार्य्यानुष्ठानमेव । अतएवानुकार्य्यस्य दुष्टत्वादनुकरणस्यापि दुष्टत्वम् । न खलु तत्रानुकार्य्यस्य दुष्टत्वाद्दुष्टत्वं यत्र सुरापानानुकरणे पयःपानम् ।

एवमिहापीति । सुरापानेन सुरापानानुकरणं यथा दोषाय तथापशब्दानुकरणेऽपशब्दप्रयोगो दोषावहः ।

न खल्विति । हेलयो हेलय इत्यादिषु अपशब्दपदार्थकः शब्द उदाहृतः । न तेन कश्चिदपशब्दव्यवहारजनितदोषागमः । कथम् ? साधुशब्दस्यार्थे यदा ह्यसाधुशब्दः प्रयुज्यते तदैवापशब्दत्वम्, यथा कृतकार्थे लृतकशब्दस्य प्रयोगः । अनुकार्य्यस्यापशब्दस्यानुकरणे यदापशब्दपदार्थकस्य शब्दस्य प्रयोगो न तदा तस्य तथात्वम् यथा लृतको यदानुकार्य्यं प्रत्याययति तदा साधुरेव ।

अपशब्दइत्येव तस्यापशब्दत्वम् न चैषोऽपशब्दः।

अयं खल्वनुकरणशब्दोऽपरिहार्य्यः, साध्वॢकारमधीते मध्वॢकारमधीते इति। एतदर्थ उपदेशः कर्त्तव्यः। कॢपिस्थस्येदमनुकरणमतः कॢपेर्लत्वस्यासिद्धत्वादृकार एवाच्कार्य्याणि भविष्यन्ति।

भवेत् किन्तु न ततः प्रयोजनसिद्धिः। अयन्त्वन्यः कॢपिस्थपदार्थकः शब्दः यदर्थ उपदेशः कर्त्तव्यः। न कर्त्तव्यम्। इदमवश्यकर्त्तव्यम्, प्रकृतिवदनुकरणं भवतीति। किं प्रयोजनम्? 'द्विः पचन्त्वित्याह' "तिङ्ङतिङः" (८।१।२८) इति निघातो यथा स्यात्, 'अग्नी इत्याह' "ईदूदेद्द्विवचनं प्रगृह्यम्" (१।१।११) मिति प्रगृह्यसंज्ञा यथा स्यात्। यदि प्रकृतिवदनुकरणं भवति, अपशब्दप्रकृतित्वात्, अपशब्द एवासौ भवति

अपशब्द इति। गाव्यादयोऽपभ्रंशा अपशब्दवाच्याः। अपशब्दाद्यापशब्दप्रयोगे हि अपशब्दत्वम्। नैषोऽपशब्दः, किन्तर्हि, अनुकार्य्यस्यानुकरणमात्रम्।

अयं खल्विति। न ह्यसाधोरनुकरणमप्यत्रास्तीत्युपदेशस्यावश्यकर्त्तव्यता।

कॢपिस्थस्येति। ऋकारेऽच्कार्य्याणि भविष्यन्तीत्यनेन कर्त्तव्यतां परिहरति।

भवेदिति। कॢपिस्थलकाराय ऌकारोपदेशाय प्रयोजनाभावेऽपि तदनुकरणार्थं तदुपदेशः कर्त्तव्यः। 'साध्वॢकारमधीते' इत्यत्र प्रयोगस्यानुकरणम्। "पूर्व्वत्रासिद्ध" (८।२।१) मित्यस्य कार्य्ये नियोगो न तु प्रयोगे। सुतरां प्रयोगानुकरणे नास्ति तत्सूत्रस्य परिगणना।

इदमवश्यमिति। कॢपेर्लत्वस्यासिद्धत्वादृकारद्वारेण यथाच्कार्य्यं भवति तथानुकरणस्यापि।

द्विः पचन्त्विति। प्रकृतिवदनुकरणं भवतीत्यस्योदाहरणम्। पचन्तु पचन्त्विति केनचिदुक्ते द्विः पचन्त्विति तस्यानुकरणम्। एतच्च क्रियासाधनादि नाभिधत्ते, अतो न तिङन्तम्, तथापि प्रकृतिवत् "तिङ्ङतिङः" (८।१।२८) इत्यनेन निघातः स्यात्। 'अग्नी इत्याहे'त्यत्र प्रगृह्यत्वमतिदिशेन। न खलु अग्नीशब्दोऽत्र द्व्यर्थमभिधत्ते, यद्द्विवचनान्तं भविष्यति, तथापि प्रकृतिवदस्य प्रगृह्यत्वम्। "प्लुतप्रगृह्या अचि नित्यम्" ... "द्युतादयल्लृदितः" (६।१।५५)

'कुमार्य्य् ऌतक' इत्याह। न ह्यपशब्दा उपदिश्यन्ते, न चानुपदिष्टा प्रकृतिरस्ति, तस्मात् कर्त्तावापशब्दः प्रकृतिः।

६। एकदेशविकृतस्यानन्यत्वात् प्लुत्यादयः।

एकदेशविकृतमनन्यवद्भवतीति प्लुत्यादयोऽपि भविष्यन्ति।

यद्येकदेशविकृतमनन्यवद्भवति, तदा "राज्ञः क च" (४।२।१४०) राजकीयमित्यत्र "अल्लोपोऽनः" (६।४।१३४) इत्यकारलोपः प्राप्नोति।

७। एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य।

षष्ठीनिर्दिष्टस्यैकदेशविकृतमनन्यवद्भवतीति चेत् 'क्लृप्तशिख' इत्यत्र प्लुतो न प्राप्नोति। यतः "कृपो रो लः" (८।२।१८) इत्यत्र ऋकारो न षष्ठीनिर्दिष्टः। कृप उः रः लः इत्यविभक्तिकनिर्देशे ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः। अथवा त्वविशेषेण "एकदेशविकृतमनन्यवद्भवती"त्येवास्तु। राजकीयमित्यत्राल्लोपः प्राप्नोतीत्युक्तम्। नैष दोषः। "श्वयुवमघोनामतद्धिते" (६।४।१३३) इत्यत्र श्वादीनां सम्प्रसारणे नकारान्तग्रहणमनकारान्तप्रति-

---

इत्यत्र ऌकारे परे यणादेशकरणात् धात्वनुबन्धस्य ऌकारस्य सन्ध्यच्कार्याणीत्यायाति, अतो समन्तु सप्न्तु इत्यादिस्थस्यानुकरणं सिद्ध्यति प्रकृतिवद्भावः।

न ह्यपशब्दा इति। प्रकृतिवदनुकरणं भवतीत्यत्र शास्त्रीया प्रकृतिराश्रीयते, कार्य्यञ्च यदतिदिश्यते तदपि सुतरां शास्त्रीयमेव।

एकदेशविकृतस्येति। तृतीयप्रयोजननिराकरणार्थं वार्त्तिकमिदम्। "तुद्धिधिलादेशविनामेषु ऋकारग्रहण"मिति वक्ष्यमाणत्वात् ऋकारैकदेशस्य रेफस्य लत्वे कृते स एव ऋकार इति प्रत्यभिज्ञानात् भविष्यतीति एकदेशविकृतस्यानन्यत्वमित्यस्य भावः।

षेधार्थम्। तत् प्रकृतमुत्तरत्रानुवर्त्तिष्यते "अल्लोपोऽनो नकारान्तस्ये"ति।

इह तर्हि "क्लृप्तशिखः" "अनृतः" (८।२।८९) इति प्रतिषेधः प्राप्नोति।

८। रवत्प्रतिषेधाच्च।

रवत्प्रतिषेधान्नैतत्सिद्ध्यति। "गुरोरवत" इति वक्ष्यामि। एवं सति होतृऌकार" इत्यत्र दीर्घस्य प्लुतप्रतिषेधापत्तिः। "गुरोररवतो ह्रस्वस्ये"ति वक्ष्यामि। एवमेकस्य ऌकारोपदेशस्य प्रत्याख्यानाय लट्वाकर्षणाय महावंशस्तम्भावलम्बनमिव सूत्रभङ्गाश्रयणकल्पं महदेव गौरवम्।

नकारान्तस्येति। राजकीयमित्यत्र कादेशे कृते राजन्शब्दो न नकारान्तो भवति, न हि छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहारः।

रवादिति। क्लिनातीनतिः नकारस्य णत्वादेशः। विनामे ऋकारग्रहणे कृते विनामैकदेशविकृतन्यायेन रेफवत्ताप्यायाति। तेन अनृत इत्यत्र अरवत इति सिद्ध्यति। तस्य च ऋकारप्रयुक्तं कार्यं न भवति छिन्नपुच्छस्य शुनः पुच्छवत्त्वाव्यवहार इव।

ह्रस्वस्येति। ह्रस्वस्य रवतो न तु दीर्घस्य प्लुतनिषेधः।

लट्वाकर्षणायेति। लट्वा करञ्जभेदः। न हि कोऽपि लट्वाकर्षणाय महान्तं वंशस्तम्भमालम्बते, तत्करणन्तु उपहासास्पदम्; एवं ऌकारोपदेशप्रत्याख्यानार्थं सूत्रभङ्गाश्रयणन्तु। तदाह भाष्यकारः "स एष सूत्रभेदेन ऌकारोपदेशः प्लुताद्यर्थः सन् प्रत्याख्यायते सैषा महती वंशस्तम्बाल्लट्वानुकृष्यते।" लट् लौल्ये इति धातोरौणादिकः क्वन्। ऌकारप्रत्याख्याने निष्प्रयोजनमिति स्थितम्।

तृतीयोऽध्यायः ।

ए ओङ् । ३ ।

म. वृ. ए ओ इत्येतौ वर्णावुपदिश्य अन्ते ङकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन । "एङि पररूप" (६।१।९४) मित्येकारेण ।

ऐ औच् । ४ ।

म. वृ. ऐ औ इत्येतौ वर्णावुपदिश्य पूर्व्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति चतुर्भिः "अचः परस्मिन् पूर्व्वविधौ" (१।१।५७) इत्यकारेण, "इच एकाचोऽम्प्रत्ययवच्च" (६।३।६८) इति इकारेण, "एचोऽयवायावः" (६।१।७८) इत्येकारेण ; "वृद्धिरादैच्" (१।१।१) इत्यैकारेण ।

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्य्यं न भवति, तच्छायानुकारिणो हि ते न पुनस्त एव । पृथक्प्रयत्ननिर्वृत्यर्थं हि वर्णमिच्छन्त्याचार्य्याः । गुड्लिधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम् । गुड्लिधौ ऌकारग्रहणम्—आऌधतुः आऌधुः । लादेशे ऌकारग्रहणम्—क्लृप्तः क्लृप्तवान् । विनामे ऋकारग्रहणम्— कर्त्तॄणाम् ।

भा. स. इमानि सन्ध्यक्षराणि एत् ओत् ङ्, ऐत् औत् च् इति तपराणि वोपदिश्येरन्नथवा यथान्यासमतपराणि ? कश्चात्र विशेषः ?

१ । सन्ध्यक्षरेषु तपरोपदेशश्चेत् तपरोच्चारणम् ।

सन्ध्यक्षरेषु तपरोपदेशश्चेत् तपरोच्चारणं कर्त्तव्यम् ।

२ । प्लुतादिष्वज्विधिः ।

तपरनिर्द्देशे त्रिमात्रत्वाभावादच्त्वाभावः । सुतरां प्लुतादिष्वजाश्रयविधिर्न सिद्ध्यति । 'गौ३त्रात' 'नौ३त्रात' इत्यत्र "अनचि च" (८।४।४७) त्यनेन अच उत्तरस्य यरो द्वे भवतोऽनचीति द्विर्व्वचनं न प्राप्नोति । 'प्रत्यङ्ङै३तिकायनः' 'उदङ्ङौ३पगव' "ङमो ह्रस्वादचि ङमुन् नित्यम्" (८।३।३२) इत्यनेन अचि ङमततादेशो न भवति ।

३ । प्लुतसंज्ञा च ।

प्लुतसंज्ञा च न सिद्ध्यति । 'ऐ३तिकायनः' 'औ३पगवः' । "ऊकालोज्भ्रस्वदीर्घप्लुत" (१।२।२७) इति त्रिमात्रस्य प्लुतसंज्ञकत्वात् प्लुतसंज्ञा च न प्राप्नोति ।

सन्तु तर्ह्यतपराणि ।

४ । अतपर एच इग्घ्रस्वादेशे ।

यदि अतपराणि एच इग्घ्रस्वादेश इति वक्तव्यः स्यात्, किं प्रयोजनम् ? एचो

सन्ध्यक्षराणीति । सन्धीयमानावयवत्वात् सन्ध्यक्षराणीत्यन्वर्था पूर्व्वाचार्य्यसंज्ञा ।

प्लुतादिष्विति । "ऊकालोज्भ्रस्वदीर्घप्लुत" (१।२।२७) इत्यत्राच्शब्दोऽस्ति । अच्शब्देनात्र तपराणामेचामुपस्थितेस्तपरैस्तत्कालग्रहणात् गौ३त्रात इत्यादौ त्रिमात्रत्वग्रहणं व्याहन्यते । त्रिमात्रत्वाभावे नाच्त्वं, अच्त्वाभावे न द्विर्व्वचनम् नापि ङमुट्त्वम् ।

प्लुतसंज्ञेति । पूर्व्वोक्तयुक्त्या तत्कालग्रहणात् त्रिमात्रत्वाभावात् ।

एच इगिति । "एच इग्घ्रस्वादेशे" (१।१।४८) इति सूत्रं वार्त्तिककृता प्रत्याख्यातं,

ह्रस्वादेशशासनेष्वर्द्ध एकारोऽर्द्ध ओकारो वा मा भूदिति । तपराणि चेत् तत्राप्येतद्वक्तव्यम् । यतः इमौ ऐचौ समाहारवर्णौ ; मात्रावर्णस्य मात्रेवर्णोवर्णयोः ; तयोः ह्रस्वादेशे कदाचिदकारः स्यात् कदाचिदिकारोकारौ स्याताम्, मा कदाचिदकारः स्यादिति सूत्रारम्भः ।

प्रत्याख्यायते चैतत्सूत्रं वार्त्तिककारेण "ऐचोश्चोत्तरभूयस्त्वादि"ति । प्रत्याख्यानपक्षे इदमपि प्रत्याख्यातम् "सिद्धमेङः सस्थानत्वादि"ति ।

तदुपलक्ष्योक्तं वक्तव्यं स्यादिति । एङ इति । अर्द्ध इति समांशवाचिनोऽपि पुंस्त्वमेतद्भाष्यप्रामाण्यात् । एचां हि पूर्व्वभागोऽकारसदृशः उत्तरभाग इवर्णोवर्णसदृशः । तच्चोच्चारणतः परिलक्ष्यते एङि अकारः प्रश्लिष्टः, ऐचि विश्लिष्टः । एङः प्रश्लिष्टावर्णत्वादिकारोकारवर्णसवर्णावर्द्धेकारावौकारौ प्राप्नुतः ।

तपराणि चेदिति । ऐचोर्विश्लिष्टावर्णत्वात् अर्द्ध एकारोऽर्द्ध ओकारो न भवतः अथ च समाहारवर्णत्वात् तपरत्वेऽपि कदाचिदकारः स्यात् कदाचिदिकारोकारौ । एवं सूत्रारम्भस्य प्रयोजनमुभयत्र समानमेव । अतपरत्वे एचः, तपरत्वे ऐचः ह्रस्वादेशे इद्भवतीति वक्तव्यं भवति । मात्रावर्णस्येति । अ इ उ एषां प्रत्येकमष्टादश भेदाः । अष्टादशभेदभिन्नानामेषां मात्रा ह्यवयवभेदः । अतो भेदसद्भावात् षष्ठ्या निर्द्देशः ।

प्रत्याख्यायत इति । अकारनिवृत्त्यर्थं "एच इग्घ्रस्वादेशे" इति सूत्रं न कर्त्तव्यम् । कथम् ? उच्चारणतोऽकारस्यार्द्धमात्रा, इकारोकारयोरध्यर्द्धमात्रा, अत उत्तरभूयस्त्वादिकार उकार एव । इदमपीति । एकारस्तालव्यः, ओकार ओष्ठ्य इति तयोः स्थाने इकारोकारावेव भविष्यतः । एदैतोः कण्ठतालु ओदौतोः कण्ठोष्ठमिति तत्तु "शब्दपरविप्रतिषेधेन एङ उत्तरभागान्तरतमौ इ उ वर्णावेवेति सिद्धम् ।" एकारस्तालव्य ओकारः ओष्ठ्यो यथा बह्वृचप्रातिशाख्ये "तालव्यावेकारश्चवर्गाविकारैकारौ यकारः शकारः" इति "शेष ओष्ठ्योपपाद्य" इति च । शेषः खलु उवर्णः पवर्गः ओ औ उपाध्मानीयश्चोष्मा इति ।

यद्यप्यत्र वार्त्तिककृता सूत्रं प्रत्याख्यातम्, तथापि तत्कृत-ऋ-ऌवर्णविषयकं वार्त्तिकं यथा शिक्षान्तरानुसारेण युक्तम्, तथात्र सूत्रकारस्यापि ह्रस्वादेशानुशासने सात्यमुग्रिराणायनीयप्रातिशाख्यानुसार्य्यर्द्धेकारौकारप्रतिनिवृत्तये सूत्रारम्भो युक्तिसिद्ध एव । यदि सूत्रं प्रत्याख्यायते वार्त्तिकमपि समानन्यायेन प्रत्याख्यानयोग्यम् ।

ननु छन्दोगानां सात्यमुग्रिराणायनीया अर्द्धमेकारमर्द्धमोकारञ्चाधीयते, "सुजाते ए अश्वसूनृते" "अध्वर्यो ओ अद्रिभिः सुतम्।" अत एङः सस्थानतरावर्द्ध एकारः अर्द्ध ओकारः स्याताम्। शाखाविशेषे गीतिवशादेवमुच्चारितम्। नैव लोके नान्यस्मिन् वेदेऽर्द्ध एकार अर्द्ध ओकारौ वास्ति।

५। एकादेशे दीर्घग्रहणम्।

यदि अतपराणि "आद्गुणः" (६।१।८७) दीर्घः, "वृद्धिरेचि" (६।१।८८) दीर्घ इति एकादेशे दीर्घग्रहणं कर्त्तव्यम्; अन्यथा 'खट्वा-इन्द्रः—खट्वेन्द्रः' "खट्वा ईषा—खट्वेषा" इत्यादौ आन्तर्य्यतः त्रिमात्रचतुर्म्मात्राणां स्थानिनां त्रिमात्रचतुर्म्मात्रा आदेशा भवेयुः।

न दीर्घग्रहणं कर्त्तव्यम्। "अकः सवर्णे दीर्घः" (६।१।१००) इत्यत्र दीर्घ इति योगविभागः करिष्यते। ततः एकः पूर्व्वपरयोरित्यधिकारे यो विहितः स दीर्घो भवतीति व्याख्यानं भवति।

एवं सति 'पशुम्' 'विद्धम्' 'पचन्ती'त्यत्र दीर्घप्रसङ्गः। पशुमित्यत्र "अमि पूर्व्वः" (६।१।१०६) इत्यस्मिन् "प्रथमयोः पूर्व्वसवर्णयोः" (६।१।१०१) इत्यतः पूर्व्वसवर्ण इत्यनुवर्त्तमानेऽपि यत् पूर्व्वग्रहणं करोति, तस्यैतत् प्रयोजनम्—यथाजातीयकः पूर्व्वस्तथाजातीयक उभयोः स्यात्। विद्धमित्यत्र "सम्प्रसारणाच्च" (६।१।१०७) त्यस्मिन् तस्यैव पूर्व्वशब्दस्यानुवर्त्तनात्। अथवा "हलः" (६।४।२) इति सूत्रे हल उत्तरस्य सम्प्रसारणस्य दीर्घत्वानुशासनात् तज्ज्ञापकबलान्न दीर्घो भवेत्। पचन्तीत्यत्रापि न दीर्घप्रसङ्गः। यतः "अतो गुणे" (६।१।९७) इत्यत्र "एङि पररूप" (६।१।९४) मित्यतः पररूपमनुवर्त्तते। पर इतीयता सिद्धे सति यत् रूपग्रहणं करोति तस्येदं प्रयोजनं यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्भवेत्। भवतु, 'खट्वर्श्यः' 'मालर्श्यः' इत्यत्र दीर्घवचनात् "अदेङ् गुणः" (१।१।२) इत्यनेन ह्यकारो न स्यात्, अनान्तर्य्यादेकारौकारौ न ततो विगृहीतश्रवणं प्रसज्येत।

यत्र क्रियमाणे न दोषस्तत्रैव भवतु, "वृद्धिरादैच्" (१।१।१) दीर्घः, "अदेङ् गुणो" (१।१।२) दीर्घः। तत्तर्हि दीर्घग्रहणं कर्त्तव्यम्? न कर्त्तव्यम्। गुणवृद्धि-

संज्ञाविधौ तपरनिर्द्देशात्त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तिः स्यात् । ननु तः परो यस्मात् स तपरः । तादपि परस्तपरः । यदि तादपि परस्तपरस्तदा "ऋदोरप्" (३।३।५७) इत्यत्र ऋकारस्य तात्परत्वात् 'यवः' 'स्तवः' इत्यत्र प्रसरः, न तु 'लवः' 'पवः' इत्यत्र । एष न तकारः, किन्तर्हि, तकारवद्दकारोऽसन्देहार्थो मुखसुखार्थो वा ।

तपरनिर्द्देशादिति । "वृद्धिरादैच्" (१।१।१) इत्यत्र तपरकरणमैजर्थः, "तादपि परस्तपर" इति वृत्तिः । अत्र भाष्यस्वरसानुसारिशेखरकारमते तपरकरणमसन्देहार्थम् गुणानामभेदकत्वान्न सवर्णग्राहकतेति । गुणानां भेदकत्वग्रहणे आ इति दीर्घस्याणत्वे न सवर्णग्रहणप्रसक्तिः । अकारेण गृह्यमाण आकारोऽण् भवतीति चेत्, माला अत्र माला आनीता इत्यत्र एकादेशे दीर्घवचनान्न त्रिमात्रचतुर्मात्राः । सुतराम् आकारं परिहाय ऐजर्थं तपरकरणमिति युक्तम् । आदैजित्यत्रैकत्रासन्देहार्थोऽन्यत्र त्रिमात्रचतुर्मात्राग्रहणार्थ इति कैयटोक्तयुक्त्या उभयतस्तस्य ग्रहणं भवति । गुणसंज्ञायां "तपरकरणं सर्वार्थ"मिति वृत्तिः । अत् इत्यत्र तपरकरणस्य चरितार्थतायामेङि न तस्य प्रसरः । अत्र वदामो दीक्षितेन सह "ऊकालोऽज्" (१।२।२७) सूत्रस्थभाष्यमनुसृत्य "अणुदित् सवर्णस्याप्रत्ययः" (१।१।६९) इत्यत्र "स्वं रूपं शब्दस्याशब्दसंज्ञा" (१।१।६८) इत्यतोऽशब्दसंज्ञेत्यनुवर्त्तते । ततः शब्दसंज्ञाव्यतिरिक्तस्थले सवर्णग्रहणमिति प्राप्ते गुणवृद्धिसंज्ञाविधौ तपरकरणमसन्देहार्थमिति सर्व्वं सुस्थम् । तादपीति । तादपि परस्तपरः इति पञ्चमीसमासः "सह्यिवहोरोदवर्णस्य" (६।३।११२) इति सूत्रज्ञापितत्वात् यद्यत्र पञ्चमीसमासो न स्यात्, अवर्णस्येति वर्णपदेनाकारस्यापि ग्रहणमाप्नुयात् । तादपि परस्तपर इत्यनेन भवल्लैङ्ग्यन्देन दीर्घाणां ग्रहणम् । दीर्घाणां ग्रहणेऽपि दीर्घैः पुनः स्वसवर्णानां ग्रहणं भवति । तेन त्रिमात्रादिग्रहणं तदवस्थमेव । कुत एतज्ज्ञायते ? "दीर्घाज्जसि च" (६।१।१०५) इति ज्ञापकेन । अनेनैव हि ज्ञापकात् प्रत्याहारेषपस्थितानां प्रागनुच्चारितानामाकारादीनां सवर्णग्राहकत्वमायाति । कथं कृत्वा ज्ञापकम् ? यतः सूत्रे चकारः क्रियते । यद्यत्र चकारो न स्यात्, पूर्व्वसूत्रात् (६।१।१०४) इस्वाकारादिचि दीर्घाकारात् जसीति व्यवस्था सम्भाव्यते । केवलमजादिषु प्रत्याहारस्यनिरूढलक्षणत्वात्, दीर्घस्याच्त्वाभावेऽमीषामित्यादिषु "इण्कोः" (८।३।५७) "आदेश-

प्रत्यययोः" (८।३।५६) इत्यनेन षत्वं, गौरीरित्यादिषु "प्रथमयोः पूर्व्वसवर्णः" (६।१।१०२) इत्यनेन शसि परतः पूर्व्वसवर्णदीर्घो न स्यात्। एवं सवर्णग्रहणानिवृत्तेः गुणवृद्धि-संज्ञायां तपरग्रहणं व्यर्थमिति चेत्, न। यत्किञ्चन संज्ञायां व्यर्थं संज्ञिनि तत् स्वीकर्त्तुं शक्यम्। कुतो वैतज्ज्ञायते? "ङमो ह्रस्वात्" (८।३।३२) इति सूत्रे 'ङमुट्' इति प्रत्याहारे कृतं टित्वं संज्ञायां व्यर्थं सत् संज्ञिभिः सम्बध्यते, तथेहापि। द-कार इति। दकारस्यासन्देहार्थत्वं मुखसुखार्थत्वञ्च निर्दिश्य तत्कालनिर्देशत्वं हि निवारितम्; किन्तु "तित् स्वरितम्" (६।१।१८५) इति सूत्रे "तपरस्तत्कालस्येति दकारोऽपि चर्त्वभूतो निर्दिश्यते" इति यत् भाष्यकारेणोक्तं तेनास्य विरोधः। एतद्दोष-परिहारार्थं कैयटस्त्वाह "थकारस्थानिको धकारस्थानिको वा दकारः" इति। शेखर-कारोऽप्याह "तपरसूत्रे दकारप्रश्लेषपक्षे तु धकारस्थानिको दकारो बोध्यः।" दीक्षितेन तु नायं पक्षो बहु मन्यते। तेन हि "प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय" इति परि-भाषामाश्रित्य "तित् स्वरित"मित्यत्र प्रत्ययाप्रत्यययोः सन्देहस्थले प्रत्ययग्रहणं सम्भव-तीति कृत्वा "तिति प्रत्ययग्रहण"मिति वार्त्तिकम्, ज्ञापकबलेन भाष्यकारस्य तत्प्रत्या-ख्यानञ्च अभ्युपेत्यवादत्वेन* परिहृतम्। "प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इति परिभाषा भाष्यवार्त्तिककाराभ्यां न क्वचिदाश्रिता" इति कैयटोक्तिः; "तस्यास्तु परिभाषाया भाष्यवार्त्तिकयोरिह। अदर्शनादयं यत्नो महाननाभिरादृतः॥" इति हरदत्तोक्तिश्च; "अङ्गस्येति (६।४।१) सूत्रप्रत्याख्यानाय भाष्ये कण्ठरवेणैव एतत्परिभाषोपन्यासादि" त्यक्त्वा प्रत्युक्तिः। "अङ्गस्ये"ति सूत्रस्य प्रत्याख्यानं न भाष्यकाराशयः, तत्परिभाषायाः व्यर्थत्वप्रदर्शनमेव, यतस्तदिदं सूत्रं विना "हलः" (६।४।२) इत्यनेन 'निरुत' मित्यत्र वेञः सम्प्रसारणस्याङ्गावयवगतहल्निर्द्धारणाभावात् दीर्घत्वं प्रसज्येतेति अभियुक्तस्याशयं स्वयमुन्नीयाह "तथापि थकारधकारस्थानिको दकार इत्यर्थ इति व्याख्यानक्लेशो निष्फलतया मूलस्वरसविरुद्धतया चादरानर्ह एव। 'दिव उदि'त्यादौ 'तित् स्वरित' मित्यस्य प्राप्तिरेव विरहेण दकारप्रश्लेषादेर्निर्वीजत्वा"दिति। उदिति संज्ञया संज्ञिन-उकारस्य संज्ञाव्यतिरिक्तं न किञ्चिदन्यत् फलमस्तीति निर्व्वीजत्वादित्युक्तम्। यदि

---

* अभ्युपेत्यवादः क्लेशेनाङ्गीकारः।

६ । वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ।*।

अथ विचार्य्यते । यत्र तेषु वर्णेषु वर्णान्तरसमानाकृतयो वर्णैकदेशाः, किमेतेषां ग्रहणेन तेषां ग्रहणं भवति न वा । यतोऽत्र समुदाया अप्युपदिश्यन्तेऽवयवा अपि । यदि समुदाया गृह्यन्ते तदवयवानां तदन्तर्वर्त्तित्वान्न कार्य्यस्वातन्त्र्यम । यतो ह्यचः प्रचलन् तदवयवैः प्रचलति । समुदायस्थस्यावयवस्यावयवरूपेण स्वतन्त्रग्रहणं स्यान्न वेति विचारणा । यदि स्यात् ।

स्यात् "अतो भिस ऐस्" (७।१।९) इत्यत्र अदिति ह्रस्व तान्त एव गृह्येत न त्वकारान्तः । एवं "तपरस्तत्कालस्ये"ति सूत्रमपि व्यर्थं भवेत् । दीक्षितप्रदत्ताभिरित्याद्याभिर्युक्तिभिर्यद्यपि दकारस्य धकारनिर्देशो न प्रयोजनत्वेन परिलक्ष्यते तथापि भाष्यद्वयस्य विरोधपरिहाराय प्राञ्चो यत्नं कृतवन्त इति तेषां भाष्याधीनत्वं दीक्षितस्य तु स्वातन्त्र्यमिति महदेव कुतूहलमुद्भावयति । वस्तुतस्तु "दकारप्रश्लेषपक्षे तु धकारस्थानिको दकार" इति शेखरकारोक्तिरेवादरणीया, यतः प्रयोजनमनुसृत्य पक्षान्तरग्रहणं सर्वत्रैव मुनिलिखितेषु परिलक्ष्यते । "अङ्गस्ये"ति सूत्रे "अर्थवद्ग्रहणे नानर्थकस्य" "प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहण"मिति परिभाषाद्वयमुपलक्ष्य वर्णग्रहणेषु परिभाषाद्वयस्यानुपस्थानत्वं कैयटेनोक्तम् । यत्र वर्णग्रहणं नास्ति तत्रैवमुपस्थीयत इति तदुक्तेरर्थमु[illegible] परिभाषेन्दुशेखरकारेण प्रत्ययग्रहणपरिभाषा एवं समर्थिता, "अतएव 'सनाशंसभिक्ष उः' (३।२।१६८) 'वले' (६।३।११८) इत्यत्र सन्वलयोः प्रत्यययोर्ग्रहणम्" । "सनाशंसभिक्ष उ"रित्यत्र सना न सनिधातोः किन्तु सन्प्रत्ययस्य "वले" इति सूत्रे वलप्रत्ययस्य च ग्रहणं भवति । अनभिधानं पक्षान्तरे व्याप्तिन्यायं समाश्रित्य वृत्तिकारेण सना धातोर्ग्रहणं साधितम् । "वले" इत्यत्र "पृषोदरादीनि यथोपदिष्टम्" (६।३।१०९) इत्यतो "यथोपदिष्ट"मनुवर्त्त्य प्रत्ययग्रहणं शब्देन्दुशेखरकारेण समर्थितम् । एवं दीक्षितेनादृता परिभाषा वार्त्तिककैयटाद्यनुरोधेनोपेक्षितापि नास्माभिरुपेक्ष्यतेऽनया प्रतीतिसौलभ्यात् ।

वर्णान्तरसमानाकृतय इति । अयं विभागो सूत्रकारेण वार्त्तिककारेण च स्वीकृतः । यतः "तस्यादित उदात्तमर्द्धह्रस्वम्" (१।२।३२) इति सूत्रे उदात्तानुदात्तस्वरसमाहारस्य स्वरितस्य कस्मिन्नंशे उदात्तः कस्मिन्नंशेऽनुदात्त इति प्रदर्शनाय वदति तस्य आदौ अर्द्धह्रस्व-

७। वर्णैकदेशा वर्णग्रहणेन चेत् सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः।

यदि वर्णग्रहणेन वर्णैकदेशा गृह्यन्ते तदा सन्ध्यक्षरे समानाक्षराश्रयो यो विधिः प्राप्नोति स प्रतिषेध्यः। यथा अग्ने + इन्द्र, वायो + उदकमित्यत्र "अकः सवर्णे दीर्घः" (६।१।१००) इति यद्दीर्घत्वं प्राप्नोति तन्निषेध्यम्।

मुदात्तं शिष्टार्द्धमनुदात्तम्। "एचोश्चोत्तरभूयस्त्वा"दिति वार्त्तिकेन तादृगंशकरणं लभ्यते। एवमंशग्रहणं सिद्धम्। इष्यन्ते च आकारेऽकारस्य ईकार इकारस्य ऊकार उकारस्य सदृशौ भागौ। ऋकारऌकारयोः सदृशौ रेफलकारभागौ तद्यथा ऋकारे उभयतोऽज्भक्तिरर्द्धमात्रा मध्ये रेफसदृशोऽर्द्धमात्रा, एवम् ऌकार उभयतोऽज्भक्तिः मध्ये ऌकारसदृशो भागः। एचु पूर्व्वभागोऽकारस्योत्तरभाग इवर्णोवर्णयोः। एवं स्थिते अग्ने + इन्द्र इत्यादौ अवयवकार्य्यं प्राप्नोति समुदायकार्य्यञ्च। तत्रावयवकार्य्यं ह्यन्तरङ्गम्, अवयवागमपूर्व्वकः समुदायावगमोऽतः समुदायकार्य्यं वहिरङ्गम्। अन्तरङ्गत्वात् शास्त्राश्रोदितत्वात् प्रत्यक्षत्वात् परत्वाच्चात्रावयवकार्य्यप्रसङ्गः। सुतरां दधीन्द्रवत् अग्ने + इन्द्र इत्यत्र सवर्णदीर्घत्वम्। अयादीनामवकाशस्तु अग्न आयाहीत्यत्र। न खल्वत्रावयवस्य यणादेशः प्राप्नोति। "येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवती"ति अथवा "मध्येऽपवादाः पूर्व्वान् विधीन् बाधन्ते नोत्तरानि"ति न्यायेन यणो बाधका अयादयः। समुदायस्यावयवे सिद्धे विचारणा किमवयवानां समुदायेन स्वातन्त्र्यग्रहणेन कार्य्यं स्यादथवा पुनरस्वातन्त्र्यस्वीकारेण। स्वातन्त्र्यग्रहणे तु अवयवानामसदृशत्वात् वर्णग्रहणेन विधीयमानं कार्य्यं न तत्तदवयवेषु प्रवर्त्तते। एतदेव प्रपञ्चयन्नस्वातन्त्र्यग्रहणमेव सिद्धान्तपक्षे स्थापयिष्यति।

समानाक्षराश्रयविधिरिति। "दश समाना" इति पूर्व्वाचार्य्यनिर्द्दिष्टाकां संज्ञा समानेति। समानाक्षराश्रयविधिरगाश्रयविधिर्दीर्घत्वमिति।

८। दीर्घे ह्रस्वविधिप्रतिषेधः।

दीर्घे ह्रस्वाश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। यथा आलूय प्रलूयेत्यत्र "ह्रस्वस्य पिति कृति तुक्" (६।१।७१) इति तुक् प्राप्नोति स निषेध्यः। नैष दोषः। "दीर्घात्" (६।१।७५) छे तुक् भवतीत्यनुशासनात् ज्ञापितं दीर्घे न ह्रस्वाश्रयो विधिर्भवति। यदि स्याद्दीर्घादिति सूत्रकरणं विफलं भवेत्। न विफलम्, अस्त्यन्यत् प्रयोजनम्। किम्? "पदान्ताद्वा" (६।१।७६) इति विभाषानुशासनम्। यदि केवलं विभाषानुशासनं प्रयोजनं स्यात्, दीर्घात् पदान्ताद्वेति ब्रूयात् न पुनर्योगविभागं कुर्य्यात्। इह तर्हि, मालाभिः खट्वाभिरित्यत्र "अतो भिस ऐस्" (७।१।९) इत्यैस्भावः प्राप्नोति। तपरकरणसामर्थ्यान्न भविष्यति। तर्हि याता वात्यत्र "अतो लोपः" (६।४।४८) आर्द्धधातुके इत्याकारलोपः स्यात्। इहापि तपरकरणसामर्थ्यान्न भविष्यति। तपरकरणेऽन्यत् प्रयोजनमस्ति। किम्? आकारस्य अकाररूपविभागद्वयस्य लोपो मा भूदिति। तपरे कृते परस्य लोपे कथं पूर्व्वस्य लोपो न भविष्यति? परलोपस्य स्थानिवद्भावात् "असिद्धवदत्राभात्" ((६।४।२२) इत्यनेनासिद्धत्वाच्च। एवं तर्हि "आतोऽनुपसर्गे कः" (३।२।३) इति ककारानुबन्धकरणं ज्ञापकमाकारस्यस्याकारस्य लोपो न भवतीत्यस्य। कथं कृत्वा ज्ञापकम्? आकारस्यस्याऽकारस्य लोपे कृते शिष्टाऽकार-प्रत्ययाकारयोः पररूपे कृते गोदः कम्बलद इति रूपं सिद्धं भवति सुतरां कित्करणमनर्थकं स्यात्। स्थानिवद्भावादसिद्धत्वाच्च न भवत्याकारस्य लोप इति पश्यन्नाचार्य्यः ककारमनुबन्धं करोति। नैतदस्ति ज्ञापकम् "तुन्दशोकपरिमृजापनुदोः" (३।२।५) इत्युत्तरार्थमेतत् स्यात्। यत्तर्हि "गापोष्टक्" (३।२।८) इति ककारानुबन्धकरणं तदनन्यार्थम्।

आकारस्येति। "सर्व्वस्य लोपो मा भूदि"ति भाष्यग्रन्थस्यार्थेन आह आकारस्याकाररूपविभागद्वयस्येत्यादि। यत्तर्हीति। कित्करणस्य त्वाकारलोपज्ञापकत्वाभावे छन्दोगाय इत्यत्राकारस्यस्याकारस्य लोपे शिष्टाकारप्रत्ययाकारयोः सिद्धस्य पररूपस्य धातुं प्रति अन्तवद्भावात्, तस्य च स्थानिवद्भावादसिद्धत्वाच्च पुनराकारत्वेनावस्थितेः

९। एकवर्णवच्च।

एकवर्णवच्च दीर्घो भवतीति वक्तव्यम्। किं प्रयोजनम्? वाचा तरतीत्यत्र "नौ-द्व्यचष्ठन्" (४।४।७) इत्यनेन द्व्यज्लक्षणष्ठन् मा भूत्. वाचा निमित्तमित्यत्र "गोद्व्यचो-ऽसंख्यापरिमाणाश्वादेर्यत् (५।१।३९) तस्य निमित्तं संयोगोत्पाताविति" इत्यनेन द्व्यज्लक्षणो यन्मा भूत्। अत्रापि गोनौग्रहणं ज्ञापकं दीर्घाद्व्यज्लक्षणो विधिर्न भवतीति।

अयन्तु सर्व्वेषामेव परिहारः।

"आतो धातोः" (६।४।१४०) इत्यनेन आकारान्तस्य* धातोर्भस्य लोपे कन्दोगे इति रूपं भवति न तु कन्दोगायेति। अत्रोच्यते। कन्दोगायेत्यत्र तु अकारमाश्रित्य "ङेर्यः" (७।१।१३) इत्यनेन यशब्दः कृतः "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये"त्यनया परिभाषया "आतो लोप" इत्यनेन आकारस्य लोपो भविष्यति। सन्निपातः द्वयोः सम्बन्धः, तन्निमित्तो विधिः सन्निपातलक्षणो विधिः, तद्विघातस्य सन्निपातविघातस्य अनिमित्तम् हेतुर्न भवति। अकारान्तत्वादेव यकारोत्पत्तिः, सुतराम् अकारयकारयोरत्र सम्बन्धः। तस्यैवाकारस्य त्वाकारत्वेन लोपे सन्निपातव्याघातो भविष्यत्यतस्तन्न भवति। "ङेर्य" इत्यत्र "कष्टाय क्रमणे" (३।४।१४) इति निर्द्देशात् सन्निपातपरिभाषाया अनित्यत्व-मङ्गीकृत्य "सुपि च" (७।३।१०२) इत्यनेन ङेस्थानिकेन यकारेण यादित्वाद्दीर्घत्वम्। अत्र तु कष्टायेत्यस्य निपातनत्वमाश्रित्य।

वाचेति। अत्र वाक्शब्दस्याऽऽकारस्यावयवग्रहणे सति द्व्यच्त्वप्रसङ्गः। द्व्यच्त्व-प्रसङ्गे तु ठन्यतौ प्राप्नुतः। तन्मा भूदिति प्रयोजनं दीर्घस्यैकवर्णत्वातिदेशनम्। गो-नौग्रहणं ज्ञापकमिति। यद्यत्र भागग्रहणप्रयुक्तं कार्य्यं स्यात्, न तदा गोनौग्रहणं कुर्य्यात्, यतः सूत्रस्थद्व्यच्शब्देनैव तयोर्ग्रहणं सिद्धम्। अतएव अग्रे एहीत्यत्र "एङः

---

* "आदेच उपदेशेऽशिति" (६।१।४५) इत्यनेनात्वं प्रागेव प्रत्ययोत्पत्तेर्भवतीति सुग्लः सुम्ल इति "आतश्चोपसर्ग" इति कप्रत्ययः। सुतरां गैधातोरप्याकारान्तत्वेन ग्रहणम्।

१०। नाव्यपवृक्तस्यावयवस्य तद्विधिर्यथा द्रव्येषु।

अव्यपवृक्तस्याभिन्नबुद्धिविषयस्य नावयवाश्रयो विधिर्भवति यथा द्रव्येषु। तद्यथा द्रव्येषु "सप्तदश सामिधेन्यो भवन्ती"त्यत्र न सप्तदशारत्निप्रमाणं काष्ठमग्नावभ्याधीयते। विषम उपन्यासः। प्रत्यृचं काष्ठखण्डान्यग्नावाधीयन्ते। अर्द्धचतुर्हस्ता हि वेदी। न तत्र सप्तदशारत्निप्रमाणस्य काष्ठस्याग्नावाधानं सम्भवति। यथा तर्हि, "सप्तदश प्रादेशमात्रीरश्वत्थीः समिधोऽभ्यादधीते"ति न खलु सप्तदशप्रादेशप्रमाणं काष्ठमग्नावभ्याधीयते। अत्रापि प्रतिप्रणवं काष्ठान्यग्नावाधीयन्ते, पूर्व्ववद्वेद्यामग्नौ चासम्भवः। यथा तर्हि तैलं न विक्रेतव्यं मांसं न विक्रेतव्यमिति निषेधात् गोः सर्षपाद्व्यपवृक्तं न विक्रीयते, अव्यपवृक्तं

पदान्तादति" (६।१।१०९) एकारभागस्याकारस्य ग्रहणेन पूर्व्वरूपमेकादेशः, अग्ने + इन्द्र वायो + उदकमित्यत्र सवर्णदीर्घो न भवति।

अव्यपवृक्तस्येति। व्यपवृक्तं व्यपवर्गो भेदः। अव्यपवृक्तमभिन्नबुद्धिविषयम्। अव्यपवृक्तस्यावयवस्येत्यत्र व्यधिकरणे षष्ठी। अव्यपवृक्तस्य अभिन्नाकारेण गृहीतस्य समुदायस्य योऽवयवस्तस्य अवयवाश्रयो विधिः पृथग्वर्णाश्रयं कार्य्यं न भवति यथा द्रव्येषु। भिन्नेषु द्रव्येषु भिन्ना तथा अभिन्नेष्वभिन्ना बुद्धिरुपस्थिता तथा कार्य्यं भवति न तु सम्भवमात्रेणेति दर्शयितुमाह तद्यथा द्रव्येष्वित्यादि। सामधेनीशब्द ऋचां वाचक उपचारात् काष्ठेषु वर्त्तते। सप्तदश सामधेन्य इत्यत्र भिन्नानि भिन्नानि काष्ठखण्डान्यगृहीत्वा न कोऽपि सप्तदशारत्निप्रमाणं काष्ठखण्डं गृह्णाति। अथ प्रतिवादी ग्रहणासम्भवं प्रदर्श्य, परिहरति प्रत्यृचमिति। एवं द्वितीयदृष्टान्तेऽपि। तैलं न विक्रेतव्यम् मांसं न विक्रेतव्यमिति। अत्र निषेधो गोः सर्षपाद्भिन्ने तैले मांसे पर्य्यवस्यति न त्वभिन्ने सर्षपे गवि च। सुतरां सिद्ध्यति भिन्ने भिन्नोऽभिन्नेऽभिन्नो विधिः। एवं सोमनख-

गावः सर्पपाश्च विक्रीयन्ते। तथा लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यमिति विधानात् देहा-द्व्यपवृक्तं लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यम्, देहादव्यपवृक्ते तु कामचारः।

यत्र तर्हि व्यपवर्गोऽस्ति। क्व चास्ति व्यपवर्गः? सन्ध्यक्षरेषु।

११। सन्ध्यक्षरेषु विवृतत्वात्।

सन्ध्यक्षरेषु यदवर्णमस्ति तदन्यस्मादवर्णाद्विवृततरम्, ये इवर्णोवर्णौ ते अन्याभ्यामिवर्णो-वर्णाभ्यां विवृततरे। सुतरामसावर्ण्यादनावयवाग्रहणम्। अथवा पुनर्नरसिंहवज्जा-त्यन्तरत्वान्न पृथक् गृह्यन्ते।

१२। अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्त्तव्यम्।

दृष्टान्तेऽपि बोध्यम्। अभिन्नतया परिगृहीता वर्णा न भिन्नत्वेन परिगृहीता भवन्तीति दृष्टान्ततो विनिगमः।

यत्र तर्हीति। सन्धीयमानावयवत्वात् सन्ध्यक्षरेषु व्यपवर्गो भागोऽस्ति। तत्र का गतिः? सन्ध्यक्षरेषु विवृतत्वादिति। नर+एतीत्यत्र एकारस्थाकारो विवृततरः, अतः विवृतेन पूर्वस्थेनाकारेणासावर्ण्यात्; नरे+इहीत्यत्र एकारस्थेकारो विवृततरः, अतः परस्थेन विवृतेनेकारेणासावर्ण्यादवयवग्रहणासम्भवे न दीर्घत्वम्। एवमाकारादिषु अवयवस्य भेदेनाग्रहणात् अग्रहणम् सन्ध्यक्षरस्थस्यावयवस्य तथासावर्ण्यात्। अथ-वेति। नरसिंहयोः सम्मेलनेन नरसिंह इत्येका जातिः। न हि तत्र पृथक्त्वेन नरो वा सिंहो वा परिगृह्यते। तथा सन्धीयमाना अपि सन्ध्यक्षरा जात्यन्तराक्रान्त-त्वादभिन्नत्वेनैव परिगृहीता भवन्ति।

(१) नुड्विधौ तावत्। वर्णैकदेशेन वर्णाग्रहणात् "तस्मान्नुड् द्विहलः" (७।४।७१) इत्यत्र हल्ग्रहणेन ऋकारैकदेशस्य रेफस्य ग्रहणादृकारग्रहणं स्यात्तदत्र न भवति, तस्मादिह सूत्रे आनृधतुरानृधुरिति सिद्धये ऋकारे चेति वक्तव्यं भवति। यदि ऋकारैकदेशरेफग्रहणं स्यात् द्विहल इत्यनेनैव ऋकारस्यापि ग्रहणं सिद्धं भवेत्। अग्रहणेऽपि न दोषः। कथम्? "तस्मान्नुड् द्विहल" इत्यतो द्विहल्ग्रहणमपनीय 'तस्मान्नुड्" इत्येव सूत्रं कर्त्तव्यम्। एवं सति "अत आदेः" (७।४।७०) इत्यनेन सिद्धम् आटतुः आटुरित्यत्रापि नुट् प्राप्नोति। न भविष्यति, "अश्नोतेश्च" (७।४।७२) इत्यस्य नियमार्थत्वात्। अकारोपधस्य यदि भवति, अश्नोतेरेव, न तु अटत्यादेरिति नियमेन सामान्याकारोपधानामन्येषां निवृत्तिर्भवति।

(२) लादेशे तावत्। वर्णैकदेशेन वर्णाग्रहणात् कॢप्तः कॢप्तवान् इत्यस्य सिद्धये "कृपो रो लः" (८।२।१८) इत्यत्र ऋकारस्य चेति वक्तव्यं भवति। वर्णैकदेशेन वर्णग्रहणे तु र इत्यनेनैव सिद्धं स्यात्। अग्रहणेऽपि न दोषः। कथम्? "कृपोरोलः" इत्यत्र अविभक्तिको निर्देशः कृप उः रः लः कृपो रो ल इति। अथवा उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवतीति।

(३) विनामे तावत्। मातृणां पितृणामित्यादिसिद्धये "रषाभ्यां नो णः समानपदे" (८।४।१) इत्यत्र ऋकाराच्चेति वक्तव्यम् भवति। ग्रहणपक्षे "रषाभ्या"मित्येव सिद्धम्।"न सिद्ध्यति रेफात् परा याऽज्भक्तिः तया व्यवहितत्वात्। "अड्व्यवाय" (८।४।२)

अश्नोतेरिति। अत्र अश्नोतिग्रहणं न नियमार्थं किन्तर्हि श्नाग्रहणनिवृत्त्यर्थं चेत् तदा अश्नोतिरित्यपठित्वा नाश्न इत्येव ब्रूयात्।

अथवेति। "कृपो रो ल" इत्यत्र रश्रुतिसामान्यात् यत्र केवलो रेफः यत्र ऋकारस्थो रेफः उभयोर्ग्रहणं भवति। एवं लश्रुतिसामान्यात् यत्र केवलो रेफस्थले लकारादेशो यत्र ऋकारैकदेशविकारद्वारेण लृकारः उभयोर्ग्रहणं भवति। ततो हि "लुटि च कॢपः" (१।३।९)। "तासि च कॢपः" (७।२।६०) इत्यादयो निर्देशा उपपद्यन्ते।

अड्व्यवाय इति। ह्रस्वेन ऋकारेण यथा दीर्घो गृह्यते तथा ऋकारभागोऽपि।

इत्येव सिद्धम्। न सिध्यति। कथम्? ये व्यपवृक्ता अपि वर्णा भवन्ति, वर्णग्रहणेन त एव वर्णैकदेशा गृह्यन्ते। रेफात् परो योऽच्भागः, न स दृश्यते क्वचिदपवृक्तत्वेन। एवं तर्हि व्यवायेऽपीति (८।४।२) योगं विभज्य व्यवाये च रषाभ्यां नो णो भवतीति। ततः अट्कुप्वाङ्नुम्भि (८।४।२) रिति तु—एतैरेवाक्षरसमाम्नायिकैर्भवति नान्यैरिति—नियमार्थं। अग्रहणपक्षेऽपि न दोषः यतः क्षुभ्नादिषु (८।४।३९) नृनमनशब्दपाठो ज्ञापयति ऋकारान्नो णो भवतीति। नैतज्ज्ञापकम्, नार्नमनिरिति वृद्ध्यर्थमेतत् स्यात्। तृप्नोतीति शब्दपाठात् तदा सिध्यति। अन्तरङ्गं हि णत्वं वृद्धेर्बहिरङ्गत्वात् नृनमनशब्द-पाठोऽपि सिध्यति। अथवा छन्दस्यवग्रहात् (८।४।२६) इत्यतः ऋत इति योगविभागं कृत्वा ऋतो नो णो भवतीति भवति। ततः छन्दस्यवग्रहात् ऋत इत्येव।

१३। प्लुतावैच इदुतौ।

एच इदुतौ प्लुतौ भवत इति वक्तव्यं भवति। ग्रहणपक्षे गुरोष्टेरित्येव प्लुतिः सिद्धा। अग्रहणपक्षेऽपि "प्लुतावैच इदुतौ" (८।२।१०६) इति सूत्रकरणान्न दोषः।

१४। तुल्यरूपसंयोगे द्विव्यञ्जनविधिः।

तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति। कुक्कुटः पिप्पली पित्तमिति।

न सिध्यति कथमिति। भागस्य स्फुटप्रतिभासाभावादव्यपवृक्तत्वम्।

एतैरेवेति। षडादिषु ये अक्षरसमाम्नायिका दृश्यन्ते तैरेव व्यवधाने णत्वं भवतीति नियमात् कॢप्तेनेत्यत्र न णत्वप्राप्तिः। आकारादयोऽक्षरसमाम्नायिका यतोऽकारादिभिस्ते प्रत्यायिताः, भक्तिस्तु न तथाक्षरसमाम्नायिका नापि सवर्णग्रहणेन प्रत्यायिता।

गुरोष्टेरिति। ऐकारो गुरुस्तस्य टेरिति प्लुतम्।

प्लुताविति। एचो व्यपवृक्तत्वेऽपि भागयोर्विवृततरत्वात् प्रयत्नभेदादक्षरसमाम्नायिकै-कारौकाराभ्यां ग्रहणं न सिध्यति, अग्रहणात्त्वप्लुत्वाभावः, सुतरां प्लुत्वं वक्तव्यं भवति।

तुल्यरूप इति। अवयवस्य तुल्यरूपत्वात् संयोगोऽपि तुल्यरूपः।

मात्राकालावगमात् यङ्णपक्षेऽयङ्णपक्षेऽपि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । मात्रिकं व्यञ्जनं नास्ति । अनुपदिष्टत्वान्न शक्यं विज्ञातुं प्रतिपत्तुम् । भवतु तावदण्स्वनुपदिष्टत्वाच्च द्विव्यञ्जनविधिरसिद्धिः यद्याण्सूपदेशोऽप्यस्ति तथापि व्यञ्जनस्य मात्रिकत्वाभावात् संयोगसंज्ञा न भवति, यथा सँय्यन्ता सँव्वत्सरः यँल्लोकम् ।

हयवरट् । ५ ।

म॰ इ॰ । ह य व र इत्येतान् वर्णानुपदिश्य पूर्व्वांश्चान्ते टकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन "अश्छोटि" (८।४।६३) इत्यकारेण । अयं रेफो यकारात् परउपदिश्यते । तस्य यग्रहणेन ययग्रहणेन च ग्रहणे सति 'स्वर्नयति' 'प्रातर्नयती'त्यत्र "यरोऽनुनासिकेऽनुनासिको वा" (८।४।४५) इति अनुनासिकः प्राप्नोति । 'मद्रह्रदो' 'भद्रह्रदः'-इत्यत्र द्विर्व्वचनं प्राप्नोति "अचो रहाभ्यां द्वे" (८।४।४६) इति । 'कुण्डं रथेन' 'वनं रथेन' इत्यत्र "अनुस्वारस्य ययि परसवर्णः" (८।४।५८) इति परसवर्णः प्राप्नोति । नैष दोषः । आकृतौ पदार्थे समुदाये सकृल्लक्ष्ये लक्षणं प्रवर्त्तत इत्येतस्मिन् दर्शने "यरोऽनुनासिकेऽनुनासिको वा" (८।४।४५)ऽन्तरतमो भवतीत्येवमेतत् प्रवर्त्तते । तदनेन गकारादीनामुकारादयो ये यथा स्वस्थानतो गुणतश्चान्तरतमास्ते सर्व्वे विहिताः । ये तु न

अनुपदिष्टत्वादिति । अक्षरसमाम्नायिकेऽपठितत्वं शाङ्कशास्त्रेणागृहीतत्वमनुपदिष्टत्वम् । मात्रिकत्वाभावादिति । व्यञ्जनस्यार्द्धमात्रिकमिति पक्षे चाण्मात्रत्वादेकत्वप्राप्तिरिति प्रक्रियादशायां स्वीकार्य्यं शिष्टाचारात् ।

स्थानतः नापि गुणतः स्थानमात्रेण गुणमात्रेण वा अन्तरतमास्ते सर्व्वे निवर्त्तिता इति स्थानमात्रान्तरतमो रेफस्य णकारो न भवति । द्विर्व्वचनेऽपि रेफस्य यरन्तर्भावे सति यत् कार्य्यत्वं प्राप्तं तन्मात्राच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः । "अनुस्वारस्य ययि परसवर्णः" (८।४।५८) इत्येतदप्यनुस्वारान्तरतमं सकृदेव परसवर्णं विदधाति । न च रेफस्यानुस्वारान्तरतमः सवर्णोऽस्तीति न भविष्यति 'कुण्डं रथेन' 'वनं रथेन' इत्यत्र ।

अटां मध्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्त्तव्यः । किं प्रयोजनम् ? उर≍केण, उरःकेण ; उर≍पेण, उरःपेण । अड्व्यवाय (८।४।२) इति णत्वं यथा स्यादिति ।

भा. स. । सर्व्वे वर्णाः सकृदुपदिष्टाः, हकारोऽयं पूर्व्वश्च परश्चेति द्विरुपदिश्यते । यदि परत्रोपदिश्येत ;

१ । हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम् ।

हकारस्य परत्रोपदेशे अड्ग्रहणेषु हग्रहणं कर्त्तव्यम् । 'महान् हि सः' इत्यत्र 'महाँ हि स' इति सिद्धये "दीर्घादटि समानपदे" (८।३।९) "आतो टि" (८।३।२) हकारे चेति वक्तव्यं भवति, अन्यथा पूर्व्वसूत्रेण रुः परसूत्रेणानुनासिको न प्राप्नोति ।

२ । उत्वे च ।

उत्वे च हग्रहणं कर्त्तव्यम् । 'ब्राह्मणा: हसति' इत्यत्र 'ब्राह्मणो हसती'त्युत्वसिद्धये "अतो रोरप्लुतादप्लुते" (६।१।११३) "हशि च" (६।१।११४) हकारे चेति वक्तव्यं भवति, अन्यथा हशि उत्वं न स्यात् ।

अस्तु तर्हि पूर्व्वोपदेश: ।

३ । पूर्व्वोपदेशे कित्त्व-क्से-ड्विधयो झल्-ग्रहणानि च ।

यदि पूर्व्वत्रोपदेश: (१) "रलो व्युपधाद्धलादे:" (१।२।२६) इत्यनेन 'स्निहित्वा' 'स्नेहित्वा' 'स्निहिषति' 'स्नेहिषती'ति वा कित्त्वं न प्राप्नोति, सुतरां कित्त्वं विधेयं भवति ; (२) "शल इगुपधादनिट: क्स:" (३।१।४५) इत्यनेन 'अघुक्षत्' 'अलिक्षत्' इत्यत्र क्सो न प्राप्नोति, सुतरां क्सोऽत्र विधेयो भवति ; (३) "रुदादिभ्य: सार्व्वधातुके" (७।२।७६) इत्यनेन 'रुदिहि' 'स्वपिहि' इति वलादे: सार्व्वधातुकस्य इड् न प्राप्नोति, सुतरां इड्विधेयो भवति ; (४) 'अदाग्धाम्' 'अदाग्धम्' इत्यत्र "दादेर्धातोर्घ:" (८।२।३२) इत्यनेन प्राप्तस्य घत्वस्यासिद्धत्वेऽपि हकारस्य झल्त्वात् "झलो झलि" (८।२।२६) इत्यनेन सलोप: स्यात्, हकारस्य केवलं पूर्व्वत्रोपदेशे तन्न प्राप्नोति । तस्मात् हकार: पूर्व्वश्चैवोपदेष्टव्य: परश्च । यत: प्रयोजनानुसार्य्येव वर्णानामुपदेश: ।

इदं तावत् विचार्य्यम् । रेफोऽत्र ह य व र ट् इत्येवमुपदिश्य परत्रोपदिष्ट । ह र य व ट् इत्येवं कृत्वा पूर्व्व एवोपदिश्यते पर एव वा यथान्यासम् । कश्चात्र विशेष: ।

उत्वे चेति । इह अशि हग्रहणं कर्त्तव्यमित्यपि वक्तव्यं भवति । भो हसति इत्यत्र "भोभगोअघोअपूर्व्वस्य योऽशि" (८।३।१७) इत्यनेन रोर्यत्वार्थम् "हलि सर्व्वेषाम्" (८।३।२२) इत्यनेन यलोपार्थम् इहानुवर्त्तमानेऽशि पूर्व्व एव हकारग्रहणं कर्त्तव्यम् । एवञ्च इणि च हग्रहणं वक्तव्यं भवति, तद्यथा 'लिलिहिढ्वे लिलिहिध्वे' इत्यत्र मूर्द्धन्य-विकल्पसिद्धये "इण: षीध्वंलुङ्लिटां धोऽङ्गात्" (८।३।७८) इत्यतो "विभाषेट:" (८।३।७९) इत्यत्र यत् इणनुवर्त्तते तत्र हकारग्रहणं कर्त्तव्यम् ।

विचार्य्यमिति । उभयत्रोपदेशे दोषा अपि सन्ति प्रयोजनान्यपि, अतो वदति विचार्य्यमिति ।

४। रेफस्य [परोपदेशे]ऽनुनासिकद्विर्वचन-परसवर्णप्रतिषेधः । * ।

रेफस्य परत्नोपदेशे अनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः ।

(१) अनुनासिकस्य यथा 'स्वर्णयति' प्रातर्णयती'त्यत्र "यरोऽनुनासिकेऽनुनासिको वा" (८।४।४५) इत्यनेन रेफस्यानुनासिकत्वे णकारत्वं भवति तत् प्रतिषेध्यम् ।

(२) द्विर्वचनस्य यथा 'भद्रह्रदः' "भद्रह्रदः" इत्यत्र "अचो रहाभ्यां द्वे" (८।४।४६) यर इति द्विर्वचनं प्राप्नोति तत्प्रतिषेध्यम् ।

णकारत्वमिति । स्थानेऽन्तरतमत्वात् णकारप्राप्तिः । वक्ष्यति णकारो हि रेफस्य स्थानमात्रेणान्तरतमः, न तु स्थानतो गुणतश्च । अतएव रेफस्य स्थाने णकारो न भविष्यतीति ।

द्विर्वचनमिति । अचः पश्चात् हकारात् परो रेफः यरन्तर्भावात् द्विरुच्यते, तस्य "रो रि" (८।३।१४) इत्यनेन प्राप्तं लोपं प्रति द्वित्वस्यासिद्धत्वात् लोपो न स्यात्, "झलो झलां झलि लोपः" (८।४।६४) इत्यनेन लोपस्य पाक्षिकत्वात् पक्षे रेफद्वयस्य श्रवणप्रसङ्गः । वक्ष्यतेऽत्र "रहाभ्या"मित्यनेन रकारस्य निमित्तत्वं तदस्य कार्य्यत्वं निवारयिष्यतीति दोषापनय इति। एवं सति दध्युदकमित्यादौ "यणो मयो द्वे भवतः" इत्यनेन 'दध्ध्युदक'मिति न प्राप्नोति । कथम् ? दध्युदकमित्यत्र पूर्व्वं "यणो मय" इत्यस्य 'यण' इति पञ्चमीं कृत्वा 'दद्ध्युदक'मिति धकारस्य द्वित्वं कृतम् । ततः यण इत्यस्य निमित्तत्वात् 'दध्ध्युदक'मित्यत्र तस्य कार्थित्वं न प्राप्नोति । इकां स्थाने जातानां यकारादीनां न निमित्तत्वं ; निमित्तत्वन्तु स्थानिनामिकामेव । प्रतिलक्ष्य' निमित्तकार्थित्वयोर्भिन्नभावेन ग्रहणं भवति, यथा 'चिचीषती'ति दीर्घत्वद्विर्वचनयोः, तथाच 'वव्रश्चे'त्यत्र "लिट्यभ्यासस्ये"ति (६।१।१७) सम्प्रसारणम् ततो रेफस्य ऋकारत्वे "उरत्" (७।४।६६) इत्यनेन ऋकारस्य अत्वम् । तस्य अचः परस्मिन्निति (१।१।५७) स्थानिवद्भावात् "न सम्प्रसारणे सम्प्रसारणम्" (६।१।३७) इति लिट्यभ्यासस्येत्यनेन वत्वं न । अत्र लिटो निमित्तत्व, तथापि प्रतिलक्ष्यं भिन्नत्वेन गृहीत्वैवं सिद्धान्तितम् ।

(३) परसवर्णस्य यथा 'कुण्डं रथेन' 'वनं रथेने'त्यत्र "अनुस्वारस्य ययि परसवर्णः" (८।४।५८) इत्यनेन परसवर्णः प्राप्नोति तत् प्रतिषेध्यम् ।

अस्तु तर्हि पूर्व्वोपदेशः ।

५ । पूर्व्वोपदेशे किक्त्वप्रतिषेधो व्यलोपवचनञ्च ।

यदि पूर्व्वोपदेशः, (१) किक्त्वं प्रतिषेध्यम् । 'देवित्वा' 'दिदेविषति' इत्यत्र "रलो व्युपधात्" (१।२।२६) इत्यनेन किक्त्वं प्राप्नोति । नैष दोषः । कथम् ? रलो व्युपधादित्यत्र रलोऽव् व्युपधादित्येवं विज्ञातव्यं, तेन अवकारान्ताद्व्युपधादित्यदोषः । (२) व्यलोपवचनञ्च यथा 'गौधेरः' 'पचेरन्' 'यजेरन्' 'जीरदानुः' इत्यत्र "लोपो व्योर्वलि"

कुण्डं रथेनेति । "वा पदान्तस्य" (८।४।५९) इत्यनेन पक्षे रेफः प्रवर्त्तते । अनुनासिक एव परसवर्णो भवितव्य इति नियमाभावात् रेफः, तस्य चासिद्धत्वात् "रोरी"-त्यनेन न लोपः । अत्रापि अन्तरतमसवर्णत्वाभावान्न भविष्यति । बृहद्विवरणकारमते तु "अणोऽप्रगृह्यस्यानुनासिकः" (८।४।५७) इत्यतो "अनुस्वारस्य ययि परसवर्णः" (८।४।५८) इत्यत्रानुनासिकानुकर्षणान्न दोषः ।

पूर्व्वोपदेश इति । पूर्व्वोपदेशे ह र य व ट् इति स्थिते । "रलो व्युपधा"दित्यत्र वकारान्तेष्वपि किक्त्वप्रवृत्तेः 'देवित्वा' 'दिदेविषती'त्यत्र पक्षे गुणनिषेधः प्राप्नोति, "लोपो व्योर्वली"त्यत्र रेफे परे यवयोर्लोपो न स्यात् । वलीत्यत्र रलीति चेदुच्यते हय्गतौ 'हय्या'दित्यत्र यकारेऽतिप्रसङ्गः ।

गौधेर इति । "गोधाया ढ्रक्" (४।१।१२९) इत्यनेन गोधाशब्दात् ढ्रक्प्राप्तौ "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" (७।१।२) इत्यनेन ढस्य एयादेशः । ततः ढ्रगित्यत्र एय् + रक् इत्येवं स्थितिः । रकारस्य पूर्व्वोपदेशे वलि तस्याभावात् यकारलोपोऽत्र न प्राप्नोति । एवं 'पचेरन्' 'यजेरन्' इत्यत्र "लिङः सीयुट्" (३।४।१०२) इति सीयुट् । तत्र टेश्चविस्यर्थस्य टकारस्य उच्चारणार्थस्योकारस्य च लोपे 'सीय्' इति स्थिते "लिङः सलोपोऽनन्त्यस्य" (७।२।७९) इत्यनेन सलोपे ईय् इत्यस्य स्थितिः । "भाष्य

(६।१।६६) इत्यनेन यवयोर्लोपो न प्राप्नोति। नैष दोषः, व्यं वंलीत्यत्र रेफोऽपि निर्दिश्यते रेफे च वलि चेति।

अथवा पुनरस्तु परोपदेशः। ननु चोक्तं "रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध" इति। न सन्ति रेफोष्मणां सवर्णा इति अनुनासिकस्य परसवर्णस्य च प्रतिषेधो न वक्तव्यः। द्विर्वचनप्रतिषेधोऽपि न कर्त्तव्यः, यतः रहौ न कार्यिणौ द्विर्वचनस्य, किन्तु निमित्तम्। तद्यथा "ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाता"मिति परिवेषणपरायणौ अपरेषां ब्राह्मणानां भोजने निमित्तभूतौ माठरकौण्डिन्यौ ब्राह्मणावपि नेदानीं तौ भुञ्जाते।

इदं विचार्यते। विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमा अयोगवाहाः। न क्वचिदेते उपदिश्यन्ते अथ च श्रूयन्ते। तेषां कार्यार्थ उपदेशः कर्त्तव्यः। कथमिमे अयोगवाहाः? अयुक्ताः वहन्ति, अनुपदिष्टाश्च श्रूयन्ते। क्व पुनरेषामुपदेशः कर्त्तव्यः?

६। अयोगवाहानामट्सु णत्वम्।

अयोगवाहानां णत्वार्थम् अट्सु उपदेशः कर्त्तव्यः। तथा सति, 'उरःकेण' 'उरᳵकेण', 'उरःपेण' 'उरᳶपेण' इत्यत्र अड्व्यवाये (८।४।२) इति णत्वं सिद्धं भवति।

रम्" (३।४।१०५) इत्यनेन रम् भूत्वा ईय्+रम् इति संस्थाने यकारलोपाप्राप्तिः। 'जीरदानुः' इत्यत्र जीवेरदानुक् इति वकारलोपाप्राप्तिः।

अयुक्ता इति। प्रत्याहारार्थपाठाभावात् अयुक्ताः असम्बद्धाः। प्रत्याहारार्थपाठः, ग्रहणकशास्त्रेषु च प्रत्यायनमुपदेशः। अयोगवाहानां नास्ति स द्विविधोपदेशः। अनुपदिष्टत्वादेव तेषामयुक्तत्वम्। अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां ते अयोगाः। वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः। अयोगाश्च ते वाहाश्चेति कर्मधारयः।

अड्व्यवाय इति। अट्सु अयोगवाहानां ग्रहणे विसर्जनीयजिह्वामूलीयोपध्मानीयैर्व्यवहितेऽपि णत्वं सिद्ध्यति।

७। शर्षु [जश्भावषत्वे]। *।

जश्भावषत्वार्थं तेषां शर्षूपदेशः कर्त्तव्यः। उब्जिधातुरुपध्मानीयोपधः पठ्यते। तस्य शर्षु पाठे झलत्वं स्यात्। झलत्वे तु "झलां जश् झशि" (८।४।५३) इति जश्त्वे कृते 'उब्जिता' 'उब्जितु'मिति रूपं सिद्ध्येत्। उब्जेरुपध्मानीयोपधत्वेन पाठे 'उब्जिजिषती'ति पदं न सिद्ध्यति, यत उपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। उब्जेर्दकारोपधत्वेन पाठे "न न्द्राः संयोगादयः" (६।१।३) इत्यनेन उब्जिजिषतीति पदं सिद्ध्यति।

यदि दकारोपधः पठ्यते का रूपसिद्धिः? 'उब्जिता' 'उब्जितु'मिति।

८। असिद्धे भ उब्जेः।

असिद्धप्रकरणे "स्तोः श्चुना श्चुः" (८।४।४०) इति पठित्वा तदनन्तरं "भ उब्जे"रिति पाठः। ततः श्चुना योगे दकारो भकारो भवतीति सूत्रार्थः।

तत्तर्हि वक्तव्यम्? न वक्तव्यम्। "भुजन्युब्जौ पाण्युपतापयो"(७।३।६१)रिति दर्शनात् निपातनादेव सिद्धम्। 'अभ्युद्गः' 'समुद्गः' इहापि तर्हि प्राप्नोति।

उपध्मानीयादेरिति। "अजादेर्द्वितीयस्य" (६।१।२) इत्यनेन प्राप्ते द्विर्वचने "झलां जश् झशी"ति जश्त्वम् असिद्धम्। "पूर्वत्रासिद्धीयमद्विर्वचने" इति सिद्धत्वे हलादिशेषेण (७।४।६०) भकारस्य निवृत्तौ 'उबिजिषती'ति पदं भवति।

सिद्ध्यतीति। वक्ष्यमाणेन दकारस्य भत्वेनेति शेषः।

निपातनादिति। "भुजन्युब्जौ पाण्युपतापयो"रिति घञि कुत्वाभावनिपातनार्थं सूत्रे बकारोच्चारणेनानुमीयते उब्जेरकुत्वविषये दकारस्य भकारविषयकं वचनमस्ति। तदनुमीयमानवचननिबन्धोऽसिद्धप्रकरणे" स्तोःश्चुनाश्चु"रित्यनन्तरं" 'उब्जेर्भ' इति। एवं सति 'स्तोःश्चुने'ति पदद्वयलाभात् कल्पनागौरवाभावः, 'उब्जिजिषतीति' पदसिद्धिरपि। तत्र "न न्द्राः संयोगादयः" (६।१।३) इत्यनेन द्विर्वचननिषेधः कर्त्तव्यः न तु द्विर्वचनम्। द्विर्वचननिषेधमात्रपर्यवसाने "पूर्वत्रासिद्धीयमद्विर्वचने" इत्यस्याप्रवृत्तिः, तस्य द्वि द्विर्वचने कर्त्तव्ये प्रवृत्तेः। एवं भत्वस्यासिद्धत्वात् "हलादिः शेषः" (७,४।६०) इत्यस्याप्रवृत्तौ

निपातनमिदमकुत्वविषये। अथवा नैतदुक्तं रूपम्। अभि उदिति द्व्युपसर्गात् गमेः डो विधीयते। अभ्युद्गतः 'अभ्युद्गः' समुद्गतः 'समुद्गः' इति।

षत्वस्य प्रयोजनम्। शर्षु अयोगवाहानां ग्रहणे "शर्व्यवाये" इत्यनेनैव 'सर्पिःषु' 'धनुःषु' इत्यादिषु षत्वं सिद्धं भवति "नुम्विसर्जनीयशर्व्यवायेऽपि" (८।३।५८) इति विसर्जनीयग्रहणं कर्त्तव्यं न भवति। अनुस्वारग्रहणे नुम्ग्रहणमपि शक्यतेऽकर्त्तुम्। 'सर्पींषि,' 'धनूंषि' "शर्व्यवाय" इत्यनेनैव सिद्ध्यति। नुम्ग्रहणमवश्यकर्त्तव्यम्। नुमो योऽनुस्वारस्तत्रैव यथा षत्वं स्यात् मान्यत्र यथा पुंसि।

अथवा अविशेषेणोपदेशः कर्त्तव्यः। किं प्रयोजनम्?

९। अविशेषेण संयोगोपधासंज्ञाऽलोन्त्य-द्विर्वचनस्थानिवद्भावप्रतिषेधः।

अविशेषेण (१) संयोगसंज्ञाप्रयोजनम्। 'उ ≍ ब्ज' इत्यत्र उपध्मानीयस्य जश्त्वे तस्य संयोगसंज्ञायामसिद्धत्वात् "हलोऽनन्तराः संयोगः" (१।१।७) इति संयोगसंज्ञा न, संयोगसंज्ञाभावे गुरुसंज्ञा न। गुरुसंज्ञाया अभावे गुरोरिति (८।२।८६) प्लुतो न

'उब्जिजिषती'त्यत्र द्विर्वचनं सिद्धम्, यद्यपि पूर्व्वोक्तानुमानाग्रहणं, तथापि दकारोपदेश-सामर्थ्यात् द्वित्वे कृते दकारस्य बत्वं प्रवर्त्तते।

अकुत्वविषय इति। अनुमानपक्षाग्रहणात् 'अभ्युद्ग' इत्यत्र दकारस्य बकारो न भवति अकुत्वविषय एव बकारनिपात इत्यभ्युपगमात्।

नुम्ग्रहणमिति। "अनुस्वारस्य शर्त्वात् तद्व्यवाये षत्वे सिद्धे नुम्ग्रहणं नियमार्थं, नुमो योऽनुस्वारस्तत्रैव यथा स्यादन्यत्र मा भूत् पुंस्विति।"

अविशेषेणेति। यत्र यत्र प्रयोजनं तत्र तत्रोपदेशः कर्त्तव्य इति प्रयोजनविशेष-मनपेक्ष्य सकलप्रयोजनोद्देशेनोपदेशोऽविशेषः।

भवति, अतः संयोगसंज्ञाप्रयोजनम् । (२) उपधासंज्ञाप्रयोजनम् । विसर्जनीयविशेषणत्वेन "इदुदुपधस्य चाप्रत्ययस्य" (८।३।४१) इति ग्रहणं कर्त्तव्यम् 'दुष्कृतं' 'निष्कृतम्' 'दुष्पीतम्' 'निष्पीतम्' इत्यादिषु षत्वं यथा स्यात् । नेदं प्रयोजनम् । कथम् ? नात्र विसर्जनीयः किन्तर्हि, सकारो विशेष्यते । इदुदुपधस्य सकारस्य यो विसर्जनीयः स इति । अथवोपधाग्रहणमकृत्वा इदुद्भ्यां परस्य विसर्गस्येति इष्टसिद्धिः । (३) अलोन्त्यविधिश्च प्रयोजनम् । 'वृक्षस्तरति' 'प्लक्षस्तरति' इत्यत्र विसर्जनीयान्तस्य पदस्य उ इति पक्षेऽलोऽन्त्यस्य विधयो भवन्तीति अन्त्यस्य सत्वं यथा स्यात् । "निर्दिश्यमानस्यादेशा भवन्ती"ति परिभाषया सिद्धमेतत्, अतो नास्तीदमपि प्रयोजनम् । (४) द्विर्वचनं प्रयोजनम् । 'उर‿कः' 'उर‿पः' इत्यत्र "अनचि च" (८।४।४७) अच उत्तरस्य यरो द्वे भवत इति विधीयमानं द्वित्वं सिद्धं भवति । (५) स्थानिवद्भावप्रतिषेधः प्रयोजनम् । "अड्व्यवाय" इत्यनेन 'उरःकेण' 'उरःपेण' इत्यत्र यथा, तथा स्थानिवद्भावात् व्यूढो-

---

संयोगसंज्ञेति । उक्तेरुपाध्मानीयोपधत्वात् उपाध्मानीयस्य हल्संज्ञां विना संयोगसंज्ञा न सिद्ध्यति । तत्सिद्ध्यर्थं हल्संज्ञेत्युक्तं संयोगसंज्ञाप्रयोजनमिति ।

निर्दिश्यमानस्येति । निर्दिश्यमानसूत्रार्थमाणाम् । निर्दिश्यमानस्य षष्ठ्यन्तस्य आदेशा भवन्ति । पदस्य यो विसर्जनीयस्तस्येति व्याख्यानात् परिभाषाप्रवृत्तिः ।

स्थानिवद्भावादिति । सकारस्य स्थानिवद्भावात् णत्वं प्राप्नोति । अनल्विधाविति प्रतिषेधस्तु स्थानिनो विसर्गस्याल्त्वे सति सिद्ध्यति । अनुपदिष्टत्वात् न हि स्थानिनोऽल्त्वमस्ति, अतः स्थानिवद्भावः प्रतिषेध्यः । "पूर्व्वत्रासिद्धे न स्थानिवत्" इति निषेधस्तु नात्र प्रवर्त्तते । स तु "अचः परस्मिन् पूर्व्वविधौ" (१।१।५७) इत्यनेन परनिमित्तोऽजादेशः स्थानिवदिति प्राप्ते "न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" (१।१।५८) इत्यस्यारम्भे तत्र तत्र स्थानिवद्भावनिषेधाय । अस्य सूत्रस्य प्रत्याख्यानाय भाष्ये "पूर्व्वत्रासिद्धे न स्थानिवदि"ति वार्त्तिकमवष्टब्धम् । अतस्तस्य वार्त्तिकस्य "अचः परस्मिन् पूर्व्वविधा"विति विषयत्वात् "स्थानिवदादेशोऽनल्विधौ" (१।१।५६) इति सूत्रं न विषयः । सुतराम् अस्मिन् सूत्रे "पूर्व्वत्रासिद्धे न स्थानिवदि"ति वार्त्तिकस्याप्रसरः । "अनल्विधा"वित्यस्य प्रसरार्थं स्थानिवद्भावप्रतिषेधः प्रयोजनत्वे-

रस्कोन' 'महोरस्केन' इत्यत्रापि षत्वं प्राप्नोति। तत्रानल्विधाविति प्रतिषेधः सिद्धो भवति।

किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः ?

१। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। *।

(१) धातव एकवर्णा अर्थवन्तो यथा 'एति' 'अध्येति' 'अधीतः'। (२) प्रातिपदिकान्येकवर्णान्यर्थवन्ति यथा 'आभ्यां' 'एभिः' 'एषु'। (३) प्रत्यया एकवर्णा अर्थवन्तः, यथा 'औपगवः' 'कापटवः'। (४) निपाता एकवर्णा अर्थवन्तः यथा 'अ' अपेहि, 'इ' इन्द्रं पश्य, 'उ' उत्तिष्ठ, 'अ' अपक्राम। अतो धात्वादीनामेकवर्णानामर्थदर्शनाद्वर्णा अर्थवन्तः।

२। वर्णव्यत्यये चार्थान्तरगमनात्।

वर्णव्यत्यये अर्थान्तरोपस्थितिर्भवति, अतएव वर्णा अर्थवन्तः। यथा कूपः सूपः यूपः। कूप इत्यत्र ककारेण कश्चिदर्थः, ककारापाये सकारोपजनेऽर्थान्तरम्, एवं यूप इत्यत्र ककारसकारापाये यकारोपजनेऽर्थान्तरं गम्यते। अतएव कूपे यः कूपार्थः स ककारस्य, सूपे यः सूपार्थः स सकारस्य, यूपे यो यूपार्थः स यकारस्य।

३। वर्णानुपलब्धौ चानर्थगतेः।

वर्णस्यानुपलब्धौ अन्तर्धाने तद्वर्णसत्तायां योऽर्थस्तदर्थानवगतिः। यथा 'वृक्षः' इत्यत्र योऽर्थो वकारापाये 'ऋक्षे' स न गम्यते, 'काश्मीरः" इत्यस्य योऽर्थः ककारापाये

नात्र वर्णितः। "स्थानिवद्भावं प्रति त्रिपादीस्थस्यासिद्धतया न्यायसिद्धं तदिति पक्षे तु नेदं प्रयोजनम्।"

वर्णव्यत्यय इति। एकस्य वर्णस्याभ्युपगमोऽन्यस्यापगमो व्यत्ययः।

'आक्षीरे' स न गम्यते । किन्तर्ह्युच्यते अनर्थगतेरिति ? न साधीयोऽन्यार्थस्य गतिर्भवति । एवं तर्हीदं पठितव्यं स्यात्—"वर्णानुपलब्धौ चातदर्थगतेः" इति । किमिदमतदर्थगतेरिति ? तस्यार्थस्तदर्थः तदर्थस्य गतिः तदर्थगतिः, न तदर्थगतिः अतदर्थगतिः, अतदर्थगतेरिति । अथवा सोऽर्थस्तदर्थः, तदर्थस्य गतिः तदर्थगतिः, न तदर्थगतिः, अतदर्थगतिः अतदर्थगतेरिति । तर्ह्येवं निर्देशः कर्त्तव्यः । उष्ट्रमुखवदतर्थगतेरनर्थगतेरित्यत्रोत्तरपदलोपो द्रष्टव्योऽसौ न कर्त्तव्यः ।

४ । संघातार्थवत्त्वाच्च ।

संघातार्थवत्त्वाच्च वर्णा अपि अर्थवन्तः । यतः येषां संघाता अर्थवन्तस्तेषामवयवा अप्यर्थवन्तः । एवम् अवयवानामर्थवत्त्वे संघातानामपि । तद्यथा एकश्चक्षुष्मान् समर्थस्तत्समुदयश्च शतमपि समर्थम् । एकश्च तिलस्तैलदाने समर्थः, तत्समुदायश्च खार्य्यपि तैलदाने समर्था । येषां पुनरवयवा अनर्थकास्तेषां समुदाया अप्यनर्थकाः । तद्यथा, एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम् । एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम् ।

यदि तर्हीमे वर्णा अर्थवन्तस्तदा "अर्थवत् प्रातिपदिक"(१।२।४५)मिति प्रातिपदिकसंज्ञा, प्रातिपदिकसंज्ञायां "प्रातिपदिकात्" (४।१।१) इति सुबुत्पत्तिः, सुबुत्पत्तौ "'सुबन्तं पदम्" (१।४।१४) इति पदसंज्ञा । तत्र को दोषः? "पदस्य" (८।१।१६) इति 'धनं' 'वन'मित्यादिषु न लोपादीनि प्राप्नुवन्ति ।

अनर्थगतेरिति । तस्य वर्णस्य सद्भावात् योऽर्थस्तस्यानवगतेरित्यर्थः ।

तस्यार्थ इति । तस्य वर्णस्यार्थः ।

सोऽर्थ इति । तस्मिन् वर्णे सति योऽर्थः प्रतीयते सोऽर्थः प्रकृतोऽर्थः ।

उष्ट्रमुखवदिति । उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः ।

एका सिकतेति । सिकताशब्दो बहुवचनान्तः । अत्र भाष्ये सिकतेति एकवचनान्तप्रयोगात् तस्यैकवचनान्तत्वमपीति विवरणम् ।

५। संघातस्यैकार्थ्यात् सुबभावो वर्णात्।

एकत्वं संघातस्यार्थः, तेन वर्णात् सुबुत्पत्तिर्न भविष्यति।

६। अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः।

प्रतिवर्णमर्थानुपलब्धेः अनर्थकास्तु वर्णाः। वर्णं वर्णं प्रतिवर्णम्।

७। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्।

वर्णव्यत्ययादिष्वर्थदर्शनात् वर्णा अनर्थकाः। तद्यथा (१) वर्णव्यत्यये 'कृतेः तर्कः' 'कसेः सिकता' 'हिंसेः सिंहः', एषु वर्णव्यत्यये नार्थव्यत्ययः। (२) अपायो लोपः। 'हतः' 'घ्नन्ति' 'घ्नन्तु' 'अघ्नन्'। एषु वर्णापायो न ह्यर्थापायः। (३) उपजन आगमः। 'लविता' 'लवितुम्'। अत्र वर्णोपजने नार्थोपजनः। (४) विकार आदेशः। 'घातयति' 'घातकः'। अत्र वर्णविकारो नार्थविकारः। वर्णव्यत्ययादिष्वर्थव्यत्ययादयो न भवन्ति अतो हि वर्णा अनर्थकाः।

अर्थवन्तोऽनर्थका वर्णा इत्युभयमुक्तम्? किमत्र न्याय्यम्। उभयमित्याह—स्वभावात्। *। धातुप्रत्ययप्रातिपदिकनिपाता एकवर्णा अर्थवन्तः, अतोऽन्येऽनर्थकाः। *।

संघातस्येति। संघातस्य समुदायस्यैवार्थो न तु प्रत्येकवर्णानाम्। सुतरां न तेभ्यः स्वाद्युत्पत्तिः। पदसंज्ञा हि समुदायस्य न त्वसुबन्तत्वात् प्रत्येकं वर्णानाम्। न हि वर्णानां व्यत्ययेऽपाये संख्यान्तरोत्पत्तिः, सुतरां समुदायस्यैवार्थः।

अर्थदर्शनादिति। वर्णव्यत्ययात् पूर्वं योऽर्थः। तस्यैव वर्णव्यत्ययेऽपि दर्शनात्। सुतरां वर्णव्यत्ययेऽर्थव्यत्ययाभावः।

उभयमिति। कुत्रकुत्रचित् वर्णव्यत्ययेऽर्थान्तरावगतिः, कुत्र कुत्रचिन्न, अतएव उभयमेवावगन्तव्यम्।

"अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शना"दित्यादिषु वर्णानामर्थवत्तासाधकेषु हेतुषु इदं द्रष्टव्यम् । न खलु कूपसूपादिषु अर्थवतां ककारादीनामूपेनान्वयात् साधारणभूत ऊपे कश्चिदर्थो दृश्यते, न च कूपार्थः सूपे सूपार्थश्च कूपे वर्णव्यत्ययेन दृश्यते, अतः सिद्धानि एवंजातीयकानि संघातान्तराण्येवार्थान्तरेषु वर्तन्त इति । यदस्मिन् सिद्धान्ते "संघातार्थवत्त्वाच्चे"त्यस्य हेतोः परिहारो नाभवत् वक्ष्यति तं प्रातिपदिकसंज्ञायाम् ।

अ इ उ ण्, ऋ लृ क्, ए ओ ङ्, ऐ औ च् ।

१ । प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।

अथ प्रत्याहारार्था येऽनुबन्धाः क्रियन्ते कथं तेषामज्ग्रहणेषु ग्रहणं न भवति ?

दृश्यत इति । यदि कूपादिषु कादीनां वर्णानामर्थवत्ता ऊपशब्देनान्वयात्, तदा ऊपशब्दस्याप्यर्थवत्ता स्वीकर्तव्या । यदि कादीनामर्थोत्पादने ऊपस्य शक्तिरित्युच्यते, तदोपस्यानर्थकत्वात् वर्णानामर्थवत्त्वं भग्नम् । सुतरां समुदायस्यैवार्थवत्त्वमिति तत्त्वम् ।

संघातान्तराणीति । संघातस्यैवार्थान्तरवाचित्वमिति सिद्धम् ।

वक्ष्यतीति । तत्र परिहारो वक्ष्यति, "संघातार्थवत्त्वाच्चेति चेत् दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः ।" तत्र दृष्टान्तो रथाङ्गम् । रथाङ्गेन गुणिनो रथस्यार्थभावः, यतो न हि चक्रं रथो वैकाकी गमनक्रियायां समर्थः । उभयोः सम्मेलनेनैव तत्र सामर्थ्यम् । सुतरां समुदायेऽर्थवत्ता प्रतिपन्ना । न तु भिन्ने भिन्नेऽवयवे ।

अज्ग्रहणेष्विति । अज्ग्रहणेष्वित्युपलक्षणं अजादिप्रत्याहारग्रहणेषु कथं न अनुबन्धानां ग्रहणमिति शेषः । अथ अकारमारभ्य चकारं यावद्वर्णानां ग्रहणं भवति । तत्र मध्यस्थानां णकारककारङकाराणां ग्रहणे सति दधि+णकारः, दधि+ककारः, दधि+ङकार इत्यादिषु यण्प्रसङ्गः "अड्व्यवाय" इत्यत्र णकारस्यापि ग्रहणात् ऋषीनामित्यत्र णत्वं स्यात् । एवमन्यत्र विज्ञेयम् । अतो हि प्रश्नः, कथमज्ग्रहणेषु नेति ।

२। आचारात्;—

आचार्य्याणां व्यवहारात् न ग्रहणं भवति। न हि तेष्वनुबन्धेष्वाचार्य्या अच्-कार्य्याणि कृतवन्तः।

३। अप्रधानत्वात्;—

अचोऽस्तु हलो हलस्त्विति तुल्यजातीयानां तुल्यजातिषूपदेशदर्शनात्, न खल्वेतेषामनुबन्धानामस्तु प्राधान्येनोपदेशः।

४। लोपश्च बलवत्तरः।*।

लोपः खल्वप्यनुबन्धानां भवति।

आचारादिति। प्रश्नस्योत्तरमाह आचारात्। सूत्रकृतां व्यवहारात् "उणादयो बहुलम्" (३।३।१) इत्यत्र उकारस्य णकारे, "तृषिमृषिकृशेः" (१।२।२५) इत्यत्र इकारस्य ककारे, "ङसिङसोः" (६।१।११०) इत्यत्र इकारस्य ङकारे "ई च गणः" (७।४।९७) इत्यत्र ईकारस्य चकारे यण् न कृतः। तस्मादनुबन्धानां नास्ति संज्ञित्वमिति ज्ञाप्यते।

न खल्विति। अणादिसंज्ञाप्रतिपत्त्यर्थं हि अनुबन्धानामुच्चारणम्। सुतरां तेषां परार्थत्वान्न प्राधान्येनोपदेशः। यदर्थमेषामुपदेशस्तेषामेव हि प्राधान्यम्। "प्रधानाप्रधानयोः प्रधाने कार्य्यसंप्रत्यय" इति न्यायात् परार्थानामनुबन्धानामजादिसंज्ञा न। एवं सति "आदिरन्त्येन सहेता" (१।१।७१) इति आदिरकारोऽपि अप्रधानत्वेन संज्ञित्वेन न परिगृहीतः स्यादिति चेत्, न, आद्यन्तपदाभ्यां यतः संज्ञित्वेन स्वघटितस्य समुदायस्योपस्थितिः, लक्ष्यसिद्ध्यर्थन्तु प्रत्येकं संज्ञित्वम्, अतोऽस्य नाप्राधान्यम्, अन्त्यस्य तु न तथा इत्संज्ञया तस्य लोपप्राप्तेः। अस्या युक्तेः प्रामाणिकत्वात् "स्वं रूपं शब्दस्याशब्दसंज्ञा" (१।१।६८) इत्यतोऽनुवृत्तेन स्वशब्देन स्वस्य च रूपस्येति व्याख्याय स्वं रूपं चादेरेव गृह्यते नान्त्यस्य अन्त्येनेत्यप्रधानतृतीयानिर्द्देशात्, सर्व्वनाम्न उत्सर्गतः प्रधानपरामर्शित्वादित्येषा शेखरकारेण नादृता।

लोप इति। "हलन्त्यम्" (१।३।३) इत्यनेन णकारादीनामित्संज्ञा। "तस्य लोपः" (१।३।९) इत्यनेन लोपः। सुतरां प्रत्याहारे णकारादीनां यथाच्संज्ञा तथा लोपो-

५ । ऊकालोऽजिति वा योग-
स्तत्कालानां यथा भवेत् ।
अचां ग्रहणमच्कार्य्यं
तेनैषां न भविष्यति ॥

अथवा "ऊकालोऽज् ह्रस्वदीर्घप्लुतः" (१।२।२७) इत्यत्र ऊकालोऽजिति योगं विभज्य ततः ह्रस्वदीर्घप्लुत ऊकालोऽज् इति कालविशेषेणावच्छिन्नस्याच्त्वम् । एवं सति कुक्कुट इत्यवाच्त्वं प्राप्नोति । तस्मात् पूर्व्वोक्त एव परिहारः ।

एष एवार्थः । अपर आह,

"ह्रस्वादीनां वचनात्प्राग् यावत् तावदेव योगोऽस्तु ।
अच्कार्य्याणि यथा स्युस्तत्कालेष्वस्तु कार्य्याणि ॥"

अथ किमर्थमन्तःस्थानामण्सूपदेशः ?

'सँय्यन्ता' 'सँव्वत्सरः' 'यँल्लोकम्' 'तँल्लोकम्' इत्यत्र "अनुस्वारस्य ययि परसवर्णः" (८।४।५८) इति परसवर्णस्यासिद्धत्वात् "अनचि च" (८।४।४७) इत्यनेन प्राप्तम्

ऽपि । परत्वात् नित्यत्वादन्तरङ्गत्वाच्च लोपप्राप्तिः । एवं लोपे कृते संज्ञाप्रवृत्तिकाले त्वविद्यमानत्वात् तेषामजादिसंज्ञाया अभावः । अतएवोक्तं "लोपश्च बलवत्तर" इति बलवानेव बलवत्तरः, स्वार्थे तरप् ।

तस्मादिति । मात्राकालावगमे पूर्व्वमेव (६६पृ.) "न च मात्रिकं व्यञ्जनमस्ती"ति परिहार उक्तः । उ ऊ उ ३ इत्येवं मात्राकालनिर्णयात् व्यञ्जनस्यार्द्धमात्रिकत्वे द्वयोः संयोगे पूर्णैकमात्रायामपि तौ द्वावेव वर्णौ नैका जातिरिति अचां मात्रिकत्वस्य तेष्व-सम्भवः । मात्रिकत्वास्वीकारस्त्वचसहायता विनानुच्चार्य्यमाणत्वादिति तत्त्वम् ।

एष एवार्थ इति । एष एवार्थः । कस्य ? "अपर आह" इत्यारभ्य "अस्तु कार्य्याणी"त्यन्तस्य वार्त्तिककृतोक्तस्य ।

परसवर्णस्येति । अनुनासिके ययि अनुस्वारस्य परसवर्णत्वम् । तस्य असिद्धत्वात् द्विर्व्वचने कर्त्तव्ये अनुस्वारस्यैव द्विर्व्वचनं प्राप्नोति ।

द्विर्वचनमनुस्वारस्यैव माभूदिति । अथ यदा परसवर्णे कृते तस्य यण्त्वेन ग्रहणात् पूर्वस्यापि परसवर्णो यथा स्यात् । वक्ष्यमाणेन "द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्य"-मित्यनेन द्विर्वचने कर्त्तव्ये परसवर्णस्य सिद्धत्वात् भेदस्ति प्रयोजनम् । एवं परसवर्णे सिद्धे यरग्रहणेन यणश्चाद्विर्वचनं यथा स्यात् । मा भूत् द्विर्वचनम् । द्विर्वचने कृते त्रियकारकमन्यथा द्वियकारकं भवतीति भेदो द्विर्वचने । यद्यपि द्विर्वचने "हलो यमां यमि लोपः" (८।४।६४) इत्यनेन एकस्य लोपे त्रियकारकमेव तिष्ठतीति नास्ति भेदः । द्विर्वचने सति कदाचित्त्रियकारकं कदाचित् द्वियकारकम्, असति द्विर्वचने केवलं द्वियकारकमेव । "हलो यमां यमि" अत्र यदि लोपो नित्यः स्यात् तदा द्वियकारकमेव तिष्ठेत् द्विर्वचने भेदो न स्यात् । लोपस्तु विभाषा । विभाषानुवृत्त्यग्रहणेन भेदाभावसाधनत्वमयुक्तम्, यतः

६ । अनुवर्त्तते विभाषा शरोऽचि यद्वार-यत्ययं द्वित्वम् ।

"शरोऽचि" (८।४।४९) इति विप्रतिषेधेन ज्ञाप्यते "हलो यमां यमि लोपः" इत्यत्रानुवर्त्तते विभाषा । अन्यथा,

७ । नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित् स्यात् ।

तत्र परस्येति । 'सँय्यन्ता' 'सँव्वत्सरः' 'यँल्लोक'मित्यत्र परसवर्णे पूर्वपरिभिः सानुनासिकयवलाः द्वित्वभूतमनुस्वारं प्राप्य यवलभूतत्वात् "अनुस्वारस्य ययि परसवर्णः" इत्यनेन परसवर्णत्वे यवलानां द्वित्वं भवत् भवति ।

ज्ञाप्यत इति । "झरो झरि सवर्णे" (८।४।६५) इत्यत्र लोपे विभाषानुवर्त्तते । "अचो रहाभ्यां द्वे" (८।४।४६) इत्यतोऽनुवर्त्तमाना विभाषा "झरो झरि" इत्यत्रानुवर्त्तनात् मध्यस्थे "हलो यमां यमी" इत्यत्राप्यनुवर्त्तते इति ज्ञापको भावः ।

यदि लोपो नित्यः स्यात् प्रतिषेधवचनमनर्थकं स्यात् । कार्यकालपक्ष द्विर्वचने सति "झरो झरि सवर्णे" (८।४।६५) इति लोपो भविष्यति । नित्यत्वाच्च लोप इति पश्यन् "शरोऽचीति" द्विर्वचनप्रतिषेधं भाष्यकाराचार्यः ।

नैतज्ज्ञापकम् । कथम् ? "हलो यमां यमि" "झरो झरी"त्यत्र यमा झरा च यत् सामर्थ्यात् परिगृह्यते । "अचो रहाभ्याम्" (८।४।४६) इत्यनेन यद्विर्वचनम्, लोपापवादः सः, अन्यथा द्विर्वचनमनर्थकं स्यात् । सुतरां "हलो यमां यमि" "झरो झरी"ति सूत्रद्वये वर्त्तमानेऽपि 'शरोऽची'ति प्रतिषेधोऽवश्यं वक्तव्यः । किन्तर्हि योगयोस्तयो-रुदाहरणम् ? 'प्रत्तम्' 'अवत्तम्' 'आदित्यः' इति द्विर्वचनेऽकृतेऽपि यत् त्रिव्यञ्जन-

---

यदि लोप इति । "शरोऽची"त्यत्र "अचो रहाभ्यां द्वे" (८।४।४६) इति प्राप्तिः प्रतिषिध्यते । लोपे नित्ये सति "शरोऽची"ति सूत्रकरणं विफलम् । यतः "अचो रहाभ्या"मित्यनेन यरो द्वे भवत इत्यत्र यमा झरा च यत् । सुतरां "हलो यमां यमि" "झरो झरी"ति लोपकथने यरो द्वित्वनिवृत्तिः स्यात्, किमनेन "शरोऽची"ति सूत्रेण ।

लोपापवाद इति । "अचोर हाभ्याम्" इति सूत्रं पूर्व्वमुक्तम् । तेन द्विर्वचने कृते पश्चात् "हलो यमां यमि" "झरो झरी"ति सूत्रद्वयेन तद्विघटितं स्यात् । सुतरां लोपापवादः स इत्युक्तम् ।

किमर्हीति । लोपसाधकयोस्तयोः "हलो यमां यमि" "झरो झरी"ति योगयो-रुदाहरणं किमिति जिज्ञासा ।

प्रत्तमिति । "अच उपसर्गात्तः" (७।४।४७) इत्यनेन अजन्तादुपसर्गात् दा इत्येतस्य घुसंज्ञकस्य तः । 'आदित्यः' इत्यत्र आदित्यो देवता अस्य स्थालीपाकस्येति आदित्यः; अथवा भवार्थप्रत्ययान्तात् ण्यः । तत्र एकस्य यकारस्य निवृत्तौ 'आदित्यः' । प्रत्तमित्य-त्रापि त्रिव्यञ्जनसंयोगः, यतः उपसर्गादिति पञ्चमीनिर्देशात् आदेरलः इत्य स्थाने एकतकारः, सूत्रस्थस्य इति अनुवृत्तत्वात् "तः" इति षष्ठ्यन्ते आकारस्य स्थाने तकारः, ततः प्रत्ययस्य तस्य च तकारैः त्रिव्यञ्जनसंयोगः । सुतरां द्विर्वचनेऽकृतेऽपि द्विर्वचने त्रिव्यञ्जनसंयोग इति ।

संयोगः। 'वर्त्ता' 'कर्त्तेत्यत्र तु विवक्षितस्यानन्तर्यस्याभावाल्लोपो न भवति। संयोगे विवक्षित-कालस्याभावाल्लोपो न भवति, यथा 'कर्त्ति' 'कर्त्ती'त्यादि। सुतरां लोपे निषेधाय "झरोऽन्यो"ति स प्रतिषेधो वक्तव्यः। एवं विभाषानुवर्त्तनवचनं सन्दिग्धम्।

—:—

लण्। ६।

म. भ.। ल इत्येकं वर्णमुपदिश्य पूर्व्वांश्चान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः। "अणु-दित्सवर्णस्य चाप्रत्ययः" (१।१।६९) इत्यकारेण, "इण्कोः" (८।३।५७) इतीकारेण, "इको यणचि" (६।१।७७) इति यका-रेण। इण्ग्रहणानि सर्व्वाणि परेण णकारेण अण्ग्रहणानि तु पूर्व्वेण। "अणुदित्सवर्णस्य चाप्रत्ययः" इत्येतदेकमनेन। अथ किमर्थमण्ग्रहणमेवैतन्न क्रियते? नैवं शक्यम्। अन्तः-स्थानामपि हि सवर्णानां ग्रहणमिष्यते। 'सँय्यन्ता' 'सँव्वत्सरः' 'यँल्लोकम्' 'तँल्लोकम्' इत्यत्रानुस्वारस्यानुनासिके यणि पर-सवर्णे कृते तस्य यण्ग्रहणेन ग्रहणाद्द्विर्व्वचनं यथा स्यादिति।

सन्दिग्धमिति। ज्ञापकत्वेन याऽनुवृत्तिः साधिता, सा पक्षानुकूला युक्ता वाऽऽक्षिप्ता, सुतरामुक्तं "विभाषानुवर्त्तनवचनं सन्दिग्ध"मिति। अन्य-सूत्रे "विभाषा सलोप" इत्युक्तेः "विभज्यसंयोगमध्यस्थयकारस्य वर्त्तिहिति यकारेण ग्रहणादादः कृतो न यकारेणेति नियमम्।"

—

इकारादिष्वकार उच्चारणार्थो नानुबन्धः। लकारे त्वनुनासिकः प्रतिज्ञायते। तेन "उरण् रपरः" (१।१।५१) इत्यत्र प्रत्याहारग्रहणाल्लपरत्वमपि भवति।

भा. सू. लण् इत्यत्र णकारो द्विरनुबध्यते, पूर्वश्चैव परश्च। तत्र अण्ग्रहणेषु इण्ग्रहणेषु च सन्देहो भवति पूर्वेण वा स्युः परेण वेति। कतमस्मिंस्तावदण्ग्रहणे सन्देहः। "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (६।३।१११) इति। परामावात् असन्दिग्धं पूर्वेण न परेण। न हि ढ्रलोपेऽणः सन्ति। ननु 'आढ्ढम्' 'आढ्ढ'मिति परेऽणः सन्ति। एवं तर्हि अण्ग्रहणसामर्थ्यात् पूर्वेण न परेण। यदि हि परेण स्याद् अण्ग्रहणमनर्थकं स्यात्, ढ्रलोपे पूर्वस्य दीर्घोऽच इत्येव ब्रूयात्। अथवा अचित्यपि न ब्रूयात्, अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति। कस्मिंस्तर्ह्यण्ग्रहणे सन्देहः "केऽणः"

न हि ढ्रलोप इति। इह उदाहरणम् इत्यत्र तृहि "सार्वधातुकार्धधातुकयोः" (७।३।८४) इति गुणे कृदिकारादिवभावे "हो ढः" (८।२।३१) इति ढत्वम्, "झषस्तथोर्धोऽधः" (८।२।४०) इत्यनेन तकारस्य धकारः, ततः "ष्टुना ष्टुः" (८।४।४१) इत्यनेन धकारस्य ष्टुत्वम्, ष्टुत्वे "ढो ढे लोपः" (८।३।१३)। "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (६।३।१११) [illegible] "उपधायाश्च" (७।१।१०१) इत्यनेन [illegible] पूर्वमकुवे वोढेति पदसिद्धिः न तु वढेति। वढेत्यादौ गुणोऽसिद्ध एव अत उक्तं न हि ढ्रलोपे परेऽणः सन्तीति।

अण्ग्रहणसामर्थ्यादिति। अ इ उ ण्। ऋ ऌ क्। ए ओ ङ्। ऐ औ च्। ह य व र ट्। ल ण्। इत्यत्र अणो यदि परेण णकारेण [illegible] ह य व र इति वर्णाः तत्र ग्रहणं भवति। [illegible] अतो न कश्चिद्विशेषः अच्ग्रहणेनैव सिद्धेः। एवं अण्ग्रहणं व्यर्थं, तत्र तद्ग्रहणसामर्थ्यात् पूर्वेणैव भवति, अन्यथा अच्ग्रहणमेव तत्र कुर्यात्।

(८।३।१९) इति । परत्वाभावात् अवर्णस्य पूर्वेण न भवेत् । न हि के परेऽचः सन्ति । ननु चायमस्ति 'गोक्के' 'नौक्के' इति । एवं तर्हि अच्‌ अज्ग्रहणसामर्थ्यात् पूर्वेण न भवेत् । यदि भवेत् आत्केऽच इत्येव ब्रूयात् अथवा तदपि न ब्रूयात्, अचो हि हलो दीर्घः प्लुतो भवति । अस्मिन् तर्हि अज्ग्रहणे सन्देहः "अचोऽप्रगृह्यस्यानुनासिक" (८।४।५७) इति । पराभावात् असन्दिग्धं पूर्वेण न भवेत् । न हि पदान्ताः परेऽचः सन्ति । ननु चायमस्ति 'दधिँ' 'मधुँ' इति । एवं तर्हि पूर्वोक्तयुक्त्या पूर्वेण न

न हि के पर इति । ननु 'उपानत्के'ऽत्र के परे कृते कर्त्तव्ये "नहो धः" (८।२।३४) इत्यस्यासिद्धत्वात् अस्ति के परतोऽकारः, तथा 'गोष्के'ऽत्रादौ "इणः षः" (८।३।३९) इत्यनेन विसर्जनीयस्य षकारादेशस्यासिद्धत्वात् अस्ति के परतोऽचः । "न मु ने" (८।२।३) इत्यत्र वृत्तिकारानुसारिणा कैयटेन योगविभागं कृत्वा नत्वादीनामसिद्धत्वं निरस्य समाधानं कृतम् । भाष्ये योगविभागस्यानुक्तत्वात् "के परे" इत्युक्त्वा गोष्केत्यादि भाष्योदाहरणात् अनभिधानमेव सूचितं विवरणकारैः । "ह्रस्वश्रुत्योपस्थितस्य अच' (१।२।२८) इत्यस्याबाधाय पूर्वेण भविष्यति, अबाधनीयपक्षे हि बाधो न न्याय्य' इत्याह दीक्षितः । अनिष्टे विषये पूर्वत्रासिद्धस्य प्रतिषेधार्थं योगविभागो यद्यपि भाष्ये न दृश्यते, तथापि तत्पक्षस्य बोधसौकर्य्यत्वात् कैयटकृतसमाधानमेव वयमनुमोदयामः ।

न हि पदान्ता इति । ननु रवर्ज्जितानामन्त्यानां सानुनासिकत्वस्य "कथय् करोति" इत्यत्रापि परेण प्राप्नोति । अयं हि दृष्टान्तः "हलि सर्व्वेषाम्" (८।३।२२) इत्यत्र हल्ग्रहणमुत्तरार्थं कृत्वा "भो भगो" (८।३।१७) इत्यतोऽश्ग्रहणम् । ततो हलि यलोपीति व्याख्यानात् "कथय् करोती"त्यत्र लोपो मा भूत् । "अचोऽप्रगृह्यस्यानुनासिकः" (८।४।५७) इत्यत्र अप्रगृह्यस्येत्यस्य पर्युदासेनाच एव अनुनासिका भवन्ति न तु हल इति तत्त्वम् । भाष्ये "न हि पदान्ताः" इति वदता तेन सानुनासिकान्तःस्थानां न प्रत्यक्षप्रतिपादितं किन्तु न तेषां चार्थ्यभावत्वमिति सूचितम् । कथं कथयतीति कथ- विट् तमाचष्टे यः स कथयति । कथयतेर्विचि कथय् इति पदं सिद्धम् ।

पूर्वोक्तयुक्त्येति । अज्ग्रहणसामर्थ्यात् पूर्वेण न भवेत् । यदि हि भवेत् तदा, अज्ग्रहणमनर्थकं स्यात् अचोऽप्रगृह्यस्यानुनासिक इत्येव ब्रूयात्, अप्रगृह्यस्यापि न ब्रूयात् । अच एव हि प्रगृह्या भवन्तीति युक्तिः ।

परेण । ... (१।१।५१) । ... न परेण । ... 'अपाङ्क्ताः' ... । ... "रो रि" (८।३।१४) इति ... लोपः । न ... व्याख्यानं युक्तम्, तथा सति ... 'अपाकाः' इत्यादिरसिद्धिप्रसङ्गः । ... तर्हि 'मातॄणां' 'पितॄणा'मिति रपरत्वप्रसङ्गः ।

कर्त्रर्थ इति । कर्तृ+अर्थः, "इको यणचि" इति इको यणि रपरत्वे "उरण् रपरः" इत्यनेन रेफार्थम् अण्ग्रहणे रेफद्वयप्रसङ्गः ।

विभाषापद इति । यद्यपि पूर्वं विभाषाग्रहणं सन्दिग्धमित्युक्तमत्र विभाषाग्रहणमित्युक्त्वा विभाषाग्रहणं ... ।

अगृधेरिति । ... "दधिको च लुकि" (७।४।९१) इत्यनेन ... । ... "अदिप्रभृतिभ्यः शपः" (२।४।७२) इत्यनेन शपो लुक् । "यङो वा" (७।३।९४) इत्यनेन तिप ईडभावपक्षे लघूपधगुणो (७।३।८६) रपरः । "इतश्च" (३।४।१००) इति तिपः इकारलोपे अजर्गर्ध् इति स्थिते "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" (६।१।६८) इति तिपो लोपे "एकाचो बशो भष् झषन्तस्य स्ध्वोः" (८।२।३७) इत्यनेन बशः स्थाने भष्भावः, ततोऽभ्यास... (८।४।५४) ... । "दश्च" (८।२।७५) इति रुत्वम् । एवं अजर्घर् र् इति स्थिते "रो रि" (८।३।१४) इति पूर्वरेफस्य लोपः, "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (६।३।१११) इति पूर्वस्याणो दीर्घे 'अजर्घाः' इति पदं सिद्धम् ।

... । ... "दीर्घोऽकितः" (७।४।८३) इत्यभ्यासस्य दीर्घः । ततः तिपि पूर्ववत् इकारलोपः तिब्लोपे ... इति स्थिते ... "रो रि" इति पूर्वरेफलोपे पूर्वस्याणो दीर्घत्वे 'अपाकाः' इति रूपं सिद्धम् ।

"ऋत इद्धातोः" (७।१।१००) इति धातुग्रहणसामर्थ्यात् 'मातॄणां' 'पितॄणाम्' इत्यत्र न भवति, अन्यथा धातुग्रहणमनर्थकं स्यात्। ऋकारे कृते अन्यत्वात् तत्र न भविष्यति। नाम रपरत्वं भवतीति वचनम् ज्ञापकत्वं कल्पनीयम्। 'चिकीर्षति' 'जिहीर्षति' इत्यत्रापि तर्हि न प्राप्नोति। उपधायाश्च (७।१।१०१) इत्येवं भविष्यति। इहापि तर्हि प्राप्नोति 'मातॄणां' 'पितॄणाम्' उपधाया ऋकारत्वात्। तथाप्यनुवर्तनं कर्तव्यम्। एवं तर्हि अत्र वचनसामर्थ्यात् पूर्वोक्तयुक्त्या पूर्वेण न परेण।

"अणुदित् सवर्णस्य चाप्रत्ययः" (१।१।६९) इत्यत्र तर्हि अण्ग्रहणे सन्देहः। "उर्ऋत्" (७।४।७) इत्यत्र ऋकारे तपरकरणेन ज्ञापयत्याचार्यः अवर्णेऽण्ग्रहणं परेण न पूर्वेण।

धातुग्रहणमिति। यदि 'मातॄणाम्' 'पितॄणाम्' इत्यत्र ऋकारे "उरण् रपरः" प्राप्तिः स्यात्, तदा "ऋत इत्" इत्येवं स्यात् धातुग्रहणमनर्थकं भवेत्। धातुग्रहणेन ज्ञापयति धातोः ऋत एव इत् भवति, तत्रैव "उरण् रपरः" प्राप्तिः।

अन्यत्वादिति। ऋकारे यदि 'उरण् रपरः' इत्यनेन रपरत्वं स्यात् तदा "ऋत इत्" (७।१।१००) इति ऋकारान्ताङ्गस्य इत् न सिध्येत् अर् इति रकारान्तत्वात्।

चिकीर्षतीति। "अज्झनगमां सनि" (६।४।१६) इत्यनेन दीर्घे रपरत्वे च सति "उपधायाश्च" इत्वमेषितव्यम्। एवं जिहीर्षतीत्यत्र।

इहापि तर्हीति। धातुग्रहणसिद्धादधातोः मातॄणामित्यादेः रपरत्वं निवर्तितम्। एवमस्य ज्ञापकस्य चरितार्थतायां धातोस्तु रपरत्वे सति तत्र रपरत्वनिवर्तनज्ञापकत्वं न।

पूर्वोक्तयुक्त्येति। यदि परेण स्यात् "उरण्रपर" इत्येव ब्रूयात् सुतरां अण्ग्रहण-सामर्थ्यात् तद्ग्रहणानर्थक्यवारणाय पूर्वेणैव न परेणेति निष्कर्षः।

उर्ऋदिति। कॄत संशब्दने इत्यस्मात् चुरादिण्यन्तात् लुङि चङि णिचश्चीकृतदि-त्यत्र दीर्घस्यापि स्थानिन ऋकारस्य स्थाने ह्रस्व एव यथा स्यादित्येतदर्थं तपरकरणं कृतम्। यदि पूर्वेण ग्रहणं स्यात् तदा तपरकरणं निरर्थकं भवतीति स्थानिन ऋका-रस्याप्राप्तिः सुतरां न तत्कारितत्वम्। ननु भाव्यमानेन न सवर्णग्रहणमिति, सुतराम् "उर्ऋत्" इत्यत्र भाव्यमानेन ऋकारेण सवर्णग्रहणाभावात् व्यर्थं तपरकरणेन सवर्णग्रहण-निवृत्तिः। "न चायं भाव्यमानः किन्तु चादेशान्तरनिवृत्त्यर्थं स्वरूपमेवैतदस्यनुज्ञायते"

[illegible] इति [illegible] । [illegible] पूर्वस्य [illegible] करोति, [illegible] । [illegible] इतो [illegible] [illegible] एवं [illegible] करोति [illegible] [illegible] ।

[illegible] वर्णोपदेशाविषयं कस्माद् विधत्ते ? "व्याख्यानतो विशेषप्रति-पत्ति"रिति भवति परिभाषेति आचक्षते आचार्याः । ततो व्याख्यानं, [illegible]-ताय पूर्वेषाम् ग्रहणं इष्टग्रहणं परेषेति ।

——•:•——

ञ म ङ ण न म् । ७ ।

भा० वृ० । ञ म ङ ण न इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते मकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः । "पुमः खय्यम्परे" (८।३।६) इत्यकारेण,

---

इति [illegible] मात्र आख्यमानः । यदि तपरकरणेन भाव्यमानतावाचि दीर्घ-प्लुतौ, तद्वत् । [illegible] परेषेति स्थितम् । तदुक्तम् "ऊत इवर्णोः" (७।१।१००) "उदोष्ठ्यपूर्वस्य" (७।१।१०२) इत्यादौ "उरण् रपरः" (१।१।५१) इत्यत्र उर् इत्यनेन ऋकारस्य ग्रहणात् रपरत्वसिद्धिः ।

वर्णपतत्र इति । [illegible] वर्णपतत्रः । संहितायां [illegible] विभक्ति-योगात् [illegible] भाषा [illegible] । प्रत्याहारग्रहणे तु [illegible],

अत इत्संज्ञा [illegible] ।

वर्णोपदेशार्थमिति । [illegible]; [illegible] । ञ म ङ ण न् इत्येते [illegible], ञ म् [illegible] । [illegible], [illegible] क्रियते ? "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षण"मिति परिभाषाव्याख्यानमिति सिद्धान्तः ।

"हलो यमां यमि लोपः" (८।४।६४) इति यकारेण, "ङमो ह्रस्वादचि ङमुण् नित्यम्" (८।३।३२) इति ङकारेण। "अमन्ताड्ड" इति अकारेणापि ग्रहणमस्य दृश्यते। केचित्तु सर्व्वाण्येतानि प्रत्याहारग्रहणानि अकारेण भवन्त्विति मकारमनुबन्धं प्रत्याचक्षते। तथा तु सति "ङमो ह्रस्वादचि ङमुण् नित्यम्" इत्यत्रागमिनोर्झभोरभावादागमाभावप्रतिपत्तिगौरवं भवति।

झ भ ञ्। ८।

म, वृ,। झ भ इत्येतौ वर्णावुपदिश्य पूर्व्वांश्चान्ते ञकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन। "अतो दीर्घो यञि" (७।३।१०१) इति यकारेण।

भा, स,। कथं मकारो ञकार इतीमौ मुखनासिकावचनावनुबध्येते? न पुनरेकौ ञकारोऽनुबध्येत? "हलो यमां यमि लोपः" (८।४।६४) इत्यत्र "हलो यञां यञि लोपः" इति कृते झकारभकारयोरपि लोपः प्रसज्येतेति चेत्, न दोषः, यतः झकारभकारौ न झकारभकारपरौ स्तः। "पुमः खय्यम्परे" (८।३।६) इत्यत्र "पुमः खय्यञ्परे" इति कृते झकारभकारपरे खयि रुः प्रसज्येतेति चेत्, न झकारभकारपरः खयस्तीति न दोषः। "ङमो ह्रस्वादचि ङमुण्नित्यम्" (८।३।३२) इत्यत्र "ङञो ह्रस्वादचि ङञुण्नित्यम्" इति झकारभकारयोरपि पदान्तयोः झकारभकाराचागमौ स्यातामिति चेत्, न झकारभकारौ पदान्तौ स्त इति न दोषः। यदि न तौ स्तः

न झकारेति। उज्झिः लभिः क्विपि झकारभकारौ स्तः तत् कथमुक्तं न झकारभकारपर इति? उज्झेर्दोपधतया संयोगान्तलोपे उदिति रूपम्। लभेस्तु भकारस्य पदान्तस्य जश्त्वम्। सुतरां झकारभकारपरो नास्ति खय इति सिद्धम्।

पञ्चागमास्त्रय आगमिन इति वैषम्यात् संख्यातानुदेशो न प्राप्नोति, ङकारणकारावागमिनौ न स्त इति कृत्वा आगमावपि न भविष्यतः ।

अथ किमिदमक्षरमिति ?

१ । अक्षरं न क्षरं विद्यात् ;—

न क्षीयते न क्षरतीति वा अक्षरम् ।

२ । अश्नोतेर्वा सरोऽक्षरम् ।

अश्नोतेर्वा पुनरयमौणादिकः सरन्प्रत्ययः । अश्नुते इत्यक्षरम् ।

पञ्चागमा इति । यदि पदान्तौ ङकारणकारौ न स्तः तदा ङ्ण इत्यत्र त्रय आगमिनः ङ्णुट् इत्यत्र पञ्च आगमाः । सुतरां "यथासंख्यमनुदेशः समानाम्" (१।३।१०) इत्यनेन संख्यातानुदेशप्राप्त्यभावः । न दोषः, कथम् ? येषामागमानामागमिनो विद्यन्ते त एव प्रवर्त्तन्ते, यत्र तूद्दिष्टिनामनुदेशिनाञ्च संख्यासाम्यं तत्र यथासंख्यलक्षणप्रयोगो यस्यागमस्य आगमी विद्यते तत्र प्रवर्त्तते संख्यातानुदेशः ।

अक्षरमिति । "स्वरश्चोऽक्षरम्" (८ पृ,) इति पूर्व्वमुक्तम् । ततः किमिदमक्षरमिति प्रश्नः ।

न क्षरमिति । न क्षीयते न क्षरत इति व्युत्पत्त्या नित्यार्थवाचकम् । ब्रह्मणि प्रयुक्तोऽक्षरशब्दो नित्यार्थः परमार्थतः । वर्णे तु व्यवहारनित्यतया नित्यत्वम् ।

अश्नुत इति । अर्थमश्नुते व्याप्नोतीत्यक्षरम् ।

प्रत्याहारपरिशिष्टम् ।

(महावृत्तिक्रोड़पत्रम्)

८१ पृष्ठे ।

घ ढ ध ष् । ९ ।

घ ढ ध इत्येतान् वर्णानुपदिश्य पूर्व्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति द्वाभ्याम् । "एकाचो बशो भष् झषन्तस्य स्ध्वोः" (८।२।३७) झकारभकाराभ्याम् ।

ज ब ग ड द श् । १० ।

ज ब ग ड द इत्येतान् वर्णानुपदिश्य पूर्व्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः । "भो भगो अघो अपूर्व्वस्य योऽशि" (८।३।१७) इत्यकारेण ; "हशि च" (६।१।११४) इति हकारेण ; "नेड्वशि कृति" (७।२।८) इति वकारेण ; "झलां जश् झशि" (८।४।५३) इति जकारझकाराभ्याम् ; "एकाचो बशो भष् झषन्तस्य स्ध्वोः" (८।२।३७) इति बकारेण ।

ख फ छ ठ थ च ट त व् । ११ ।

ख फ छ ठ थ च ट त इत्येतान् वर्णानुपदिश्यान्ते वकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन। "नश्छव्यप्रशान्" (८।३।७) इति छकारेण। ख फ ग्रहणमुत्तरार्थम्।

क प य् । १२ ।

क प इत्येतौ वर्णावुपदिश्य पूर्व्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति चतुर्भिः। "अनुस्वारस्य ययि परसवर्णः" (८।४।५८) इति यकारेण; "मय उञो वो वा" (८।३।३३) इति मकारेण; "झयो होऽन्यतरस्याम्" (८।४।६२) इति झकारेण; "पुमः खय्यम्परे" (८।३।६) इति खकारेण।

श ष स र् । १३ ।

श ष स इत्येतान् वर्णानुपदिश्य पूर्व्वांश्चान्ते रेफमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति पञ्चभिः। "यरोऽनुनासिकेऽनुनासिको वा" (८।४।४५); "झरो झरि सवर्णे" (८।४।६५) इति झकारेण; "खरि च" (८।४।५५) इति खकारेण। "अभ्यासे चर् च" (८।४।५४) इति चकारेण; "शर्पूर्व्वाः खयः" (७।४।६१) इति शकारेण।

हल् । १४ ।

ह इत्येकं वर्णमुपदिश्य पूर्व्वांश्चान्ते लकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः । "अलोऽन्त्या-त्पूर्व्व उपधा" (१।१।६५) इत्यकारेण ; "हलोऽनन्तराः संयोगः" इति (१।१।७) हकारेण ; "लोपो व्योर्व्वलि" (६।१।६६) इति वकारेण ; "रलो व्युपधाद्धलादेः संश्च" (१।२।२६) इति रेफेण ; "झलो झलि" (८।२।२६) इति झकारेण ; "शल इगुपधाद-निटः क्सः" (३।१।४५) इति शकारेण ।

अथ किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते ? कित्व-विकल्प-क्सेड्विधयो यथा स्युरिति । 'लिहित्वा' 'लेहित्वा' इत्यत्र "रलो व्युपधाद्धलादेः संश्च" (१।२।२६) इति कित्वं वा यथा स्यात् । लिहेः 'अलिक्षत्' इति "शल इगुपधादनिटः क्सः" (३।१।४५) इति क्सो यथा स्यात् । 'रुदिहि' 'स्वपिहि' इति वलादिलक्षण इड् (७।२।३५) यथा स्यात् । 'अदाग्धां' झल्ग्रहणेषु (८।२।२६) हकारस्य ग्रहणं यथा स्यात् ।

यद्येवं "ह य व र ट्" इत्यत्र तर्हि किमर्थमुपदिश्यते ? 'महां हि सः' 'देवा हसन्ति' इत्यत्राड्ग्रहणेषु (८।३।२) च ग्रहणं यथा स्यात् । "हशि च" (६।१।११४) इति हकारस्य ग्रहणं यथा स्यात् । 'ब्राह्मणो हसति', "हशि च" (६।१।११४) इति उत्वं यथा स्यात् ।

"एकस्मान् ङ-ञ-ण-व-टा द्वाभ्यां षस्त्रिभ्य एव क-ख-माः स्युः।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः॥" इति।

इति प्रत्याहारः।

३। वर्णां वाहुः पूर्व्वसूत्रे ;—

अथवा पूर्व्वसूत्रे वर्णमक्षरमिति संज्ञा क्रियते।

४। किमर्थमुपदिश्यते। *।

किमर्थं वर्णमुपदिश्यते? वर्णाः शब्दाः ज्ञायन्ते शब्दैर्हि वेदो निबद्धः। सुतरां (१) शास्त्रप्रवृत्त्यर्थम् (१८ पृ,) (२) इष्टबुद्ध्यर्थम् (१९ पृ,) (३) लघ्वर्थञ्च उपदिश्यते।

"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः; सर्व्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति; मातापितरौ चास्य स्वर्गे लोके महीयते।"

इति श्रीभाष्यसङ्गमन्यां प्रथमस्याध्यायस्य प्रथमपादे
द्वितीयमाह्निकम्।

वर्णमिति। पूर्व्वसूत्रे व्याकरणान्तरे। "वर्णा अक्षराणी"ति तत्र।

सोऽयमिति। अक्षरसमाम्नायः वर्णानां क्रमपाठः। वाक्समाम्नायः तैर्वर्णैर्वाग्व्यवहारः। पुष्पितः फलितः, शब्दव्यवहारेणापूर्व्वफललाभात् फलपुष्पान्वितः। चन्द्रतारकवत् प्रतिमण्डितः अलङ्कृतः व्यवहारनित्यतया चन्द्रतारकैरुपमा। वेदितव्यः परिज्ञातव्यः। कथम्? ब्रह्मराशिः। वर्णैः शब्दाः शब्दैर्वेदाः परिज्ञायन्ते, अतोऽभेदोपचारात् सोऽयमक्षरसमाम्नायः वाक्समाम्नायः ब्रह्मराशिः वेदसमष्टिः। शब्दब्रह्मणोरभेदोपचारात् यत् शब्द एव ब्रह्मेति मतं, तत्तु "ऋचो अक्षरे परमे व्योमन् (ऋक् १म, १६४ सू, ३९ ऋक्) इत्यादि दिशावगन्तव्यम्।

इति श्रीभाष्यसङ्गमन्यनुव्याख्यायां तत्त्वसङ्कलन्यां प्रथमाध्यायस्य प्रथमे पादे द्वितीयाह्निकम्।

तृतीयाह्निकम् ।

वृद्धिरादैच् । १ । १ । १ ।

म, वृ, । वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानाञ्च । तपरकरणमैजर्थम्, तादपि परस्तपर इति 'खट्वैडका'दिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये । 'आश्वलायनः' 'ऐतिकायनः' 'औपगवः' 'औपमन्यवः' 'शालीयः' 'मालीयः' ।

वृद्धिप्रदेशाः—"सिचि वृद्धिः परस्मैपदेषु" (७।२।१) इत्येवमादयः ।

भा, स, । 'ऐच्' इत्यत्र "चोः कुः" (८।२।३०) इत्यनेन पदान्ते कुत्वं प्राप्नोति, तन्न प्राप्नोति "अयस्मयादीनि छन्दसि" (१।४।२०) इत्यनेन भत्वात् ।

ऐजिति । 'आदैच्' इत्यतो ऐज्ग्रहणं विस्पष्टतो न्यायप्रदर्शनार्थम् । एवं ग्रहणे न दोषोऽपि यतो भाष्यकारेणापि पस्पशायाम् "शब्दाप्रतिपत्ति"रिति (२५ पृ,) वार्त्तिके असमस्तत्वेन परिगृह्य 'आत् ऐच्' इति पदविभागं प्रदर्शितवान् । अत्र "कथं कुत्वं न भवतीति" विचारः ऐच्पदस्य साधुत्वपरिग्रहेणैव कृतः, अन्यथा तत्र शास्त्रोक्तकुत्वादेः कुतः सम्भावना । सङ्केतेनोपदेशार्थं संज्ञासंज्ञित्वपरिकल्पनमवश्यम्भावि । सुतरां वृद्ध्यादीनामनुशासनत्वाच्चैव । सर्वशब्दानां सर्वार्थवाचकत्वमिति प्राचीनमतम् । सर्वार्थवाचकतां सङ्कोच्य विशेषविशेषार्थे विशेषविशेषशब्दं निबध्य वाग्व्यवहारः प्रवर्त्तते । एवं शब्दार्थनिरूपणस्य लौकिकत्वात् संज्ञासंज्ञित्वपरिकल्पनं न विरुध्यते, शिष्टव्यवहारात् साधुत्वमपि । "सङ्केतग्राहकशास्त्रकारस्य स्वेच्छयैवैतेषां यदृच्छाशब्दत्वेन व्यवहार" इति शेखरकारः ।

नेदं छन्द इति चेत्,

१। छन्दोवत् सूत्राणि भवन्ति।

इत्यस्य छन्दस्त्वम्। यदि भसंज्ञा "वृद्धिरादैजदेङ् गुणः" इत्यत्र जश्त्वमपि न प्राप्नोति। "उभयसंज्ञान्यपि" छन्दांसि दृश्यन्ते, तद्यथा "स सुष्टुभा स ऋक्वता गणेन" (ऋक् ४म, ५सू, ५ऋक्)। अत्र पदत्वात् कुत्वं; भत्वात् जश्त्वं न भवति। एवं "वृद्धिरादैच्" "वृद्धिरादैजदेङ् गुणः" इत्यत्र भत्वात् कुत्वं न, पदत्वात् जश्त्वं भवति।

आदैच् इत्यनेन वृद्धिरिति यौ आदैचस्तेषां ग्रहणं भवति, आदैज्भाविनां वा। यदि वृद्धिरिति यौ आदैचस्तेषां ग्रहणं भवति, 'शालीयः' 'मालीयः' इत्यत्र "वृद्धाच्छः" (४।२।११४) इत्यनेन वृद्धलक्षणच्छो न प्राप्नोति, 'आम्रमयः' 'शालमयः' इत्यत्र "नित्यं

उभयसंज्ञान्यपीति। वक्तव्यमेतत् "अयस्मयादीनि छन्दसी"ति सूत्रे वार्त्तिकपाठे।

आदैजिति। समस्तत्वपक्षे आदैजिति ग्रहणं कृतम्। आच्च ऐच्चेति इतरेतरद्वन्द्वपक्षे सुपां सुलुग् (७।१।३९) इति सुलुक्, पक्षे समाहारद्वन्द्वः। समासान्तविधेरनित्यत्वात् "द्वन्द्वाच्चुदषहान्तात् समाहारे" (५।४।१०६) इत्यनेन समाहारपक्षे टच् न। कुतो ज्ञायते समासान्तविधिरनित्य इति? "द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ" (६।२।१९७) इत्यत्र मूर्धन्शब्दादकृतसमासान्तात्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" (५।४।११३) इति षच्यनुवर्तमाने "द्वित्रिभ्यां ष मूर्ध्नः" (५।४।११५) इति षविधानं षचश्चित्त्वसामर्थ्याज्ज्ञायमानेनान्तोदात्तत्वेन "द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहा"वित्यत्र पाक्षिकान्तोदात्तत्वस्याबाधनाय। तत्र तु 'द्विमूर्धा' इत्यसमासान्तोऽपि अन्तोदात्तः, 'द्विमूर्धः' इति कृतसमासान्तोऽपि अन्तोदात्तः पाक्षिकः। समासान्ते कृते "बहुव्रीहेः कार्यित्वात् तदेकदेशत्वाच्च समासान्तस्यान्तोदात्तत्वं पक्षे भवत्येव।"

वृद्धिरिति। वृद्धिरिति विधानबलेन ये आकारौकारा आप्यन्ते ते। एषां तद्भावितत्वसंज्ञा।

वृद्धलक्षण इति। "वृद्धिर्यस्याचामादिस्तद्वृद्धम्" (१।१।७३) अचां मध्ये वृद्धिसंज्ञक आदैजादिभूतो यस्य तच्छब्दरूपं वृद्धसंज्ञम्। एतल्लक्षणाक्रान्तो वृद्धलक्षणः।

वृद्धशरादिभ्य" (४।३।१४४) इत्यनेन वृद्धलक्षणो मयट् प्राप्नोति। 'आम्रगुप्तायनिः' 'ग्रामगुप्तायनिः' इत्यत्र "उदीचां वृद्धादगोत्रात्" (४।१।१५७) इत्यनेन वृद्धलक्षणः फिञ् न प्राप्नोति।

आदैज्ग्रहणमिति चेत् सर्व्वो भासः 'सर्व्वभासः' इत्यत्र उत्तरपदवृद्धौ "उत्तरपदवृद्धौ सर्व्वं च" (६।२।१०५) इत्यनेन पूर्व्वपदान्तोदात्तत्वं प्राप्नोति। तावती भार्य्या यस्य 'तावद्भार्य्यः' इत्यत्र "वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" (६।३।३९) इत्यनेन "वृद्धिनिमित्तस्ये"ति पुंवत्प्रतिषेधः प्राप्नोति। आदैज्मात्रग्रहणे न दोषः। कथम्? 'सर्व्वभासः' इत्यत्र "उत्तरपदस्य" (७।३।१०) इत्यधिकृत्य या वृद्धिः सैवोत्तरपदवृद्धिरन्यथा सर्व्वः कारकः 'सर्व्वकारकः' इत्यत्र पूर्व्वपदान्तोदात्तत्वं प्राप्नुयात्। 'तावद्भार्य्यः' इत्यत्र न पुंवत्प्रतिषेधः, यतो न वृद्धेर्वृद्धीनां वा निमित्तं वृद्धिनिमित्त किन्तु वृद्धेर्वृद्धीनां वा निमित्तं ककारो ञकारो णकारो यस्मिन्निति वृद्धिनिमित्तस्य तद्धितस्य पुंवत्प्रतिषेधो भवति, न तु "आ सर्व्वनाम्नः" (६।३।९१) इत्यनेन वतुनिमित्तस्य तावतीत्यस्य।

२। अथ संज्ञेति वक्तव्यम्। *।

सर्व्वकारक इति। तद्भावितग्रहणपक्षेऽपि प्राप्नोतीति प्रदर्शनाय 'सर्व्वकारकः' इति ग्रहणम्।

उत्तरपदवृद्धिरिति। अत्र वृद्धिशब्दमात्रग्रहणे तेनैव वृद्धिमदुत्तरपदं लक्ष्यते तथापि यदुत्तरपदग्रहणं कृतं तेनैतदायाति "उत्तरपदस्ये"त्यधिकृत्य या वृद्धिः सैवोत्तरपदवृद्धिः।

वृद्धेर्वृद्धीनां वेति। वृद्धेर्निमित्तं ककारो ञकारो णकारः। वृद्धीनामिति बहुवचननिर्द्देशः कृत्स्नाया वृद्धेर्निमित्तसूचनाय। आकार ऐकार औकारो हि कृत्स्नाया वृद्धेर्विषयः। वृद्धिनिमित्तस्येत्यत्र व्यधिकरणपदो बहुव्रीहिः।

ककार इति। "अचो ञ्णिति" (७।२।११५) "किति च" (७।२।११८) इति ञिति णिति वृद्धिः सार्व्वत्रिकी, किति तद्धिते। सुतरामेषां वृद्धेर्निमित्तत्वम्।

३। संज्ञाधिकारः संज्ञासंप्रत्ययार्थः।

अथ संज्ञेति प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः, अन्यथा वृद्ध्यादीनां संज्ञा इत्येव संप्रत्ययो न स्यात्।

४। इतरथा ह्यसंप्रत्ययो यथा लोके।

अक्रियमाणे संज्ञाधिकारे संज्ञासंप्रत्ययाभावः, संज्ञासंप्रत्ययाभावे बहुसूत्रमनर्थकं स्यात्। दृश्यन्ते हि लोकेऽर्थवन्त्यनर्थकानि च वाक्यानि, तद्यथा अर्थवन्ति—'देवदत्त, गामभ्याज शुक्लां दण्डेन', 'देवदत्त गामभ्याज कृष्णा'मिति। अनर्थकानि—'दश दाडिमानि' 'षडपूपाः' 'कुण्डम्' 'अजाजिनम्' इत्यादि।

५। संज्ञासंज्ञिनोरसन्देहश्च।

क्रियमाणेऽपि संज्ञाधिकारे केयं संज्ञा के संज्ञीत्यत्र सन्देहो यथा न भवेत् तथा वक्तव्यं वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति।

संज्ञासंप्रत्ययार्थः संज्ञाधिकारो न कर्त्तव्यः, यतः,

६। आचार्य्याचारात् संज्ञासिद्धिः।*।

आचार्य्यव्यवहारात् संज्ञात्वं सिद्धम्। *।

बहुसूत्रमिति। बहूनि सूत्राणि यस्मिन्निति बहुव्रीहिपक्षे प्रकरणमध्याहर्त्तव्यम्। समाहारद्विगुपक्षे पात्रादित्वात् स्त्रीप्रत्ययाभावः।

अनर्थकमिति। सूत्राणामगमकत्वे न कश्चिदर्थो निष्पन्न इति अनर्थकम्। कष्टकल्पनयार्थनिष्पन्नत्वेऽपि तथैवावगन्तव्यम्।

दश दाडिमानीति। पदार्थानां समन्वयाभावादनर्थकत्वम्।

आचार्य्यव्यवहारादिति। एवं हि वार्त्तिकपाठः। तेनैव पाठेन वृत्तिर्निबद्धा।

७। यथा लौकिकवैदिकेषु ।

तद्यथा लोके जातस्य पुत्रस्य मातापितरौ नामधेयं संज्ञाम् देवदत्त इति कुर्व्वाते, तयोर्व्यवहारात् अन्येऽपि जानन्ति इयमस्य संज्ञेति । वेदे पुनः 'स्फ्य' 'यूपः' 'चषालः' इति याज्ञिकाः संज्ञाः कुर्व्वन्ति तेषां व्यवहारात् अन्येऽपि जानन्ति इयमस्य संज्ञेति । एवमिहापि संज्ञाधिकारं विना आचार्य्यव्यवहारादेव संज्ञासंप्रत्ययः ।

अत्र सूत्रे केचित् व्याख्यानेन 'वृद्धिशब्दः संज्ञा आदैचः संज्ञिनः' इति वदन्ति, केचित् सूक्ष्मार्थकथनाय वृद्धिप्रदेशत्वेन "सिचि वृद्धिः परस्मैपदेषु (७।२।१) इति सूत्रमनोक्त्वा 'अकार्षीत्' 'अनैषीत्' इत्यादिना आकारैकारानुदाहरन्ति । अतएव "यया प्रत्याय्यन्ते सा संज्ञा ये प्रतीयन्ते ते संज्ञिनः" इति ।

यदुक्तं "संज्ञासंज्ञिनोरसन्देहश्च" वक्तव्य इति तदपि आचार्य्यव्यवहारादेव सिद्धम् ।

८। अनाकृतिः ।

अथवा अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः, यथा लोके आकृतिमतो मांसपिण्डस्य देवदत्त इत्यनाकृतिः संज्ञा क्रियते ।

व्याख्यानेनेति । व्याख्यां विना न हि वृद्धिशब्दस्य संज्ञात्वप्रतीतिः, आदैचां संज्ञित्व-बुद्धिरिति व्याख्यानाश्रयः ।

वृद्धिप्रदेशत्वेनेति । "सिचि वृद्धिः परस्मैपदेषु" इति सूत्रे उदाहरणद्वारा वृद्धिपदेन आकारैकारत्वमायातीति प्रतीतिः सुतरां वृद्धिरेव संज्ञा आकार ऐकारः संज्ञीति विज्ञा-यते । कथम् ? येन शब्देनोपस्थितिः सा संज्ञा, यस्योपस्थितिः स्थितिश्च स संज्ञी । न च वाच्यं कथमुदाहरणस्य प्राप्तिः, सिद्धात् पदादुदाहरणग्रहणात् ।

अनाकृतिरिति । आदैचः वर्णाकारेण आकृतिमन्तः, वृद्धिस्तु न कमप्याकारमाधत्ते । देवदत्त इति नाम्नः न कोऽप्याकारोऽस्ति यस्य जनस्य च तन्नाम स त्वाकारवान् । अतएव लोकदृष्टान्तेन सिद्धान्त्यनाकृतेः संज्ञात्वमाकृतिमतः संज्ञित्वम् ।

१२० । यङ्कनीयमिदमेव वाञ्छितं
नन्दितं भवति कुञ्चितञ्च यत् ।
पापकर्मणि च वल्गुनाति धी-
सञ्चितोञ्चितमसौ विनश्यति ॥

(क) [स्याद्] अनुस्वारस्य ययि परसवर्णो [दृश्यते] ।

ययि अनुस्वारस्य परसवर्णः (८।४।५८) ।

(ख) वा पदान्तस्य [विशेयमर्थं वर्णं तदर्थं वदेत्] ।

ययि पदान्तस्य अनुस्वारस्य वा परसवर्णः (८।४।५९) ।

(ग) तोर्लि [तस्मिन् मङ्गलार्थं स भवाँल्लोकपावनः] ।

लि तोः परसवर्णः (८।४।६०) ।

(घ) उदः स्थास्तम्भोः पूर्वस्य [यथोत्तम्भितमुत्थितम्] ।

उदः स्थास्तम्भोः पूर्वस्य सवर्णः (८।४।६१) ।

१२१ । वाग्यतोऽयमपि चेद वाग्हत-
स्वेडितं स मनुतेऽङ्ग तद्-धि तम् ।

---

१२० । अङ्कनीयमिति । इदमेव 'वाञ्छितम्' अभिलाषः 'अङ्कनीयं'—"अनुस्वारस्य ययि परसवर्णः"—पापकर्मणि यत् 'वाञ्छितं' 'नन्दितं' भवति 'कुञ्चितञ्च'—"वा पदान्तस्य"—'वल्गुनाति'—"तोर्लि"—हर्षं गच्छत् उच्चिमं करोति च जनमिति शेषः । सित्थूत्वा 'उत्तम्भितोत्थितं'—"उदः स्थास्तम्भोः पूर्वस्य"—अथ उद्दीपितं पश्चात् उत्थितं मकृद्धमुखां गतम् । किंमस्य फलम् भवति ? असौ वाञ्छितवान् जनः विनश्यति विनाशं गच्छति । इत्थेव सर्वस्य नरकस्य च हेतुरिति फलितार्थः ।

१२१ । वाग्यत इति । अपि चेत् अयं जनः 'वाग्यतः' न 'वाग्हतः' वाचा कर्कशया हतोऽपि न वाग्हतः अभवत् निर्लिप्तचित्ततया न तच्च परुषा वाची क्षिप्तिपदं लब्धवती, 'चेद्धि' तं जनं इत्यादिमिति शेषः 'तद्धि तम्'—"झयो होऽन्य-

ईश्वरोच्छ्वसनतो विभाति या-
दित्यवत्तदनुगम्य चर्धिमान् ॥

(क) झयो होऽन्यतरस्यां [वाग्घसति प्रिय वाग्हसन्] ।

झय: [उत्तरस्य] ह: पूर्व्वसवर्ण: अन्यतरस्याम् (८।४।६२) ।

(ख) शश्छोटि [स्याच्छवलितं तच्छिवं तच्छयन् बभौ] ।

झय: [उत्तरस्य] श: अटि [परत:] छ: (८।४।६३) ।

(ग) हलो यमां यमि लोप [आदित्यं हविरेधते] ।

हल: [उत्तरेषां] यमां यमि लोप: अन्यतरस्याम् (८।४।६४) ।

(घ) झरो झरि सवर्णे [स्यात् मरुत्तोऽवत्तमात्तवान्] ।

सवर्णे झरि झरो लोप: अन्यतरस्याम् (८।४।६५) ।

इति दृष्टान्तसर्व्वस्वे दृष्टान्तानुगमने संहितायां हल्विषय-
संहिताकथनं नामाष्टमम् प्रकरणम् ।
समाप्तञ्चेदं प्रकरणम् ।

तरस्याम्"—तस्मात् हननं कृतवानिति हेतो: हि स तं हितम् उपकारकं प्रियं वा मनुते, ईश'रोच्छ्वसनत:'—"शश्छोटि"—ईश्वरनि:श्वसितात् विभाति, 'आदित्य'वत्—"हलो यमां यमि लोप:"—तद् देवश्वसितम् अनुगम्य 'चर्धिमान्'—"झरो झरि सवर्णे"—ऐश्वर्यसम्पन्न: । आत्मप्रियपुत्रादिकं सर्व्वं तेनोपायेन लभ्यत इति ऐश्वर्यंवत्ता ।

इति संहिताघटितदृष्टान्तव्याख्यायामष्टमम्
प्रकरणम् । तत् ।

कारकम् ।

अर्थबोधः समासेषु तस्य यत्नाकृतो भवेत् ।
विभज्य पदजातञ्च प्रकृतिप्रत्ययाश्रयम् ॥
कल्पनया विभागश्चाप्यन्वयव्यतिरेकतः ।
उन्नीय तत्समापत्तिरतो हि संहितामनु ॥
कारकञ्च समासश्चातिकृत्यं प्रतिबोध्यते ।
प्रकृतिप्रत्ययानाञ्च विभागस्तदनन्तरम् ॥

१३२ । हृत्ताद्धीना न शोभन्ते धर्माद्भ्रष्टाः कथञ्चन ।
नोत्पादयन्ति विश्वासं पलायध्वं ततस्ततः ॥

(क) कारक[इत्यधिकारः संज्ञाविषयकः स्मृतः](१।४।२३)।
(१)आ कडारादेका संज्ञा[स्यादत्राधिकृतिः श्रियो](१।४।१)।

(ख) [विज्ञेयं] ध्रुवमपायेऽपादानं [पतितो रथात्] ।
अपाये ध्रुवम् अपादानम् (१।४।२४) ।

१३३ । विरमतु विषयान्नियतं जुगुप्सतामतिचरणाज्जातु।
न प्रमाद्यतु स्वकृत्यात् प्रभवति हि ततो निरोद्धु-
मपनीतिम् ॥

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् । * ।

---

१३२ । हृत्तादिति । 'हृत्तात्' चरित्रात् हीनाः जना न शोभन्ते 'धर्मात्' भ्रष्टाः कथञ्चन विश्वासं न उत्पादयन्ति, ततः तस्मात् 'ततः'—"कारके"—"ध्रुवमपायेऽपादानम्"—तेभ्यो जनेभ्यः पलायध्वं दूरं गच्छ । न तत्र वासः कर्त्तव्यः ।

१३३ । नियतं 'विषयात्' विरमतु, 'अतिचरणात्' अत्याचारात् जुगुप्सतां, जातु कदाचित् 'स्वकृत्यात्' स्वानुष्ठितात् न 'प्रमाद्यतु'—"जुगुप्साविरामप्रमादार्थानामुप-

१३४ । बिभेति पापात्परिरक्षितुं भया-

जनः स चोद्विग्नधियारिसंयुगात् ।

न साधनाच्चेत् स पराजितो द्विष-

न्न शक्नुयाद् वारयितुं तमुन्नतेः ॥

(क) भीत्रार्थानां भयहेतु[स्त्रायतेऽस्माद्बिभेत्यतः] ।

भीत्रार्थानां भयहेतुः अपादानम् (१।४।२५) ।

(ख) [स्यात्] पराजेरसोढो[ऽसौ किं पराजयते श्रमात्] ।

पराजेः असोढः अपादानम् (१।४।२६) ।

(ग) [विघ्नेयं] वारणार्थानामीप्सितो [वारयत्यतः] ।

वारणार्थानाम् ईप्सितः अपादानम् (१।४।२७) ।

१३५ । स चान्तर्धत्तेऽस्माद्भजनविमुखादीश्वर इह

ततोऽधीते शास्त्रं श्रुतिनयविदस्तत्तु विफलम् ।

संख्यानम् । * ।''— । कथमेवं कुर्य्यात् ? हि यस्मात् ततः विरामादितः अपनीति निरोद्धुं जनः प्रभवति ।

१३४ । बिभेतीति । 'भयात्' मनः परिरक्षितुं स 'पापात्' बिभेति, 'अरिसंयुगात्' कामादिरिपुकुलैः सह संग्रामात्—''भीत्रार्थानां भयहेतुः''—उद्विग्नधिया उद्विग्नबुद्ध्या चेत् यदि 'साधनात्'—''पराजेरसोढः''—न पराजितः ; द्विषन् शत्रुः कामादिः तं जनम् 'उन्नतेः'—''वारणार्थानामीप्सितः''—वारयितुं न शक्नुयात् । साधनेन रिपुजयः रिपुजयेन चौरतैर्व्वारोद्घाटनं भवतीति तत्त्वम् ।

१३५ । स चेति । इह स च ईश्वरः भजनविमुखात् 'अस्मात्' जनात्—''अन्तर्द्धौ येनादर्शनमिच्छति''—अन्तर्धत्ते, ततः ईश्वरदर्शनपरिभ्रंशात् 'श्रुतिनयविदः'—''आख्यातोपयोगे''—शास्त्रं अधीते, तत् अध्ययनन्तु विफलम्, न तेन दर्शनलाभसम्भावना ।

शृणोत्येष प्रायोऽभिनयनिपुणस्येव प्रकृतौ
न जातं मुख्यं वा प्रभवति न गङ्गा क्रिमिगिरेः॥

(क) [यस्माद्विलीयते] ऽन्तर्धौ येनादर्शनमिच्छति।

अन्तर्धौ येन अदर्शनम् इच्छति तद् अपादानम् (१।४।२८)।

(ख) [भवता]ऽऽख्यातोपयोग [उपाध्यायादधीयते]।

उपयोगे [नियमपूर्वकविद्याग्रहणे] आख्याता अपादानम् (१।४।२९)।

(ग) जनिकर्त्तुः प्रकृतिः[स्याद् दौर्बल्यं जायते भयात्]।

जनिकर्त्तुः प्रकृतिः [कारणम्] अपादानम् (१।४।३०)।

(घ) [स्याद्] भुवः प्रभवो [गङ्गा हिमाद्रेः प्रभवत्यसौ]।

भुवः प्रभवः अपादानम् (१।४।३१)।

इत्यपादानम्।

कथम्? ईश्वरसम्बन्धविरहात् एष प्रायः अभिनयनिपुणस्य नटस्य इव शृणोति। एवंभूतादध्ययनादीश्वरलाभासम्भावनां दर्शयति दृष्टान्तमुखेन 'प्रकृतौ'—''जनिकर्त्तुः प्रकृतिः'' —न मुख्यं जातं, 'क्रिमिगिरेः'—''भुवः प्रभवः''—वल्मीकात् न गङ्गा प्रभवति। ईश्वरविमुखादध्यापकादीश्वरविमुखस्याध्ययनं न परमात्मप्रकाशे हेतुः।

इत्यपादानम्।

१३६। दरिद्राय धनं दद्यात् विद्यां विद्यार्थिने पुनः।
न वहेत अयत्नञ्च स्मरन् दातारमीश्वरम्॥

(क) कर्म्मणा यमभिप्रैति स सम्प्रदान[मिष्यते]।

कर्मणा [दानस्य] यम् अभिप्रैति स सम्प्रदानम् (१।४।३२)।

१३७। संनह्यति च समिते पशुना रुद्रं पुनर्यजते।
एकसमयसिद्धः खलु व्यवहारोऽयं न तु नवेऽस्मिन्॥

क्रियाग्रहणमपि कर्त्तव्यम्। *।

कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा। *।

१३८। न रोचतेऽस्मै धनमिन्द्रियार्थो
न वा स्वदन्तेऽङ्ग विनिह्नुतेऽस्मै।

१३६। दरिद्रायेति। 'दरिद्राय' धनं, 'विद्यार्थिने'—"कर्मणा यमभिप्रैति स सम्प्रदानम्"—पुनः विद्यां दद्यात्। दातारम् ईश्वरं स्मरन् तत्र दाने अयत्नम् अभिमानं न वहेत। साध्वनुष्ठाने परमेश्वर एव कर्त्ता अतएव "कर्त्ताबहिरकर्त्तान्त"रित्युपदेशः।

१३७। संनह्यत इति। 'समिते'—"क्रियाग्रहणमपि कर्त्तव्यम्। *।"—युद्धाय संनह्यते 'पशुना' पुनः 'रुद्रं'—"कर्म्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा। *।"—यजति। अयं व्यवहारः एकसमयसिद्धः खलु सामरिकसमयोचितत्वात्। नवे अस्मिन् समये न तु, नाद्यत्वे तादृशव्यवहारस्य स्थितिरिति शेषः। विधानगुणेन शान्तुग्मुख-त्वानर्थीकृतम्।

१३८। न रोचत इति। 'अस्मै' जनाय धनं विषयसम्पत् न रोचते, इन्द्रि-यार्थाः विषयाः वा न स्वदन्ते। अङ्ग हे बाल जनस्तु 'अस्मै' नित्यं विनिह्नुते

जनस्तु नित्यं न च तिष्ठते न
संश्लाघते नो शपते सुहृत्तान्॥

(क) रुच्यर्थानां प्रीयमाणः [पूपो बालाय रोचते]।

रुच्यर्थानां [प्रयोगे] प्रीयमाणः सम्प्रदानं स्यात् (१।४।३३)।

(ख) श्लाघह्नुङ्स्थाशपां ज्ञीप्समानो [ऽस्मै श्लाघते जनः]।

श्लाघ-ह्नुङ्-स्था-शपां [प्रयोगे] ज्ञीप्समानः सम्प्रदानं स्यात् (१।४।३४)।

१३९। शतं तस्मै धारयति वित्तेभ्यः स्पृहयत्यसौ।
जनाय क्रुध्यति द्रुह्यत्यसूयतीर्ष्यतीह धिक्॥

(क) [स्यात्] धारेरुत्तमर्णो [धारयत्यस्मै शतं यथा]।

धारेः [धारयतेः प्रयोगे] उत्तमर्णः सम्प्रदानं स्यात् (१।४।३५)।

(ख) [भवेत्] स्पृहेरीप्सितो [ऽङ्ग फलेभ्यः स्पृहयत्यसौ]।

स्पृहेः [स्पृहयतेः प्रयोगे] ईप्सितः सम्प्रदानं स्यात् (१।४।३६)।

ह्नुतिं तं बोधयति अतीवविश्रब्धहृदयत्वात्, अस्मै न तिष्ठते इति न, न नैहत्वेनाश्रयतीति न, नैहत्वं तं बोधयति, संश्लाघते श्लाघां तं बोधयति, नो 'शपते'—"श्लाघह्नुङ्स्थाशपां ज्ञीप्समानः"—शपथेन सत्यमिदमिति न तं ज्ञापयति, शपथस्य तत्सन्निधौ हेयत्वात्। कथमिवं तस्मिन् व्यवहारी वर्त्तते सुहृत्त्वात् तस्य जनस्य सुन्दरचरित्रहेतोः।

१३९। शतमिति। असौ जनः 'तस्मै'—"धारेरुत्तमर्णः"—उत्तमर्णाय शतं धारयति। कथमिवम् ऋणी भवति? 'वित्तेभ्यः'—"स्पृहेरीप्सितः"—स्पृहयति। किमसौ वित्ते स्पृहा निन्दनीया? तादृक्स्पृहया किं भवति तदुच्यते 'जनाय'—"क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः"—क्रुध्यति, द्रुह्यति, असूयति, ईर्ष्यति। इह क्रोधादौ धिक् तं जनमिति शेषः। धने लोभः तथा ततः क्रोधादीनां समागमः सर्वथा साधुविगर्हित इति तत्त्वम्।

(ग) [प्रियं] क्रुधद्रुहेर्ष्यासूया-
र्थानां यं प्रति कोपो [बाल]।

क्रुध-द्रुह-ईर्ष्या-सूयार्थानां [प्रयोगे] यं प्रति कोपः स सम्प्रदानम् (१।४।३७)।

१४०। नाभिक्रुध्यत्वभिद्रुह्यत्वस्मै कश्चन राध्यति।
ईक्षतेऽस्मै तथा भूतद्रोहात् सर्व्वविधं भयम्॥

(क) क्रुधद्रुहोरुपसृष्टयोः कर्म्म [ऽभिक्रुध्यतीह तम्]।

उपसृष्टयोः क्रुधद्रुहोः [प्रयोगे] यं प्रति कोपः स कर्म (१।४।३८)।

(ख) राधीक्ष्योर्यस्य विप्रश्नो [देवदत्ताय राध्यति]।

राधीक्ष्योः [प्रयोगे] यस्य विप्रश्नः स सम्प्रदानम् (१।४।३९)।

१४१। आशृणोमि यदि बाध्यतामहो
तोषणं प्रतिशृणोमि सर्व्वदा।
साधवे प्रतिगृणाति मे परः
प्रार्थिने ह्यनुगृणाति सोऽजितः॥

१४०। नाभिक्रुध्यत्विति। अहो 'कश्चन'—"क्रुधद्रुहोरुपसृष्टयोः कर्म"—न अभिक्रुध्यतु अभिद्रुह्यतु। 'अस्मै'—"राधीक्ष्योर्यस्य विप्रश्नः"—यथा राध्यति ईक्षते शुभाशुभं दैवं पर्य्यालोचयति। कथं दैवपर्य्यालोचनं तथा? सर्व्वविधं भयं भूतद्रोहात्। भूतद्रोहिणो निरन्तरं भयव्याकुलचित्ता अतएव ते दैवं पृच्छन्ति किमस्ति मे शुभः कुशलीत्यादि, न तेन तेषां भयापगमः।

१४१। आशृणोमीति। अहो यदि 'साधवे'—"प्रत्याङ्भ्यां श्रुवः पूर्व्वस्य कर्त्ता"—बाध्यताम् आशृणोमि अभयप्रार्था तेन याचितः प्रतिजाने, तथैव सदा तोषणं 'प्रतिशृणोमि' अङ्गीकरोमि, परः परमेश्वरः 'मे'—"अनुप्रतिगृणश्च"—मह्यं प्रतिगृणाति तां बाध्यतां तोषणस्य शंसनं मां प्रोत्साहयति। कथमेतत् करोति भगवान्? अजितः अन्यविधोपायेनावशीभूतः स हि यस्मात् 'प्रार्थिने' अनुगृणाति तादृशीं आशयां शंसनं

अथ किमर्थमाकारस्तपरः क्रियते ?

२०। आकारस्य तपरकरणं सवर्णार्थम्।

आकारस्य तपरकरणं तत्कालानामुदात्तानुदात्तस्वरितानां सवर्णानां ग्रहणार्थम्।

किञ्च कारणं तत्र, यत् तेषां ग्रहणं न स्यात् ?

२१। भेदकत्वात् स्वरस्य।

उदात्तादीनां स्वराणां भेदकत्वात् ग्रहणं न भवतीति सवर्णार्थं तपरग्रहणं क्रियते। कथं ज्ञायते भेदकत्वम् ? दृश्यते लोके "य उदात्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति अन्यत्त्वं करोषीति।" अस्त्येतत् प्रयोजनं किन्तु भेदकत्वात् गुणस्येति वक्तव्यम् न तु स्वरस्य। किमत्र प्रयोजनम् ? आनुनासिक्यं नाम गुणः, गुणग्रहणे तद्भिन्नस्यापि यथा ग्रहणं स्यात्। कथं न ग्रहणं भवति ?

२२। भेदकत्वाद्गुणस्य।

गुणा हि भेदकाः, यतो दृश्यते लोके आत्मन्येकमप्युदकं गुणभेदात् शीतमुष्णञ्च भवति। नन्वभेदका अपि गुणा दृश्यन्ते। यथा एको हि देवदत्तः मुण्डी जटी शिख्यपि न स्वामाख्यां जहाति, तथा बालो युवा वृद्धो वत्सो दम्यो बलीवर्द इति। सुतरां

'अनुव्यचलत्', 'अनुप्राविशत्'। ततः सुपा। सुपा च सह सुप् समस्यते। अधिकारश्च लक्षणञ्च। यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भवति।"

आकारस्येति। तपरकरणमाकृतिपक्षे भिन्नकालनिवृत्त्यर्थं, व्यक्तिपक्षे तु गुणान्तरयुक्तानां ग्रहणार्थम्। यद्गुणस्योच्चारणं तद्गुणस्यैव संज्ञा प्रसज्यते अतः गुणान्तरयुक्तानां संज्ञासिद्धयेऽऽकारस्तपरः क्रियते।

शीतमुष्णञ्चेति। इदं शीतलं जलमिदमुष्णं जलमिति गुणयोगाद्भेदव्यवहारः।

तथा बाल इति। एको हि देवदत्तः बाल्याद्यवस्थाभेदेषु स एव तिष्ठति। एको

२३ । गुणा भेदका अभेदकाश्च ।*।

किं पुनरत्र न्याय्यम् ?

२४ । अभेदका गुणा इत्येव न्याय्यम् ।*।

कुतो ज्ञायते ? "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" (७।१।७५) इत्यत्र अनङादेशस्योदात्तकरणात् । कथम् ? अस्थ्यादय आद्युदात्तास्तेषामनङादेशः स्थानिवद्भावादनुदात्तः स्यादित्युदात्तग्रहणं करोति, यदि गुणा भेदकाः स्युः अस्थ्यादिकमुदात्तमेवोच्चारयेन्न त्वन्तोदात्तं कृत्वा तत्पूर्व्वमनुदात्तत्वेन परिणामयेत् । यदि तर्ह्यभेदका गुणा अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत् स्वरितादेः स्वरितान्ताच्च प्राप्नोति । नैष दोषः । आश्रीयमाणो गुणो भेदको भवति तद्यथा शुक्लमालभेत इत्युक्ते यदि कोऽपि कृष्णमालभते स यथोक्तं करोति ।

२५ । असन्देहार्थस्तर्हि तकारः ।

ऐजित्युच्यमाने सन्देहः स्यात् किमिमावैचावेव आहोस्विद् आकारोऽपि निर्दिश्यते । सन्देहे "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षण" मित्यनया त्रयाणां ग्रहणमिति व्याख्यास्यामः । यथा "औतोम्शसोः" (६।१।९३) इत्यत्र ।

इदं तर्हि प्रयोजनम्,

२६ । आन्तर्य्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन् ।

खट्वा + इन्द्रः 'खट्वेन्द्रः' 'खट्वा + ईषा' 'खट्वेषा' 'खट्वा + एलका' 'खट्वैलका'

गौर्वत्सो दम्यो बलीवर्द इत्यवस्थां प्राप्नोत्यथ च स एवायमिति तं प्रत्यभिजानाति । भेदव्यवहारोऽपि तत्तदवस्थाभेदादस्ति ।

भेदका अभेदकाश्चेति । "आम्नायशब्दा नियतस्वराः" इति वेदे गुणानां भेदकत्वम्, लोके भेदका अभेदकाश्च ।

खट्वा + ऐतिकायन: 'खट्वैतिकायन' इति। "तपरस्तत्कालस्य" (१।१।७०) इति त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति। ननु त: परो यस्मात् सोऽयं तपर:। तादपि परस्तपर:। एवं सति "ऋदोरप्" (३।३।५७) इत्यत्र उकारस्य तात्परत्वात् 'यव:' 'स्तव:' इत्यत्र प्रसर:, न तु 'लव:' 'पव:' इत्यत्र।

२७। तकार: मुखसुखोच्चारणार्थ: ।*।

एव न तकार: किन्तर्हि तकारवदुकारोऽसन्देहार्थौ मुखसुखार्थौ वा।

अदेङ् गुण: । १ । १ । २ ।

म, वृ। गुणशब्द: संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितमतद्भावितानाञ्च। तपरकरणन्त्विह सर्व्वार्थम्। 'तरिता' 'चेता' 'स्तोता' 'पचति' 'जयति' 'अहं पचे'।

गुणप्रदेशा: 'मिदेर्गुण:' (७।३।८२) इत्येवमादय:।

इको गुणवृद्धी । १ । १ । ३ ।

म, वृ, । परिभाषेयं स्थानिनियमार्था। अनियमप्रसङ्गे नियमो विधीयते। वृद्धिगुणौ स्वसंज्ञया शिष्यमाणौ इक एव स्थाने वेदतव्यौ। वक्ष्यति—"सार्व्वधातुकार्द्धधातु-

---

तकार इति। "ए ओङ्" "ऐ औच्" इति सूत्रयो: (५६पृ) विचारित:।

सर्व्वार्थमिति। "तेन तरतीत्यत्र अकार एव न तु कदाचिदाकार:। न च प्रमाणत आन्तर्य्येण नियमसिद्धि: रपरत्वे कृते एकस्याऽर्द्धमात्रत्वादपरस्यार्द्धतृतीयमात्रत्वात्।"

क्रयो:" (७।३।८४) अङ्गस्य गुण इति स इक एव स्थाने वेदितव्य:। 'तरति' 'नयति' 'भवति'। वृद्धि: खल्वपि—'अकार्षीत्' 'अहार्षीत्' 'अचैषीत्' 'अनैषीत्' 'अलावीत्' 'अस्तावीत्'। गुणवृद्धी स्वसंज्ञया विधीयेते तत्र इक इति एतदुपस्थितं द्रष्टव्यम्। किं कृतं भवति? द्वितीया षष्ठी प्रादुर्भाव्यते। मिदि-मृजि-पुगन्त-लघूपध-र्च्छि-दृशि-क्षिप्र-क्षुद्रेषु अङ्गेनेग् विशेष्यते। जुसि–सार्वधातुकादिगुणेष्विकाऽङ्गं विशेष्यते। 'भेद्यते' 'अबिभयु:'।

इक इति किम्? आत् सन्ध्यक्षर-व्यञ्जनानां मा भूत्। 'यानं' 'ग्लायति' 'उम्भिता'।

पुनर्गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम्। इह मा भूत्। 'द्यौ:' 'पन्था:' 'स इमम्' इति।

भा. स. इग्ग्रहणं किमर्थम्?

१। इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्।

(१) आकार-(२) सन्ध्यक्षर-(३) व्यञ्जननिवृत्त्यर्थम् इग्ग्रहणं क्रियते।

(१) 'याता' 'वाता' इत्यत्राऽऽकारस्य गुण: प्राप्नोति इग्ग्रहणान्न भवति। "आतोऽनुपसर्गे क:" (३।२।३) इति ककारानुबन्धकरणेन ज्ञापयत्याचार्य:, नाऽऽकारस्य गुणो भवति, यदि स्यात् गुणकृताकारप्रत्ययाकारयो: पररूपेण 'गोद:' 'कम्बलद:' इति

आकारस्येति। वर्णविधावाकारस्य विशेषाभावात् गुणस्योदाहरणं परिगृहीतम्।

कथं सिद्धं स्यात् "आतो लोप इटि च" (६।४।६४) जिग्लतीति ङित्करणेनाप्रत्ययकारलोप-साधनमनर्थकं भवेत् । सुतरां नाथं आकारनिवृत्त्यर्थेन । नैतज्ज्ञापकं नाऽऽकारस्य गुणो भवतीत्यस्य । कथं ? "तुन्दशोकयोः परिमृजापनुदोः" (३।२।५) इत्युत्तरार्थमेतत् स्यात् । यत्तर्हि "गापोष्टक्" (३।२।८) तदन्यतार्थम् (६१५,) ।

(२) 'ग्लायति' 'म्लायति' इत्यत्र सन्ध्यक्षरस्यैकारस्य गुणः प्राप्नोति, इग्लक्षणत्वान्न भवति । ऐकारत्वेनोपदेशसामर्थ्यान्न भविष्यति । यदि उपदेशसामर्थ्यान्न स्यात्, तेनायादयोऽपि न प्राप्नुवन्ति । नैष दोषः,

२ । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते ; यस्य तु विधेर्निमित्तमेव नासौ बाध्यते ।*।

अनर्थको हि गुणं प्रत्युपदेशः, आयादीनां पुनः स निमित्तमेव ।

(३) 'उम्भिता' 'उम्भितुम्' 'उम्भितव्यम्' इत्यत्र व्यञ्जनस्य गुणः प्राप्नोति, इग्लक्षणत्वान्न प्राप्नोति । "सनम्भां जनेई" (३।२।९७) इति ङित्करणेन ज्ञापयत्याचार्यो न हि

ऐकारस्येति । ऐकारस्य एकारस्य च विमात्रत्वं प्रयत्नसाम्यञ्च ततो यत्रैकारोपदेश-स्तत्राप्येकारो गुणो भवेत् ।

ऐकारत्वेनेति । यदि ऐकारोपदिष्टानां गुणेन साध्यत एकारत्वम् ऐकारोपदेशोऽन-र्थकः तेन केवलं प्रक्रियागौरवं स्यात् । सुतराम् ऐकारत्वेनोपदेशात् गुणो न भवेत् । न च वक्तव्यम्, 'ग्लै' इत्येतदुपदेशं आत्वस्य (६।१।४५) निमित्तम्, 'ग्लै' इत्येवमुपदेशेऽपि तस्य प्राप्तिरव्याहता ।

आयादीनामिति । ऐकारं विना न भवत्यायादेशः सुतरामैकार एव तस्य निमित्तम् निमित्तत्वान्न बाध्यते आयादेशः । न च वक्तव्यं ग्लाय इति पाठेनेष्टसिद्धिः, 'ग्लायते' इत्यादौ यकारद्वयश्रवणप्रसङ्गात् ।

उम्भितेति । भकारस्यैवाद्यलादौकारः स्यात् रूपन्तु भवेत् 'उनम्भिता' इति ।

व्यञ्जनस्य गुणः प्राप्नोति, यदि प्राप्नुयात् मकारस्य गुणेन यवान्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिकोऽकारः स्यात्, तेन अ + अ + अ इति त्रयाणामकाराणां पररूपेण 'उपसरजः' 'मन्दुरजः' इति कथं सिद्धं स्यात् "टेः" (६।४।१४३) इत्यनेन डिति टिलोपस्यावकाशः भवेत्। न च वक्तव्यम् असति डित्त्वे मकारस्थाने गुणत्वात्, सानुनासिकोऽकारो भवेदिति, स तु पररूपेण शुद्धो भवतीति ज्ञापकं सिद्धम्। एवं तर्हि गमेरयं डो वक्तव्यः। मकारस्य गुणे आन्तर्यत ओकारः स्यात्। तस्मादिग्ग्रहणं कर्तव्यत्वेन स्थितम्।

यदि इग्ग्रहणं क्रियते 'द्यौः' 'पन्थाः' 'स इम' मिति, एतेऽपि इकः प्राप्नुवन्ति।

३। संज्ञया विधाने नियमः।

गुणवृद्धिसंज्ञया ये विधीयन्ते तेषु नियमः। किं वक्तव्यमेतत्? न। कथं ज्ञायते?

आन्तर्यत इति। गुणे अकार एकार ओकारो वा भवति। मकारस्य स्थाने आन्तर्यतः एकारस्य ओकारस्य च प्रसङ्गाभावात्, अकारोऽत्र भवति।

पररूपेणेति। "एङि पररूपम्" (६।१।९४) इत्यत्र 'एङि पर' इतीयता सिद्धे यत् रूपग्रहणं करोति तस्येदं प्रयोजनं यादृशं पररूपं तादृक् स्यात्। ततः "अतो गुणे" (६।१।९७) इत्यनेन पररूपेण निरनुनासिकोऽकारः।

तस्मादिति। आकारनिवृत्त्यर्थं सन्ध्यक्षरनिवृत्त्यर्थं सूत्रं कर्तव्यमिति निरस्तेऽपि व्यञ्जननिवृत्त्यर्थं सूत्रं कर्तव्यमिति स्थितम्।

द्यौः पन्था इति। "दिव औत्" (७।१।८४) "पथिमथ्यृभुक्षामात्" (७।१।८५) "त्यदादीनामः" (७।२।१०२) इति उत्वम् आत्वम् अत्वम् इकामेव स्यादिति 'द्यौः' 'पन्थाः' 'स इमम्' इति पदोपन्यासः "स इमं मन्त्रमपश्यत्" इति ब्राह्मणवाक्यादुदाहरणग्रहणात्, अथवा "त्यदादीनामः" इति विभिन्नकी इक इत्यस्योपस्थितिप्रदर्शनाय। तत्र इक इत्यस्योपस्थितौ दिव्शब्दरिव अतं आगमेरयाम्।

गुणवृद्धिसंज्ञयेति। "दिव औत्" इत्यादिषु गुणवृद्धिशब्दौ न श्रूयेते अतस्तत्र इको न गुणवृद्धी भवतः। यत्र तु गुणवृद्धिसंज्ञया विधानं तत्रैव इकः गुणवृद्धी भवतः।

गुणवृद्धिग्रहणयोऽनुवर्तमाने पुनर्गुणवृद्धिशब्दग्रहणेन। यद्यनुवर्तते गुणवृद्धिग्रहणं, "अदेङ् गुणः" (१।१।२) वृद्धिश्च इति अदेङां वृद्धिसंज्ञा च प्राप्नोति। "अदेङ्गुणः" इत्यत्र आदैज्ग्रहणसम्बद्धं वृद्धिग्रहणमनुवर्तते। "वृद्धिरादैच्" (१।१।१) "अदेङ् गुणः" (१।१।२) वृद्धिरादैच्, ततः "इको गुणवृद्धी" (१।१।३) अदेङादैज्ग्रहणं निवृत्तम्।

अथवा

४। मण्डूकप्लुतयोऽधिकाराः ।*।

मण्डूकप्लुतयः "अदेङ्गुणः" इत्यत्र वृद्धिशब्दो नानुवर्तते "इको गुणवृद्धी" इत्यत्र। अथवा "वृद्धिरादैजदेङ् गुणः" इत्येकयोगः। न चैकयोगेऽनुवृत्तिर्भवति। अथवा,

५। अन्यवचनाच्चकाराकरणाच्च प्रकृतापवादो विज्ञायते यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति।

"अदेङ्गुणः" इत्यत्रान्यस्याः संज्ञाया वचनात् अनुकर्षणार्थस्य चकारस्याकरणात्

"वृद्धिरादैच्" "अदेङ् गुणः" इत्यतो गुणवृद्धिशब्दावनुवर्त्तेते, तथापि पुनर्गुणवृद्धिशब्दाश्रयणात् प्रदर्श्यते यत्र गुणवृद्धिसंज्ञया विधीयन्ते तत्रैव इक इत्यस्योपस्थितिः।

यद्यनुवर्त्तत इति। "वृद्धिरादैच्" इत्यतो "अदेङ् गुणः" इत्यत्र वृद्धिरनुवर्त्तते ततोऽदेङित्यस्य गुणवृद्धी इत्युभयसंज्ञे प्रवर्त्तेते। न तु "वृद्धिरादैच्" इत्यत्र गुणसंज्ञापि तत्रानुवर्त्तनविरहात्।

आदैज्ग्रहणसम्बद्धमिति। "सम्बन्धमनुवर्त्तिष्यते" इति भाष्यस्य अर्थं गृह्णीत आदैज्ग्रहणसम्बद्धमिति। "सम्बध्यते इति सम्बन्धम्, कर्मणि घञ् नपुंसकस्याभिधेयत्वात् नपुंसकनिर्देशः।" "अदेङ् गुणः" इत्यत्र "वृद्धिरादैज्" इति संज्ञासंज्ञिसम्बन्धमपरित्यज्यैव पूर्वसूत्रमनुवर्त्तते, तेन वृद्धिशब्दस्य अदेङ्भिर्न सम्बन्धः।

एकयोग इति। "वृद्धिरादैजदेङ् गुणः" इति एकस्मिन् योगे सति नानुवृत्तिः

प्रकृताया वृद्धिसंज्ञाया गुणसंज्ञा बाधिका भविष्यति, यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति। अथवा वक्ष्यत्येतत् "अनुवर्तन्ते च नाम विधयो न चानुवर्तनादेव भवन्ति, किन्तर्हि यत्नाद्भवन्ती"ति। अथवा उभयं निवृत्तं, यन्निवृत्तं तदिहापेक्षिष्यामहे।

किं पुनरयमलोऽन्त्यशेषः, आहोस्विदलोऽन्त्यापवादः? "एको गुणवृद्धी" "अलोऽन्त्यस्य"

सम्भवति यतः सूत्रमध्ये न कदाचिदनुवृत्तिर्भवति परसूत्रे हि ततोऽनुवृत्तिः। एकयोगे तु आदैच्सम्बद्धा वृद्धिसंज्ञा, अदेङ्सम्बद्धा गुणसंज्ञा।

बाधिकेति। अदेङ् गुण इत्यत्र वृद्धिशब्दानुवृत्तौ सन्देहः किमुभयार्थेवेहानुवृत्तिः अथवा इहार्थोपि। अदेङां गुणसंज्ञा कृता, सा च असन्दिग्धा, अनवकाशा, तात्पर्य्यान्विता, सुतरां तया सावकाशा तात्पर्य्यविरहिता वृद्धिसंज्ञा बाध्यते। यथा "कर्मण्यण्" (३।२।१) इति विधीयमानोऽण् 'आतोऽनुपसर्गे कः' (३।२।३) इति कप्रत्ययेनासन्दिग्धत्वादनवकाशत्वात्तात्पर्य्याच्च बाध्यते। "कर्मण्यण्" इत्युत्सर्गः तेन प्रसक्तस्य "आतोऽनुपसर्गे कः" इत्यपवादो बाधकः।

वक्ष्यत्येतदिति। "विभाषा तिलमाषोमाभङ्गाणुभ्यः" (५।२।४) इत्यत्र वक्ष्यते। "धान्यानां भवने क्षेत्रे खञ्" (५।२।१) "व्रीहिशाल्योर्ढक्" (५।२।२) "यवयवकषष्टिकाद्यत्" (५।२।३) विभाषा तिलमाषोमाभङ्गाणुभ्यः (५।२।४), इत्येतेषु "विभाषा तिलमाषे"त्यत्र उमाभङ्गयोरधान्यत्वात् यता सह "धान्याना"मिति खञ् प्राप्नोति। "धान्याना"मित्यतः खञ् अनुवर्त्तते। अनुवर्त्तमानोऽपि यत्नाभावात् "व्रीहिशाल्यो" "यवयवकषष्टिकादि"त्यत्रैव व्रीह्यादिभिर्न सम्बध्यते विभाषाग्रहणात् "विभाषा तिलमाषे"त्यत्र तिलादिभिः सम्बध्यते। एवं "अदेङ् गुणः" इत्यत्र अनुवर्त्तमानोऽपि वृद्धिशब्दः यत्नाभावाददेङ्भिः सह न सम्बध्यते, "इको गुणवृद्धी" इत्यत्र सम्बध्यते पुनर्गुणवृद्धि-पदद्वयग्रहणात्।

उभयं निवृत्तमिति। स्वरितलिङ्गासङ्गेन नानुवृत्तिराश्रिता। सुतराम् उभयं नष्टम्। निवृत्तस्य पुनरिहापेक्षा।

(१।१।५२) इति चेत्, तच्छेषः, "इको गुणवृद्धी" अन्त्यस्य चानन्त्यस्य चेति चेद्, तदपवादः। कश्चात्र विशेषः ?

६। वृद्धिगुणावलोऽन्त्यस्येति चेन्मिदिमृजि-पुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम्।

वृद्धिगुणौ अलोऽन्त्यस्येति चेत् मृजादिष्विग्ग्रहणं कर्त्तव्यम्। "मिदेर्गुणः" (७।३।८२) "मृजेर्वृद्धिः" (७।२।११४) "पुगन्तस्य लघूपधस्य च" (७।३।८६) गुणः, "ऋच्छत्यॄताम्" (७।४।११) लिटि गुणः, "ऋदृशोऽङि गुणः" (७।४।१६), क्षिप्रक्षुद्रयोर्गुणः (६।४।१५६) इत्येतेषु इक इति वक्तव्यम्। यतोऽनन्त्यत्वान्न प्राप्नोति।

७। सर्व्वादेशप्रसङ्गश्चानिगन्तस्य।

अलोऽन्त्यस्येति चेत 'याता' 'याते'त्यत्र अनिगन्तस्य सर्व्वादेशश्च गुणः प्राप्नोति। कथम् ?

तच्छेष इति। "अङ्गस्य" (६।४।१) इत्यधिकारसूत्रे षष्ठीनिर्द्देशात् "अलोऽन्त्यस्य" (१।१।५२) इत्यस्य तदधिकारगतगुणशब्देन इक उपस्थितिः। "इको गुणवृद्धी" इत्यत्र श्रूयमाणेन इका पूर्व्वमङ्गं विशिष्य इगन्तस्याङ्गस्य गुणो भवतीति यदि साध्यते तदा "अलोऽन्तस्ये"त्यन्त्यस्य गुणो भवन् तदनुगतत्वात् तच्छेषः। यदि पुनः पूर्व्वमेव अङ्गस्येति षष्ठ्या अङ्गान्त्यस्य गुण इति साध्यते पश्चात् इकान्त्योऽल् विशेष्यते तदापि तस्य विशेषणत्वात् तच्छेषः।

अपवाद इति। "अङ्गस्य" (६।४।१) इति यदा न स्थानषष्ठी किन्तु इगपेक्षयावयव-षष्ठी तदा स्थानषष्ठ्यभावात् "अलोऽन्त्यस्ये"त्यस्यानुपस्थानम्। सुतराम् "अलोऽन्त्यस्या"-पवादः।

इग्ग्रहणमिति। "मिदेर्गुणः" इत्यादौ इङ्गान्त्यः सुतरां "अलोऽन्त्यस्ये"त्यस्य न प्राप्तिः, गुणार्थन्तु अङ्गावयवस्यस्य इको ग्रहणाय इक इति ग्रहणं कर्त्तव्यं भवति।

"अलोऽन्त्यस्ये"ति षष्ठी अन्त्यमिकमुपसंक्रान्ता। "अङ्गस्य" (६।४।१) इति स्थानषष्ठी। तदनिगन्तस्याङ्गस्य सर्व्वादेशः प्राप्नोति। नैष दोषः। यथैव हि "अलोऽन्त्यस्ये"ति षष्ठी अन्त्यमिकमपसंक्रान्ता तथैव हि "अङ्गस्ये"ति स्थानषष्ठी अन्त्यमलं नीता। अनिगन्तेऽङ्गे नास्त्यन्या षष्ठी तत् कुतो गुणः सर्व्वादेशो वा। एवं तर्हि "सर्व्वादेशप्रसङ्गश्चे"त्यत्र चकारो न दोषसमुच्चयार्थः, पूर्व्वप्रदर्शितदोषस्य हेतुद्योतकत्वार्थे पठितः। तथाहि "मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्व्वादेशप्रसङ्गो ह्यनिगन्तस्येति"। तद्यथा, "मिदेर्गुणः" इत्यत्र "इकः" इति वचनात् अन्त्यस्य न, "अलोऽन्त्यस्ये"ति वचनात् इको न, उच्यते च गुणः, स सर्व्वादेशः प्राप्नोति। एवं सर्व्वत्र।

अस्तु तर्हि तदपवादः।

८। इङ्मात्रस्येति चेज्जुसिसार्व्वधातुकार्द्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः।

वृद्धिगुणौ इङ्मात्रस्येति चेत् जुसादिषु यो गुणस्तत्रानन्त्यप्रतिषेधो वक्तव्यः। अन्यथा

नास्त्यन्या षष्ठीति। "अलोऽन्त्यस्ये"त्यनेन यथा षष्ठी अन्त्यमलमुपसंक्रामति, तथा "अङ्गस्ये"ति षष्ठ्यपि अन्त्यमलमुपसंक्रामति, सुतराम् उभयत्र षष्ठ्या एकरूपत्वात् अनिगन्तस्याङ्गस्य न सम्भवति सर्व्वादेशगुणप्रसङ्गः यतः षष्ठ्याऽन्त्यमलं नीता। अङ्गस्येत्यनेन सर्व्वाङ्गं व्याप्रियमाणा षष्ठीत्यन्या षष्ठी चेत् स्यात् सम्भवेत् सर्व्वादेशः।

उच्यते चेति। मिदेरित्युक्ता यो गुण उच्यते स सर्व्वादेशः प्राप्नोति उभयत्रासम्भवात्।

इङ्मात्रस्येति। "अङ्गस्य" (६।४।१) इति इगपेक्षया अवयवषष्ठी। सुतराम् स्थानषष्ठ्या अलोऽन्त्यपरिभाषाया अनुपस्थानात् अङ्गावयवस्य यत्र तत्र स्थितस्येको गुणवृद्धी भवतः, निर्द्दिष्टस्थानिकत्वाभावाच्च परिभाषोपस्थितिविरहेण, "ह्रस्वस्य गुणः" (७।३।१०८) "जुसि च" (७।३।१०९) इत्येतयोः ह्रस्वेनेग् विशिष्यते ततो ह्रस्वस्येको गुणो भवति न दीर्घस्य।

(१) "जुसि च" (७।३।८३) गुण इत्यनेन "अजुहवुः" "अबिभयुः" इत्यत्र यथा तथा "अनेनिजुः" 'पर्य्यवेविषुः' इत्यत्र ; (२) "सार्व्वधातुकार्द्धधातुकयोः" (७।३।८४) गुण इत्यनेन 'कर्त्ता' 'हर्त्ता' 'नयति' 'तरति' 'भवति' इत्यत्र यथा तथा 'ईहितुम्' 'ईहितव्यम्' इत्यत्र ; (३) "ह्रस्वस्य गुणः" (७।३।१०८) इत्यनेन 'हे अग्ने' 'हे वायो' इत्यत्र यथा तथा 'हे अग्निचित्' 'हे सोमसुत्' इत्यत्र ; (४) "जसि च" (७।३।१०९) गुण इत्यनेन 'अग्नयः' 'वायवः' इत्यत्र यथा तथा 'अग्निचितः' 'सोमसुतः' इत्यत्र ; (५) "ऋतो ङिसर्व्वनामस्थानयोः" (७।३।११०) गुण इत्यनेन 'कर्त्तरि' 'कर्त्तारौ' 'कर्त्तारः' इत्यत्र यथा तथा 'सुकृति' 'सुकृतौ' 'सुकृतः' इत्यत्र ; (६) "घेर्ङिति" (७।३।१११) गुण इत्यनेन 'अग्नये' 'वायवे' इत्यत्र यथा तथा 'अग्निचिते' 'सोमसुते' इत्यत्र ; (७) "ओर्गुणः" (६।४।१४६) इत्यनेन 'बाभ्रव्यः' 'माण्डव्यः' इत्यत्र यथा तथा 'सुश्रुत्' 'सौश्रुतः' इत्यत्र—गुणः प्राप्नोति। नैष दोषः।

८। पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम्।

पुगन्तलघूपधस्यैवानन्त्यस्य नान्यस्यानन्त्यस्येति नियमार्थं पुगन्तलघूपधग्रहणं भविष्यति। "सार्व्वधातुकार्द्धधातुकयोः" (७।३।८६) इति प्रकृतस्यैष नियमः। तेन 'ईहिता' 'ईहितम्' 'ईहितव्यम्' इत्यत्रानन्त्यस्य प्राप्तौ गुणो नियमान्न स्यात् ; ह्रस्वाद्योर्गुणस्तु अनियतः सुतरामनन्त्यस्यापि स प्राप्नोति। अथ चेत् एवं नियमः स्यात्—पुगन्तलघूपधस्य

"ऋतो ङिसर्व्वनामस्थानयोः" (७।३।११०) "ओर्गुणः" (६।४।१४६) इत्युभयत्र अनन्त्यस्यापि ऋकारस्य उकारस्य गुणविधानार्थं परिभाषोपस्थितिः। "घेर्ङिति" (७।३।१११) इत्यत्र 'अग्निचिते' इत्यादौ अतिप्रसङ्गः।

अथ चेदिति ! "सार्व्वधातुकार्द्धधातुकयोः" (७।३।८४) इत्यनन्तरम् "पुगन्तलघूपधस्य च" (७।३।८५) अतएव यदि सार्व्वधातुकार्द्धधातुकयोर्लघूपधस्यैव नियमः स्यात् तदा ह्रस्वाद्यो"र्गुणो ह्यनियतः सुतरां तत्रानन्त्यस्यापि गुणः प्राप्नुयात्। अथ यदि सार्व्व-

सार्व्वधातुकार्द्धधातुकयोरेवेति, तदा सार्व्वधातुकार्द्धधातुकयोर्गुणोऽनियतः, सुतरां 'ईहिता' 'ईहितुम्' 'ईहितव्यम्' इत्यत्रानन्त्यस्यापि स प्राप्नोति । अथ चेत् उभयतो नियमः स्यात् —पुगन्तलघूपधस्यैव सार्व्वधातुकार्द्धधातुकयोः सार्व्वधातुकार्द्धधातुकयोरेव पुगन्तलघूपधस्येति, तथापि जुसि गुणोऽनियतः, सुतराम् 'अनेनिजुः' 'पर्य्यवेविषुः' इत्यत्रानन्त्यस्यापि प्राप्नोति ।

एवं तर्हि नायं तच्छेषः, नापि तदपवादः । अनया परिभाषयाऽसम्बद्धमन्यदेवेदं परिभाषान्तरम् । परिभाषान्तरमिति च मत्वा क्रोष्टियाः पठन्ति ।

१० । नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन ।

"अलोऽन्त्य"परिभाषाया इको गुणवृद्धी भवतो विप्रतिषेधेन । यद्येवं तदा तच्छेषे स्वाङ्गेन स्वस्य विप्रतिषेधोऽयुक्तः । तदपवादे तु, उत्सर्गापवादयोरप्ययुक्तो विप्रतिषेधः ।

धातुकार्द्धधातुकयोरेवेति लघूपधस्य नियमः तदा "क्ङिति"गुणः नियतः, 'ईहिते'—त्यादौ अनियतः, सुतरां तत्रानन्त्यस्यापि गुणः प्राप्नोति । उभयतो नियमेऽपि 'अनेनिजुः' इत्यत्र दोषः, यतः अङ्गमिह लघूपधम् सार्व्वधातुकञ्चेत्युभयमस्ति सुतरां जुसि गुणः प्राप्नोति । एवञ्च 'हे पिचव्य' 'हे बुद्धे' 'हे बुद्धयः' इत्यत्र अलघूपधत्वात् अनन्त्यस्य गुणप्रसङ्गः ।

अनया परिभाषयेति । अनया "अलोऽन्त्यस्ये"ति परिभाषया असम्बद्धम् "इको गुणवृद्धी" इति परिभाषान्तरम् । परिभाषाद्वयं परस्परानपेक्षं कदाचिदेकत्र सन्निपातेऽपि न परस्परापेक्षि ।

नियमादिति । 'नियमः' इति अलोऽन्त्यपरिभाषायाः पूर्व्वाचार्य्यसंज्ञा ।

स्वाङ्गेन स्वस्येति । तच्छेषे परिभाषाद्वयस्यैकत्वं तदा नास्ति तत्र तुल्यबलविरोधसम्भावना ।

तत्र "राज्ञः क च" (४।२।१४०) राजकीयमित्यत्रालोऽन्त्यपरिभाषाया अवकाशः। 'चयनं' 'चायकौ' 'लवनं' 'लावकः' इत्यत्र "इको गुणवृद्धी" इत्यस्यावकाशः, 'मेद्यति' 'मार्ष्टि' इत्यत्र "इको गुणवृद्धी" "अलोऽन्त्यस्य" इत्युभयं प्राप्नोति। विप्रतिषेधेन "इको गुणवृद्धी" इत्येतद्भवतीति चेत् न सिद्ध्यति विप्रतिषेधः। कथम्? "इको गुणवृद्धी" इति पूर्व्वः, "अलोऽन्त्यस्ये"ति परो योगः। "विप्रतिषेधे परं कार्य्यम्" (१।४।२) इति "इको गुणवृद्धी" इत्यस्य पूर्व्वस्य कार्य्याय न भवति। इष्टवाची अयं परशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति। एवमपि न सिद्ध्यति विप्रतिषेधः। कथम्? यत्र स्थानिनः द्वाभ्यां कार्य्याभ्यां योगस्तत्र भवति विप्रतिषेधः। न चात्रैकः स्थानी द्विकार्य्ययुक्तः। न हि केवलं यत्रास्ति विकार्य्ययोगस्तत्रैव विप्रतिषेधः यत्राप्यसम्भवस्तत्रापि विप्रतिषेधो भवति, तद्यथा 'वृचेभ्यः' 'प्लचेभ्यः' इत्यत्र "अतो दीर्घो यञि" (७।३।१०१) "सुपि च" (७।३।१०२) इत्यनेन दीर्घत्वम् "बहुवचने झल्येत्" (७।३।१०३) इत्यनेन एत्वम्। एको हि स्थानी द्वौ पुनरादेशौ, न हि कदाचिदेकस्य स्थानिनः द्वावादेशौ सम्भवतः। 'मेद्यति' 'मेद्यतः' 'मेद्यन्ति' इत्यत्र इकारदकाररूपौ द्वौ स्थानिनावेको गुण आदेशः। न हि सम्भवति द्वयोः स्थानिनोरेक आदेशः। सुतरां सत्येतस्मिन्नसम्भवे युक्तो विप्रतिषेधः।

एवमप्ययुक्तो विप्रतिषेधः। द्वयोर्हि सावकाशयोः समवस्थितयोः विप्रतिषेधो भवति,

---

चायक इति। "अचो ञ्णिति" (७।२।११५) इत्यत्र अच इति स्थानिनिर्द्देशोऽस्ति, तत् कथम् इक्परिभाषाया उपस्थितिः, तस्या हि अनिर्द्दिष्टस्थानिकत्वे समुपस्थितेः। अच इत्यङ्गविशेषणम् सुतरां तस्य स्थानित्वाभावात् वृद्धिग्रहणेन लिङ्गेन इक्परिभाषायाः समुपस्थितिः।

उभयमिति। 'मेद्यति' इत्यादिषु "इको गुणवृद्धी" इत्यनेन 'मिदेः' इकारस्य, "अलोऽन्त्यस्य" इत्यनेन दकारस्य प्राप्नोति।

न चात्रेति। यत्र एकस्य स्थानिनः द्वाभ्यां कार्य्याभ्यां योगो भवति तत्रैव विप्रतिषेधः, अत्र तु द्वौ स्थानिनौ इकारदकाररूपेण, गुण इति एक आदेशः।

न चायं योग: सावकाश:। ननु 'चयनं' 'चायक:' 'लवनं' 'लावक:' इत्यत्राप्यवकाश: "अलोऽन्त्यस्या"पि। एवं सति नाप्राप्तेऽपि यदयं योग आरभ्यते तेनायमपवाद:।

११। उत्सर्गापवादयोश्चायुक्तो विप्रतिषेध:।

अथापि चेत् 'मेद्यति' 'मेद्यत:' 'मेद्यन्ति' इत्यत्र कथञ्चित् विप्रतिषेधेनेको गुणो भवति, तदा "अनेनिजु:" 'पर्यवेविषु:' इत्यत्रापि प्राप्नोति। एवन्तर्हि

१२। वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयादिक इति तत्रोपस्थितं द्रष्टव्यम्।

गुणवृद्धी स्वसंज्ञया यत्र विधीयेते तत्र इक इति एतदुपस्थितं द्रष्टव्यम्। किं कृतं भवति? द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचार:, गृह्यमाणेन वा इक् विशेष्येत इका वा गृह्यमाणं विशेष्यते। मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेनेक् विशेष्यते, एतेषां य इगिति। जुसिसार्वधातुकार्द्धधातुकह्रस्वाद्योर्गुणेष्विका गृह्यमाणं विशेष्यते। एतेषां गुणो भवति इक:, इगन्तानामिति। अथवा सर्व्वत्रैवात्र स्थानी निर्द्दिश्यते, तद्यथा मिदेर्गुण (७।३।८२) इत्यत्र मिदेरिति अविभक्तिक: मिद तत: ए: मिदे:, अथवा मिद: इ: मिदि:, तत: मिदे:। "पुगन्तलघूपधस्य" (७।३।८६)

नाप्राप्तेऽपीति। अलोऽन्त्यपरिभाषाया: प्राप्तिसम्भावनायामपि आरभ्यते यदयं योग: "इको गुणवृद्धी" इति ततोऽयं तस्याऽपवाद:।

द्वितीया षष्ठीति। "मिदेर्गुण:" "मृजेर्वृद्धि:" इत्यादिषु गुणवृद्धिशब्दाभ्यां इक इति षष्ठ्यन्तं पदमुपस्थितं भवति। ततो मिदेरिक: मृजेरिक इति स्थिते सामानाधिकरण्यस्यासम्भवात् मृदिमृज्योरवयवस्य इक इति सम्बध्यते। तेनेह अवयवषष्ठी स्थानषष्ठीति द्वयोर्युगपदुपस्थानं भवति।

गृह्यमाणेनेति। गृह्यमाणं हि अङ्गम्। तेन गृह्यमाणेन अङ्गेनेति विस्पष्टम्।

इत्यत्र पुगन्ताङ्गस्य लघूपधस्य चेति न, किन्तर्हि पुकि अन्तः पुगन्तः लघ्वी उपधा लघूपधा पुगन्तस्य लघूपधा च पुगन्तलघूपधम् तस्य पुगन्तलघूपधस्येति। अङ्गविशेषणे सतीह प्रसज्येत 'भिनत्ति' 'छिनत्ति' इति। "ऋच्छत्यृताम्" (७।४।११) इत्यत्र ऋच्छति ऋ ऋ ऋतामिति प्रश्लिष्टनिर्द्देशः। "ऋदृशोऽङि गुणः" (७।४।१६) इत्यत्र योगं विभज्य ऋः अङि गुणः, ततः दृशेः ऋः अङि गुणः। "स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्व्वस्य गुणः" (६।४।१५६) इत्यत्र यणादिपरं गुण इत्यायता सिद्धे यत् पूर्व्वग्रहणं करोति तस्यैतत् प्रयोजनम् इको यथा स्यादनिको मा भूदिति।

अथ वृद्धिग्रहणं किमर्थम्? गुणग्रहणस्यापि यत् प्रयोजनं वृद्धिग्रहणस्यापि तत्। को वात्र वृद्धिग्रहणे विशेषः? अयमस्ति विशेषः। गुणविधौ न क्वचित् स्थानी निर्द्दिश्यते, सुतरां स्थानिनिर्द्देशार्थं गुणग्रहणं कर्त्तव्यम्, वृद्धिविधौ तु सर्व्वत्र स्थानी निर्द्दिश्यते। तद्यथा "अचो ञ्णिति" (७।२।११५) इत्यत्र अच इति, "अत उपधायाः" (७।२।११६) इत्यत्र अत इति, "तद्धितेष्वचामादेः" (७।२।११७) इत्यत्र अचाम् आदेरचः इति स्थानिनिर्द्देशः। अत उत्तरं पठति।

अनिक इति। स्थूलादीनां यणादिलोपे गुणे कृते रूपसिद्धिः यथा स्थूल इत्यस्य ललोपे गुणे कृते 'स्थवीयान्' 'स्थविष्ठः' इति पदसिद्धिः न तथा क्षिप्रक्षुद्रयोः। तयोरलोपे क्षिप् क्षुद् इत्याकारेणावस्थितिः। सुतरां अनिको मा भूदिति पूर्व्वस्य गुण इत्यपेक्षितम्। अतएव "स्थूलदूरे"ति सूत्रस्य योगं विभज्य स्थूलादिषु यणादिलोपे सति ओर्गुणः, क्षिप्रक्षुद्रयोस्तु पूर्व्वस्य इको गुणः।

न क्वचिदिति। क्वचिन्न निर्द्दिश्यत इति नञो व्यवहितेन सम्बन्धः। क्वचिन्निर्द्दिश्यत एव "ओर्गुणः" (६।४।१४६) इत्यादौ।

स्थानिनिर्द्देश इति। 'मिद एः' 'मिदः इः मिदेः' इत्यादिरीत्या स्थानिनिर्द्देशं साधयित्वा तच्छेषपक्षस्य दोषोद्धारः कृतः। "पुगन्तलघूपधस्ये"त्यत्रापि पुकि अन्तः पुगन्तः लघ्वी उपधा लघूपधा इति निर्द्दिश्य स्थानिनिर्द्देशः सम्भावितः। एवं तच्छेषपक्षाश्रयणे पुगन्तस्य लघूपधस्येत्यत्र इक्परिभाषाया अनुपस्थितिः। अनुपस्थानात्तु तस्य गुणस्य

१३ । वृद्धिग्रहणमुत्तरार्थम् ।

"क्ङिति च" (१।१।५) इति प्रतिषेधं वक्ष्यति स वृद्धेरपि यथा स्यात् तदर्थं वृद्धिग्रहणं क्रियते । "मृजेर्वृद्धिः" (७।२।११४) इत्यविशेषेण वृद्धिरुक्ता सा यथा 'मृष्टः' 'मृष्टवान्' इत्यत्र क्ङिति मा भूत् । ननु "मृजेर्वृद्धि" इत्यत्राविशेषेणोक्ता वृद्धिरगिको मा भूदित्यर्थमपि वृद्धिग्रहणं कर्त्तव्यम् ।

१४ । मृज्यर्थमिति चेद्योगविभागात्सिद्धम् ।

वृद्धिग्रहणं चेत् मृज्यर्थं कर्त्तव्यम्, मृजेर्वृद्धिः अचः, ततो ञ्णिति (अचः) इति योगविभागात् सिद्धम् । यद्यचः वृद्धिरुच्यते तदा 'न्यमार्ट्' इत्यत्र अटोऽपि वृद्धिः प्राप्नोति । "अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवती"ति परिभाषया अटो न वृद्धिः । भवतु तावत् "मृजेर्वृद्धिरचः" । एवं स्थिते

अनिग्लक्षणत्वात् 'भिन्न' 'छिन्नम्' इत्यादौ "क्ङिति" (१।१।५) इति गुणनिषेधो न प्राप्नोति । "त्रसिगृधिधृषिक्षिपेः क्नुः" (३।२।१४०) इत्यत्र क्नोः कित्त्वस्यानिग्लक्षणत्वेऽपि गुणनिषेधप्रवृत्तिज्ञापकत्वात् लघूपधगुणस्यानिग्लक्षणत्वेऽपि गुणनिषेधो भविष्यति । क्नुरिति कित्त्वेन क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतः ते न भवत इति । पदोपस्थितिर्भवतीति व्यक्तं पश्यन्तः कैयटाश्रितज्ञापकपक्षमन्ये न बहु मन्यन्ते, ते 'क्नु'रित्यत्र पदोपस्थितिपक्षं वर्णयन्ति ।

अनन्त्यविकार इति । "अनन्त्यविकारेऽन्त्यसदेशस्य" इति परिभाषा । अन्त्यविकारविरहिते एकस्मिन् प्रयोगे यत्र अन्त्यसदेशस्य अनन्त्यसदेशस्य च प्राप्तिः तत्र अन्त्यसदेशस्य कार्यं भवतीति परिभाषार्थः । न्यमार्ट् इत्यत्र लावस्थायामटि कृते अ + मृज् + त् एवं स्थिते अन्त्यसदेशस्य ऋकारस्य अनन्त्यसदेशस्य अटो वृद्धौ प्राप्तायाम् अन्त्यसदेशस्य ऋकारस्य वृद्धिर्नतु अनन्त्यसदेशस्य अटः ।

१५ । वृद्धिप्रतिषेधानुपपत्तिरिक्प्रकरणात् ।

इक्प्रकरणात् इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, सुतरां वृद्धेस्तु प्रतिषेधो नोपपद्यते । तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या ।

इहान्ये वैयाकरणाः, मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते,—'परिमृजन्ति' 'परिमार्जन्ति' 'परिममृजतुः' 'परिममार्जतुः' इत्याद्यर्थम् । "मृजेर्वृद्धिरचः" इत्यत्र तत्साध्यम् । यथा—"मृजेर्वृद्धिरचः" ततः "अचि क्ङिति" अचि क्ङिति मृजेर्वृद्धिर्भवति—'परिमार्जन्ति' 'परिममार्जतुः' । इदन्तु नियमार्थं स्यात्, तेन अजादावेव क्ङिति नान्यत्रेति नियमात् 'मृष्टः' 'मृष्टवान्' इत्यत्र मा भूत् । ततः, "वा" । वा अचि मृजेर्वृद्धिर्भवति—'परिमृजन्ति' 'परिमार्जन्ति' 'परिममृजतुः' 'परिममार्जतुः' इति ।

सिजर्थमेव तर्हि वृद्धिग्रहणं कर्त्तव्यम् । "सिचि वृद्धिः परस्मैपदेषु" (७।२।४) इत्यत्र अविशेषेण वृद्धिरुच्यते सा इको यथा स्यात्, अनिको मा भूत् । कस्य पुनरनिकः प्राप्नोति ? 'अचिकीर्षीत्' 'अजिहीर्षीत्' इत्यत्र अकारस्य । पूर्व्वविप्रतिषेधात् "अतो लोपः" इति लोपोऽत्र वृद्धेर्बाधकः । तर्हि 'अयासीत्' 'अवासीत्' इत्यत्र आकारस्य वृद्धिः

संक्रम इति । गुणवृद्धिनिषेधविषयक्ङितः प्राचां संज्ञा ।

साध्यमिति । णित्त्वेन निपात्यम् । "मृजेर्वृद्धिरचः" इति योगविभागात् सिद्धम् । अस्मिन्नेव "क्ङिती"ति सूत्रं सम्बध्य अचि क्ङितीति निपात्यते । ततो वेति यत्साध्यमेव व्याकरणान्तरमतेन ।

अकारस्येति । सन्धातोः सन्नन्तात् 'चिकीर्ष' इत्यकारान्तो भवति । सुतरामकारनिमित्तोऽकारस्य प्राप्नोतीति, अत्र वृद्धिदीर्घाभ्यां पूर्व्वविप्रतिषेधेन "अतो लोपः" (६।४।४८) इत्यस्य प्राप्तिः, यथा 'चिकीर्षक' इत्यत्र, सुतरां लोपोऽत्र बाधक इत्युक्तम् ।

प्राप्नोति । वृद्धौ सत्यां नास्त्यत्र कश्चिद् विशेषः । सन्ध्यक्षरस्य तर्हि वृद्धिः प्राप्नोति । नास्त्यन्तं सन्ध्यक्षरम् । ननु चेदमस्ति ढलोपे कृते 'उदवोढाम्' 'उदवोढम्' । ढलोपस्यासिद्धत्वा-

---

नास्त्यत्रेति । वृद्धावपि आकारत्वेन स्थितत्वात् ।

नास्त्यन्तमिति । सन्ध्यक्षरान्तानां धातूनामुपदेशे आत्वविधानात् "आदेच उपदेशेऽशिति" (६।१।४५) इत्यनेन ।

ढलोपस्येति । 'उदवोढा'मित्यत्र उत्+वह+ताम् इति स्थिते ढत्वसलोपादीनां "पूर्व्वत्रासिद्ध"मित्यनेनासिद्धत्वात् पूर्व्वं "वदव्रजहलन्तस्याचः"(७।२।३) इत्यनेन पूर्व्वं हलन्तलक्षणा वृद्धिः क्रियते, पश्चात् "हो ढः"(८।२।३१) इत्यनेन हकारस्य ढकारादेशः "झलो झलि" (८।२।२६) इत्यनेन ढकारस्यासिद्धत्वे हकारतकारमध्यगतसकारस्य लोपः ततः "झषस्तथोर्धोऽधः (८।२।४०) इत्यनेन तकारस्य धत्वम् । "ष्टुना ष्टुः (८।४।४१) इत्यनेन धकारस्य ढत्वं । ढत्वस्य सिद्धत्वात् "ढो ढे लोपः" (८।३।१३) इत्यनेन ढकारलोपः, ढलोपे वृद्धौ आकारभूतस्य उदवाढामित्यस्याकारस्य स्थाने "सहिवहोरोदवर्णस्य" (६।३।११२) इति ओकारः "सहिवहोरोदवर्णस्ये"त्यत्र वर्णग्रहणं कृतायामपि वृद्धौ यथा स्यादित्यर्थम् । अत्र ढलोपस्यासिद्धत्वात् ओकारान्तत्वाभावात् न भवेदोकारस्य वृद्धिः । असिद्धत्वं हि कृतेऽपि अकृतवत् प्रतिभानं, यथाच लोपेऽपि अलुप्तवत् ग्रहणम् । ननु गो-शब्दात् "सर्व्वप्रातिपदिकेभ्य आचारे क्विप् वक्तव्यः । * ।" इत्यनेन आचारक्विपि 'गो' इति "सनाद्यन्ता धातवः" (३।१।३२) इति धातुः निष्पन्नस्तत्र सन्ध्यक्षरान्तत्वमस्ति ततो यत् 'अगवीत्' इति पदं सिध्यति तत्र औकारस्य वृद्धिः प्राप्नोतु ? "ॠत इद्धातोः" (७।१।१००) इत्यतो धातोरित्यनुवर्त्त्य विजातीयस्य धातोर्विशेषणे धातोरेव धातोर्न तु नामधातोरिति व्याख्यानात् न दोषः । माधवस्तु नामधातोरपि वृद्धिमिच्छति ततः कविशब्दात् आचारक्विपि 'अकवाधीत्' इति तन्मते वृद्धिः । अस्य समाधानार्थं यत् यदुक्तं तत् सर्व्वमभ्युपेत्यवादत्वेन न वयं बहु मन्यामहे । इदन्तु मतान्तरं धातोरित्यनुवर्त्तनेनेति सुष्ठ्ववधेयम् ।

माल्यवान्त्यं सम्यक्परम्। तर्हि 'अभैत्सीत्' 'अच्छैत्सीत्' इत्यत्र व्यञ्जनस्य वृद्धिः प्राप्नोति, "वदव्रजहलन्तस्याचः" (७।२।३) इत्यनेन हलन्तलक्षणा वृद्धिर्बाधिका भविष्यति। तर्हि 'अकोषीत्' 'अमोषीत्' इत्यत्र "नेटि" (७।२।४) इत्यनेन हलन्तलक्षणा वृद्धिः प्रतिषिध्यते तस्यां प्रतिषिद्धायाम् "सिचि वृद्धिः परस्मैपदेषु"(७।२।१) इत्यनेन व्यञ्जनस्य वृद्धिः प्राप्नोति। सिचि वृद्धेरप्येष प्रतिषेधः। कथम्? "लक्षणं हि नाम ध्वनति भ्रमति मुहूर्त्तमपि नावतिष्ठते।" अथवा "सिचि वृद्धिः परस्मैपदेषु"(७।२।१) इति सिचि वृद्धिः, तस्या हलन्तलक्षणा (७।२।३) वृद्धिर्बाधिका, तस्या अपि "नेटी"(७।२।४)ति। अस्ति पुनः क्वचिदन्यत्र यदपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवति? अस्ति यथा—"सुजाते अश्व सूनृते अध्वर्यो अद्रिभिः सुतम्। शुक्रं ते अन्यत्" इति पूर्वरूपे प्रतिषिद्धे अयादयोऽपि न भवन्ति।

"क्ङिती"(१।१।५)त्युत्तरार्थं तर्हि सिजर्थं वृद्धिग्रहणं कर्त्तव्यम्। सिचि अविशे-

---

लक्षणं हीति। नेटीति लक्षणं ध्वनति अविशेषेण वृद्धिग्रहणमात्रस्य निषेधं व्यक्तमुदीरयति। प्रतिषेधस्यैकत्र चरितार्थतायां प्रतिषेधान्तरे न स्यात् प्रवृत्तिरत आह भ्रमति सर्वत्र व्याप्रियत इत्यर्थः। यदा स्यादेकस्मिन् निषेधप्रवृत्तिः, तदैव द्वितीये निषेधे प्रवृत्तिर्न सम्भवतीत्यस्य निरसनायाह मुहूर्त्तमपि नावतिष्ठते उभयत्र गतिशीलत्वात् नैकस्मिन् विश्राम्यति।

तस्या अपीति। सिचि वृद्धेरपि।

अस्तीति। "सुजाते अश्वे" "प्रकृत्याऽन्तः पादमव्यपरे" (६।१।११५) इत्यनेन प्रकृतिभावः प्राप्नोति। तत्सूत्रस्य "नान्तः पादमव्यपरे" इति पाठमवलम्ब्याह पूर्वरूपप्रतिषिद्धे इति। एवं सति 'वृक्षौ' इत्यत्र "नादिचि" (६।१।१०४) इत्यनेन पूर्वसवर्णदीर्घनिषेधे "वृद्धिरेचि" (६।१।८८) प्राप्तया वृद्धेरपि निषेधप्रसङ्गः। "भिद्योद्ध्यौ नदे" (३।१।११५) इत्यादिलिङ्गात् "अपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवती"त्यस्य न सार्वत्रिकी प्रवृत्तिः।

वेधीता वृद्धिः 'व्यनुवीत्' इत्यत्र क्ङिति मा भूत् । अन्तरङ्गत्वादत्रोवङादेशे कृतेऽनन्त्यत्वाद्वृद्धिर्न भविष्यति । यदि तर्हि सिचि अन्तरङ्गं भवति, 'अकार्षीत्' इत्यत्र अन्तरङ्गत्वात् गुणे कृते रपरत्वे चानन्त्यत्वान्न वृद्धिः प्राप्नोति ? रपरत्वे हलन्तलक्षणा वृद्धिर्भविष्यति । तर्हि 'न्यखारीत्' 'न्यदारीत्' इत्यत्र अन्तरङ्गत्वाद्गुणे कृते रपरत्वे अनन्त्यत्वात् वृद्धिर्न प्राप्नोति, "नेटी"(७।२।४)ति प्रतिषेधादत्र हलन्तलक्षणा वृद्धिरपि न ? "अतो ल्रान्तस्य" (७।२।२) इत्यनेन अतो वृद्धिर्भविष्यति । तर्हि 'अलावीत्' 'अपावीत्' इत्यत्र अन्तरङ्गत्वात् गुणे कृतेऽवादेशे वान्तत्वाद्वृद्धिर्न प्राप्नोति, "अतो ल्रान्तस्य" (७।२।२) त्यत्र "लोपो व्योर्वलि" (६।१।६६) इत्यनेन लोपेन वकारस्याप्यस्तित्वपर्य्यवसानात् वान्तेऽपि ल्रान्तस्येवं वृद्धिर्भविष्यति । यदि लुप्तनिर्द्दिष्टो वकारः तदा 'मा भवानवीत्' 'मा भवान् मवीत्' इत्यत्रापि प्राप्नोति, अविमव्योर्नेति वक्ष्यामि । तत् तर्हि वक्तव्यम् । न वक्तव्यम् । "ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्" (७।२।५) इत्यत्रश्वयि-श्विभ्यां तौ परिवर्त्तनीयौ । अस्मिन् पक्षे णिश्व्योः प्रतिषेधोऽपि न वक्तव्यो भवति, यतः अन्तरङ्गत्वात् गुणे कृतेऽयादेशे यान्तत्वात् 'ह्म्यन्ते'त्यनेन यान्तानां नेति प्रतिषेधो भविष्यति । एवं तर्हि आचार्य्यप्रवृत्तिर्ज्ञापयति न सिच्यन्तरङ्गं भवतीति । कथम् ? यदि

अन्तरङ्गत्वादिति । व्यनु + वूँत् इत्यत्र साक्षात्सम्बन्धेन सिचमेवापेक्षते सुतरां "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" (६।४।७७) इत्यनेन उवङ् अन्तरङ्गम्, वृद्धिस्तु सिचि परस्मैपदे भवतीति तदपेक्षया बहिरङ्गम् ।

रपरत्व इति । गुणे कृते अकर् इति स्थिते हलन्तत्वात् हलन्तलक्षणा (७।२।३) वृद्धिर्भविष्यतीत्युक्तम् ।

न सिचीति । अन्तरङ्गमपि गुणं वृद्धिर्वचनाद्बाधते "येन नाप्राप्ति"न्यायेन । यदि न वृद्ध्या गुणो बाध्येत, तदा चिरिजिर्योर्यङ्लुगन्तेभ्यस्तथा ण्यादिभ्यो लुङि सिचि अचिरायीत् अजिरायीत् अनेनायीत् अचेक्षायीदित्यादौ वृद्धिर्न स्यात् गुणयादेशयोः कृतयोः यान्तत्वात् "ह्म्यन्ते"त्यनेन वृद्धिप्रतिषेधो भवेत् ।

सिचि अन्तरङ्गं भवेत् तदा ‘अकोषीत्’ ‘अमोषीत्’ इत्यत्र गुणे कृते अलघुत्वात् वृद्धिर्न भवेत् “अतो हलादेर्लघोः” (७।२।७) इति हलादेर्लघोरकारस्येति अकारनिर्द्देशोऽनर्थकः स्यात्। सुतराम् अकारग्रहणं ज्ञापकं सिचि नान्तरङ्गं भवतीति। नैतदस्ति ज्ञापकम्? यत्र गुणः प्रतिषिध्यते तदर्थमेतत् स्यात्—‘न्यकुटीत्’ ‘न्यपुटीत्’। यत्तर्हि णिश्व्योः (७।२।५) प्रतिषेधं शास्ति तेन ज्ञापयति नास्ति सिच्यन्तरङ्गमिति, अन्यथा गुणायादेशयोः कृतयोः यान्तत्वात् “ह्म्यन्त”त्यनेन सिद्धेरन् प्रतिषेधः, यच्च “लघो”(७।२।७)रिति कृतेऽपि अकारग्रहणं करोति तदपि ज्ञापकम्।

१६। तस्मादिग्लक्षणा वृद्धिः।

तस्मात् इग्लक्षणा वृद्धिः आश्रेया।

१७। षष्ठ्याः स्थाने योगत्वादिङ्निवृत्तिः।

“षष्ठी स्थानेयोगा” (१।१।४९) इति षष्ठ्याः स्थानेयोगत्वात् इक इत्युक्तत्वात् सर्व्वेषामिकां गुणवृद्ध्यादेशेन निवृत्तिः प्राप्नोति, सुतरां ‘दधि’ ‘मधु’ इत्यत्रापि इकां निवृत्तिः प्राप्नोति।

अथ पुनर्व्वचनमिदानीं किमर्थम् स्यात्?

सर्व्वेषामिकामिति। “इको गुणवृद्धी” इति स्वतन्त्रमिदमिक्स्थाने गुणवृद्धिविधायकसूत्रमिति वादमुत्थाप्य वदति इङ्मात्रस्य निवृत्तिः सुतरां ‘दधि’ ‘मधु’ इत्यत्रापि तस्य प्राप्तिरिति यत्र गुणवृद्धिशब्दोच्चारणेन गुणवृद्धी विधीयेते तत्र इक इत्युपस्थितं द्रष्टव्यमिति प्रदीपस्यानपत्तमनपेक्ष्योक्तम्।

पुनर्व्वचनमिति। यदि सर्व्वेषामिकामनेन सूत्रेण निवृत्तिर्भवेत्, तदा कथम् पुनः “वृद्धिरादैच्” “अदेङ् गुणः” इत्यादिरूपं गुणवृद्धिशब्दोच्चारणम्? तदुत्तरयति वार्त्तिकेन “अन्यतरार्थं पुनर्व्वचन”मिति।

१८। अन्यतरार्थं पुनर्व्वचनम् ।

गुणवृद्ध्योरनुवर्त्तमानेऽपि द्वितीयं गुणवृद्धिग्रहणम् "सार्व्वधातुकार्द्धधातुकयो"-(७।३।८४)र्गुण एवेति अन्यतरार्थम् ।

१९। प्रसारणे च ।

"इग्यणः सम्प्रसारणम्" (१।१।४५) इत्यत्र यण इति स्थानषष्ठी सुतरां सर्व्वेषां यणां निवृत्तिः प्राप्नोति। सुतरां 'याता' 'वाता' इत्यत्रापि यणां निवृत्तिः प्राप्नोति । पुनर्व्वचनमिदानीं किमर्थं स्यात् ?

२०। विषयार्थं पुनर्व्वचनम् ।

"वचि स्वपि-यजादीनां किति" (६।१।१५) एवेति विषयनियमार्थमेतत् स्यात्।

२१। उरण् रपरे च ।

"उरण् रपरः" (१।१।५१) इत्यत्र उरण् रपरे उरिति स्थानषष्ठ्या सर्व्वेषामृकाराणां निवृत्तिः प्राप्नोति। सुतरां 'कर्त्तृ' 'हर्त्तृ' इत्यत्रापि ऋकाराणां निवृत्तिः प्राप्नोति।

२२। सिद्धन्तु षष्ठ्यधिकारे वचनात् ।

षष्ठ्यधिकारे वचनात् सिद्धमेतत्। "उरण् रपर" इति एकोऽसौ योगः षष्ठ्य-

---

अन्यतरार्थमिति। "इको गुणवृद्धी" इति सूत्रकरणात् गुणवृद्धिशब्दप्राप्तौ द्वितीयं गुणवृद्धिग्रहणमनुवर्त्तनार्थम्। तत्र पुनः अन्यतरार्थम् गुणवृद्धिनियमार्थम् ।

प्रसारणे चेति। समाम्नायप्रदर्शनार्थमस्य वार्त्तिकस्योपन्यासः ।

सिद्धमिति। "सार्व्वधातुकार्द्धधातुकयोः" "भस्य" "वचिस्वपियजादीनाम्" "ऋत इद्धातोः" इत्यादिषु यत्र षष्ठी तत्रैव एतेषामुपस्थितिः। सुतराम् 'इको गुणवृद्धी' 'इग्यणः सम्प्रसारणम्' "उरण् रपर" इत्येतेषां स्वातन्त्र्यं सर्व्वथा परिहृतम्। "षष्ठी स्थानेयोगा" इत्यत्र षष्ठीति योगं विभज्यैतत् भवति यत्र षष्ठी तत्रोपतिष्ठत इति।

धिकारे क्रियते, "इको गुणवृद्धी" "इग्यणः सम्प्रसारणम्" इतीमौ योगावपि षष्ठ्यधिकारमनुवर्त्तिष्येते, अथवा इमौ योगावपेक्षिष्यामहे षष्ठ्यधिकारे ।

अथवा तावदिदं प्रष्टव्यं, "सार्व्वधातुकार्द्धधातुकयोः" गुणो भवतीति 'याता' 'वाता' इत्यत्र कथं न भवति ? "इको गुणवृद्धी" इति तत्रापेक्षिष्यत इति न गुणः । यथा तर्हि 'याता' 'वाता' इत्यत्र "इको गुणवृद्धी" इत्यस्यापेक्षा तथा "सार्व्वधातुकार्द्धधातुकयोः" "इको गुणवृद्धी" इत्यपेक्षिष्यामहे ।

इति श्रीभाष्यसङ्कलनायां प्रथमाध्यायस्य प्रथमे
पादे तृतीयमाह्निकम् ।

षष्ठ्यधिकारे इति । "षष्ठी स्थानेयोगा" (१।१।४९) इति यद्यपि "इको गुणवृद्धी" "इग्यणः सम्प्रसारणम्" इत्यनयोः परवर्त्ति, तथापि स्वरितत्वात् ताभ्यां सम्बध्यते । कथमन्यैः सूत्रैर्न सम्बन्धः ? अयोग्यत्वात् ।

अपेक्षिष्यामहे । योग्यत्वादपेक्षा ।

अथवेति । 'वृद्धिरादैच्' "अदेङ् गुणः" इति पुनर्व्वचनम् अनिकोऽपि गुणवृद्धिसाधनाय भवतु विध्यर्थम् । एवं सति 'याता' 'वाता' इत्यत्रापि गुणप्रसङ्गः । न भवेत् । कथम् ? सिद्धान्तपक्षे "अन्यतरार्थं पुनर्व्वचन"मिति वार्त्तिकस्यायमर्थः गुणवृद्ध्यनुवर्त्तमानेऽपि पुनर्गुणवृद्धिशब्दग्रहणम् अन्यतरार्थम् गुणवृद्ध्योरन्यतरो य इक्शब्दस्तदर्थम् । तेनेदं निष्पन्नं भवति "यत्र गुणवृद्धिशब्दोच्चारणेन गुणवृद्धी विधीयेते तत्रैक इत्युपतिष्ठते ।

यथेति । लक्ष्यसिद्धये 'याता' 'वाता' इत्यत्र यथा "इको गुणवृद्धी" इत्यस्यापेक्षा तथा "सार्व्वधातुकार्द्धधातुकयो"रित्यत्रापि भवितुमर्हति । यतो 'याता' 'वाता' इत्यत्र "सार्व्वधातुकार्द्धधातुकयोः" इत्यनेनैव गुणप्राप्तिः, तत्र यदा "इको गुणवृद्धी" इत्यस्यापेक्षा तदा एकवाक्यतानिष्पादनाय "सार्व्वधातुकार्द्धधातुकयोः" इत्यत्रापि तस्य व्यपेक्षा ।

इति श्रीतत्त्वसङ्कलनायां प्रथमाध्यायस्य प्रथमपादे तृतीयाह्निकम् ।

चतुर्थाह्निकम् ।

न धातुलोप आर्द्धधातुके । १ । १ । ४ ।

म. वृ. । धात्वेकदेशो धातुस्तस्य लोपो यस्मिन्नार्द्धधातुके तदार्द्धधातुकं धातुलोपं तत्र ये गुणवृद्धी प्राप्नुतस्ते न भवतः । 'लोलुवः' 'पोपुवः' 'मरीमृजः' । लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि विहिते "यङोऽचि च"(२।४।७०) इति यङो लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः ।

धातुग्रहणं किम् ? लूञ् 'लविता' 'रेभसि' 'पर्णं नयेः' अनुबन्धप्रत्ययलोपे मा भूत् । रिषेर्हिंसार्थस्य विच्प्रत्ययलोपे उदाहरणं 'रेड्'ति ।

आर्द्धधातुक इति किम् ? 'त्रिधा बद्धो वृषभो रोरवीति' सार्व्वधातुके मा भूत् ।

इक इत्येव 'अभाजि' 'रागः' ।

भा. स. । धातुग्रहणं किमर्थम ? लूञ्—'लविता' 'लवितुम्' पूञ्—'पविता' 'पवितुम्' इत्यत्र अनुबन्धलोपे मा भूत् । आर्द्धधातुक इति ग्रहणं किमर्थम् ? "त्रिधा बद्धो वृषभो रोरवीति" (ऋक् ४म. ५८सू. ३ऋक्) इत्यत्र सार्व्वधातुके मा भूत् । किं पुनः आर्द्धधातुकनिमित्ते धातुलोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इति लोपविशेषणं

किं पुनरिति । धातुलोपोऽत्र धात्वेकदेशलोपः, अन्यथा समग्रधातुलोपे गुणवृद्धयोः प्राप्तेरसम्भावना । न च वक्तव्यं नास्ति कुत्रापि समग्रधातोर्लोपः । "दुरीणो लोपश्च"

आर्द्धधातुकग्रहणम्, अथवा धातुलोपे सति आर्द्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति गुणवृद्धिविशेषणमार्द्धधातुकग्रहणम्। यदि लोपविशेषणम् 'उपेद्धः' 'प्रेद्धः' इत्यत्रापि इन्धेः क्तप्रत्ययनिमित्तके नलोपे गुणनिषेधः प्राप्नोति। यदि गुणवृद्धिविशेषणम् 'क्नोपयति' इत्यत्रापि क्नुयीशब्दात् णिचि पुकि यलोपे पुगन्तलघूपधगुणनिषेधः प्राप्नोति। लोपविशेषणं गुणवृद्धिविशेषणं वा यथेच्छं भवतु। भवतु ततो लोपविशेषणम्। कथम् तदा 'उपेद्धः' 'प्रेद्धः' इति? बहिरङ्गो गुणः, अन्तरङ्गः प्रतिषेधः।

(उण. २।२०) इत्यनेन दुःपूर्व्वस्येणधातोः रक्प्रत्यये धातोर्लोपेन 'दूरम्' इति पदं सिद्धम्। धातोर्लोप इति षष्ठीतत्पुरुषे आर्द्धधातुकमितीदं लोपविशेषणं वा गुणवृद्धिविशेषणं वा तन्त्रावृत्त्यादिभिरुभयविशेषणं वेति पक्षत्रयस्य सम्भावनात् प्रश्नः किं पुनरिति।

कथं तदेति। 'उपेद्धः' 'प्रेद्धः' इत्यत्र, "पूर्व्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण" "यस्त्वसौ धातूपसर्गयोरभिसम्बन्धोऽस्ति तमभ्यन्तरीकृत्य धातुः साधनेन युज्यत" इति पक्षद्वयस्य (३ पृ.) भाष्ये सत्त्वात् "बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः" इति वदताऽत्र प्रथमपक्षः परिगृहीतः। तत एवं भवति इन्धेः क्तप्रत्यये नलोपेन 'इद्धः' इति पदं सिद्धम्। नलोपस्य प्रथमोपनतक्तप्रत्ययापेक्षत्वादन्तरङ्गत्वं तदनन्तरं भाविनो गुणस्य तु बहिरङ्गत्वम्। "असिद्धं बहिरङ्गमन्तरङ्गे" इत्येतस्याः परिभाषाया अयमर्थः अन्तरङ्गे कर्त्तव्ये जातं तत्कालप्राप्तिकञ्च बहिरङ्गमसिद्धम्। 'उपेद्धः' 'प्रेद्धः' इत्यत्र गुणस्य बहिरङ्गत्वात् असिद्धत्वम्, असिद्धत्वे कृतोऽपि गुणोऽकृतवदिति निषेधायोगः। यदि धातूपसर्गयोः साधनात् पूर्व्वमेवाभिसम्बन्धः स्यात्, ततोऽपि न कापि क्षतिः। एवं सति गुणोऽन्तरङ्गः नलोपो बहिरङ्गः। नलोपस्य बहिरङ्गत्वादसिद्धत्वम्। असिद्धत्वे कृतोऽपि लोपोऽकृतवदिति निषेधायोगः। ननु "असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषाया नात्र प्राप्तिः "नाजानन्तर्य्ये बहिष्ट्वप्रकॢप्तिः" इति निषेधात्। अस्याः परिभाषाया अयमर्थः, अन्तरङ्गे कर्त्तव्ये यत्र आनन्तर्य्येण अव्यवहितत्वेन अचोराश्रयणं तत्र न बहिष्ट्वप्रकॢप्तिः बहिरङ्गत्वप्राप्तिः। यथा 'अक्षद्यूः' इत्यत्र "च्छ्वोः शूडनुनासिके च" (६।४।१९) इत्यनेन वकारस्य

"असिद्धं बहिरङ्गमन्तरङ्गे" इति बहिरङ्गस्य गुणस्यासिद्धतया निषेधायोगः। यद्येवं धातुग्रहणेन नार्थः। लूञ्-'लविता' 'लवितुं' इह कस्मान्न भवति? न चात्रार्धधातुकनिमित्तो लोपः लोपोऽनुबन्धस्य। अथवास्तु गुणवृद्धिविशेषणम्। ननु चोक्तं 'क्नोपयति' इत्यत्रापि प्राप्नोति। नैष दोषः "चेले क्नोपेः" (३।४।३३) इति निपातनात् सिध्यति। सत्येवं परिगणनं कर्त्तव्यम्।

१। यङ्यक्क्यवलोपे प्रतिषेधः।

यङ्-यक्-क्य-वलोपे प्रतिषेधो भवतीति परिगणनं कर्त्तव्यम्। तद्यथा यङ्—'बेभिदिता' बेभिद्यशब्दात् तृच् इट्, "यस्य हलः" (६।४।४९) इति यलोपः। 'मरीमृजः' "यङोऽचि" (२।४।७४) इति यलोपः। एवं यक्—'कुषुभिता' 'मगधकः'। क्य—'समिधिता' 'दृषदकः'।—"क्यस्य विभाषा" (६।४।५०) इति यलोपः। वलोपे—'जीरदानुः' इत्येतेषु गुणप्रतिषेधः कर्त्तव्यः।

ऊठ् बहिरङ्गम्, यण् अन्तरङ्गः। "इको यणचि" (६।१।७७) इत्यनेन अक्षदि+ऊ इत्यत्र अन्तरङ्गे यणि कर्त्तव्ये इगचोराश्रयणम्। तत्र जातस्य ऊठ इति ऊकारस्य बहिरङ्गासिद्धत्वमनाश्रित्य यण्त्वेन 'अक्षद्यूः' इति पदसिद्धिः। अत्र तु नकारलोपोऽन्तरङ्गः गुणो बहिरङ्गः सुतरां नास्मिन् प्रतिषेधसूत्रे अचोराश्रयणम्। अचोरनाश्रयणे कुतो वा "नाजानन्तर्ये" इति परिभाषायाः प्राप्तिः।

धातुग्रहणेनेति। "असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषयाऽन्यथाकर्तुं शक्यत्वात्।

सत्येवमिति। धातुग्रहणस्याभावे यत्र यत्र प्रतिषेधस्य प्रयोजनं तेषां परिगणनं कर्त्तव्यम्।

यलोप इति। "य इत्ययमकारान्तोऽपि विवक्षितः, तेन धातुपाठे योऽकारान्तः पठितः तस्य ग्रहणम् अन्यथा विधिः कथं सिध्येत।"

कुषुभितेति। "कुषुभमगधशब्दौ कण्ड्वादिगणपठितौ धातू ताभ्यां यक्।"

किं प्रयोजनम्?

२। नुम्लोप-स्रिव्यनुबन्धलोपे प्रतिषेधार्थम्।

नुम्लोपे स्रिव्य-नुबन्धलोपे च प्रतिषेधो माभूत्। नुम्लोपे—भञ्जेः—'अभाजि', रञ्जेः—'रागः', बृंहेः—'उपबर्हणम्'। स्रिवेः मनिन्—'आस्रेमाणम्'। अनुबन्धलोपे—लूञ् 'लविता' 'लवितुम्'।

यदि परिगणनं क्रियते, "स्यदो जवे" (६।४।२८) इति 'स्यदः', "अवोदैधौद्मप्रश्रथहिमश्रथाः" (६।४।२९) इति 'प्रश्रथः' 'हिमश्रथः' इत्यत्रापि वृद्धिः प्राप्नोति। वक्ष्यत्येतत्, "निपातनात् स्यदादिषु" इति।

तर्हि परिगणनं कर्त्तव्यम्? न कर्त्तव्यम्। नुम्लोपे कस्मान्न भवति?

३। इक्प्रकरणान्नुम्लोपे वृद्धिः।

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः। सुतरां भवत्येव नुम्लोपे वृद्धिः।

किं प्रयोजनमिति। एवं परिगणने किं प्रयोजनमिति शेषः। यत्र यत्र परिगणनं तत्र तत्र निषेधः, तदतिरिक्तेषु निषेधस्याप्रवृत्तिः।

नुम्लोप इति। नुमिति नकारस्य पूर्व्वाचार्य्यसंज्ञा।

उपबर्हणमिति। बृहि वृद्धौ, इदित्वात् "इदितो नुम् धातोः" (७।१।५८) इत्यनेन नुम्। "बृहेरच्यनिटि" इति वार्त्तिकेन नलोपः।

अनुबन्धलोप इति। परिगणनेन हि धातुग्रहणस्यानर्थक्यं प्रतिपन्नम्। ततो धातुग्रहणं न कर्त्तव्यं भवतीति अनुबन्धलोपोऽत्र प्रयोजनत्वेन परिगृहीतः।

परिगणनमिति। यत्र यत्र निषेधो भवति तस्य तस्य परिगणनात् तदन्यत्र गुणवृद्धी प्राप्नुतः। अत आह "यदि परिगणनं क्रियते" इत्यादि।

इक्प्रकरणादिति। स्थान्यन्तरनिरपेक्षे इक्परिभाषा आश्रियते, तत्रायं निषेधः।

यदि इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, 'स्यदः' 'प्रश्रथः' 'हिमश्रथः' इत्यत्र न प्राप्नोति, 'अवोदः' 'एधः' 'ओद्मः' इत्यत्र वृद्धिः प्राप्नोति।

४। निपातनात् स्यदादिषु।

स्यदादिषु निपातनात् प्रतिषेधो भविष्यति। न च भविष्यति। यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः क्ङित्यनुबन्धलोपे कथम्?

५। प्रत्ययाश्रयत्वादन्यत्र सिद्धम्।

आर्धधातुकनिमित्ते लोपे प्रतिषेधः, न चैष आर्धधातुकनिमित्तो लोपः। यद्यार्धधातुकनिमित्ते लोपे प्रतिषेधः, 'जीरदानुः' इत्यत्र वर्णनिमित्ते लोपे न प्राप्नोति।

६। रकि ज्यः सम्प्रसारणम्।

नैतत् जीवेः रूपम्। एतत् रकि ज्यः सम्प्रसारणं भवति। रकि कित्वात् जीवेरपि सिद्धं भवति। कथम् 'उपबर्हणम्'? बर्हिः प्रकृत्यन्तरम्। कथम् विज्ञायते? "बृंहेरच्यनिटि" इति यत् लोप उच्यते। अनजादावपि लोपो दृश्यते 'निबृह्यते'। अनिटीति चोच्यते, इडादावपि दृश्यते 'निबर्हिता' 'निबर्हितुम्' इति। अजादावपि न दृश्यते लोपः 'बृंहयति' 'बृंहकः'।

तस्मान्नार्थः परिगणनेन। यदि न परिगणनं क्रियते 'भेद्यते' 'छेद्यते' इत्यत्रापि

न च भविष्यतीति। क्ङित्यनुबन्धलोपपरिहारासिद्धत्वादुक्तम् न च भविष्यतीति। तत्परिहारं करोति प्रत्ययाश्रयत्वादिति।

वर्णनिमित्त इति। 'जीरदानुः' इत्यत्र वर्णनिमित्तो लोपः न तु प्रत्ययनिमित्तः।

रकि ज्य इति। ज्या वयोहानावित्यस्मात् धातोः रक्प्रत्ययः। ज्याधातोः सम्प्रसारणे रक्प्रत्यये च जीर इति रूपं सिद्धम्।

प्रकृत्यन्तरमिति। बृह बृहि वृद्धाविति पाठात्।

भेद्यत इति। भेद्यत इत्यत्र आर्धधातुकनिमित्तो गुणो णिलोपश्च सुतरां गुणवृद्धिविषये लोपविषये च दोषः। भिदेर्णिजन्तात् कर्मणि यकि भिद्+इ+य इति

प्राप्नोति । नैष दोषः । धातुलोप इति न धातोर्लोपः किन्तर्हि धातोर्लोपो यस्मिन् तदिदं धातुलोपं धातुलोप इति ।

७ । तस्मादिग्लक्षणा वृद्धिः ।

यदि इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, तदा 'पापचकः' 'पापठकः' 'मगधकः' 'हृषदकः' अत्र न वृद्धिनिषेधः प्राप्नोति ।

८ । अल्लोपस्य स्थानिवत्त्वात् ।

अकारलोपे कृते तस्य स्थानिवद्भावात् गुणवृद्धी न भविष्यतः ।

९ । अनारम्भो वा ।

अनारम्भो वा पुनरस्य योगस्य न्याय्यः । कथं ''बेभिदिता' 'मरीमृजकः' 'कुषुभिता' 'समिधिता' इति । अत्रापि अकारलोपे कृते तस्य स्थानिवद्भावात् गुणवृद्धी न भविष्यतः ।

यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः । क्व च नास्ति ? यत्र हलचोरादेशः 'लोलुवः' 'पोपुवः' 'मरीमृजः' 'सरीसृपः' इति ।

स्थिते ''णेरनिटि'' (६।४।५१) इत्यनेन नित्यत्वात् णिलोपे कृते ''प्रत्ययलोपे प्रत्ययलक्षणम्'' (१।१।६२) इति प्रत्ययलक्षणेन णिचमाश्रित्य क्रियमाणो गुण आर्धधातुकनिमित्त-णिलोपवशात् निषिध्येत, न च वक्तव्यम् अन्तरङ्गत्वात् णिलोपात् प्रागेव गुण इति, भिद् + इ + य इति विभज्यान्वाख्यानपक्षे तदसम्भवः, प्राग्गुणे कृते संजातोऽपि उत्सर्गो गुणः क्रियमाणेन णिलोपेनापवादेन बाध्यते ।

लोपो यस्मिन्निति । बहुव्रीहौ सति लोपस्य गुणवृद्ध्योश्च एकार्धधातुनिमित्तत्वमा-स्थितमिति भेद्यत इत्यादौ यो गुणनिषेधः प्राप्नोति भिन्ननिमित्तकत्वान्न स भवति ।

हलचोरादेश इति । यङ् इति कृत्स्नयकाराकारयोर्लुका लोपः ।

अत्रापि अकारलोपे कृते तस्य स्थानिवद्भावात् गुणवृद्धी न भविष्यतः। "यङोऽचि च" (२।४।७४) लुक् इत्यनेन लुकि कृते अकारस्य स्थानिवद्भावो न प्राप्नोति। "यङोऽचि च" इत्यनेन लुक् क्रियतां "अतो लोपः" (६।४।४८) इति लोपः क्रियताम्। तत्र परत्वात् अल्लोपः, एवं लोपेऽकारस्य स्थानिवद्भावः। ननु नित्यो लुक्, यतः कृतेऽपि अल्लोपे प्राप्नोति, अकृतेऽपि प्राप्नोति। लुगपि अनित्यः, कथम्? अन्यस्य कृते प्राप्नोति, अन्यस्याकृते। "शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति।" लोपे प्राप्तेऽपि लुगारम्भात् लुगनवकाशः। सावकाशो लुक् यतो यकारस्य लुकि अकारस्य लोपः। यदि लुगवकाशोऽपि स्यात्ततोऽपि न दोषः यतो अल्लोपे योगविभागो भविष्यति तद्यथा "अतो लोपः" (६।३।४८) ततः "यस्य" लोपः अत इत्येव। किमर्थमिदम्? लुकं वक्ष्यति तद्बाधनार्थम्। ततः "हलः" (६।४।४९) हल उत्तरस्य यस्य च लोपो भवति।

अन्यस्य कृत इति। अनित्यत्वे हेतुः अन्यस्य कृते प्राप्नोतीति। यद्यपि अन्यस्य अकृतेऽपि प्राप्नोति, तथापि यदा अन्यस्य कृते प्राप्नोति तदैवानित्यता। कथम्? "शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवती"ति परिभाषया। किं वाऽस्य बीजम्? यो हि विधिर्नित्यः न स परमपेक्षते यद्प्राप्तिसम्बन्धितया तस्य पूर्वं प्रवृत्तिस्तद्प्राप्तिसम्बन्धितयैव तत्पुनः प्रवृत्तिः। यत्र शब्दान्तरापेक्षा तत्रानित्यता।

लोपे प्राप्ते इति। "येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवती"ति लुक् लोपस्य बाधकत्वात् लुगनवकाशः। अत्र लुग्लोपयोर्भिन्नविषयौ निर्दिष्टौ यङि अकारस्य लोपो यकारस्य लुक्। सुतरामयं सावकाशः। यतो भिन्नविषयत्वात् नाप्राप्तिन्यायाभावात् लुक् न लोपस्य बाधकः।

यदि लुगिति। 'यङोऽचि च' (२।४।७४) लुक् इत्यत्रावयवे यङ्निर्देशस्य गौणत्वात् यङः समुदायस्य लुकि पक्षविवक्षा। एवं सति येन नाप्राप्तिन्यायस्य प्राप्तिरस्त्येव। "अतो लोपः" (६।४।४८) "यस्य च हलः" (६।४।४९) इत्यत्र "अतो लोपः" इत्युक्त्वा यस्येति कृते यस्य च अतो लोपो भवतीत्याचष्टे। तदनन्तरं "हलः" हल उत्तरस्य यस्य च लोपो भवतीति।

इह तर्हि परत्वात् योगविभागाद्वा लोपो लुकं बाधेत 'क्ष्मो गोमाय क्ष्मौ वदी-दन्' गोमूयतेर्गोमाय ।

१० । समानाश्रयो लुक् लोपेन बाध्यते ।

यो हि प्रत्ययाश्रयः स समानाश्रयः । यदा लुक् समानाश्रयस्तदा लोपेन बाध्यते । अत्र तु प्रत्ययोत्पत्तेः प्रागेव लुग्भवति ।

कथम् 'स्वदः' 'प्रश्रथः' 'औरदानुः' इत्यत्र तु परिहारायोक्तम् "निपातनात् स्वदा-दिषु" "प्रत्ययाश्रयत्वादन्यत्र सिद्धम्" "वक्ति त्वः सम्प्रसारणम्" । कथं निकुचितः ? "सन्निपातो विधिरनिमित्तं तद्विघातस्येति ।"

इह तर्हीति । "यञोऽचि च" इति पूर्वं लुगुक्तः पश्चादुक्तं "अतो लोपो यस्य" इति । सुतरां परत्वात् लुक् बाधित्वा लोपो भवति ।

समानाश्रय इति । तुल्यकालत्वात् ।

गोमायेति । "यञोऽचि च" (२।४।७४) इत्यत्र चकारात् "बहुलं छन्दसि" (२।४।७२) इत्यतो बहुलग्रहणमनुकृष्यते । ततो जायमानस्यानैमित्तिकस्य लुकोऽन्तरङ्ग-तया प्रत्ययोत्पत्तेः प्रागेव स भवति ।

निकुचित इति । अत्र क्तप्रत्ययस्य कित्वसंयोगेन नलोपे सति लदुपधत्वम् । एवं लघूपधत्वे सिद्धे "पुगन्तलघूपधस्य" (७।३।८६) इत्यनेन गुणे सति कित्त्वस्य गुणनिषेधक-त्वस्य व्याघातोत्पत्तिः । सुतरां सन्निपातपरिभाषया गुणनिषेधोऽत्र सिद्धः । सन्निपात-परिभाषाया व्याख्यानन्तु पूर्व्वमुक्तम् (६१पृ.) ।

अत्र सूत्रप्रत्याख्यानविषय एवं विचार्य्यः । सूत्रकारेण "यस्य हलः" (६।४।४९) इत्यत्र समुदायलोपः स्वीकृतः, सुतरां "न धातुलोप आर्द्धधातुके" इति सूत्रे तेनारब्धम्, भाष्यकारस्तु अवयवलोपं स्वीकृत्य यकारस्य लुक् यकारस्य लोप इति संसाध्य यकारस्य

स्थानिवत्तया गुणवृद्धी असम्भावयन् सूत्रं प्रत्याख्यातवान्। वृत्तिकारैस्तु सूत्रकारपक्ष एव परिगृहीतः। यतस्तैः "यस्य हलः" इति सूत्रे "यस्येति "संघातग्रहणमेतत्" इत्युक्तम्। वस्तुतस्तु सूत्रकारैः सहजगम्यपथः अवलम्बितः, भाष्यकारैस्तु सूक्ष्मतम इति द्वयोर्भिन्नता। भाष्यकारपक्षे दोषान् दर्शयन्त एवं तदुद्धारं कैयटादयः कृतवन्तः, तद्यथा, गमधातोर्यङ्लुगन्तात् अचि 'जङ्गम' इत्यत्र लुप्तस्याकारस्य स्थानिवद्भावात् "गमहनजनखनघसां लोपः क्ङित्यनङि" (६।४।९८) इत्यनेन उपधालोपः प्राप्नोति। नैष दोषः। अनङीति प्रतिषेधात्। 'दरीदृशः' इत्यत्र "ऋदृशोऽङि गुणः" (७।४।१६) इति गुणः स्यात्। नैष दोषः प्रतिपदोक्तस्याङो ग्रहणात् नात्र गुणः। 'देद्यः' इत्यत्र "दीङो युडचि क्ङिति" (६।४।६३) इत्यनेन युडागमः स्यात्। नैष दोषः, दीङ इत्यनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थ इति सिद्धान्तितत्वात्। अथवा "अङ्गवृत्ते पुनर्वृत्तावविधिः" "संज्ञापूर्व्वकविधेरनित्यत्वम्" इति परिभाषाश्रयणेन समाधानं सुकरम्। प्रथमपरिभाषार्थस्तु 'अङ्गवृत्ते' अङ्गाधिकारनिष्पन्ने कार्य्ये सति 'पुनर्वृत्तौ' पुनरन्यस्याङ्गस्य कार्य्यप्रवृत्तौ 'अविधिः' अविधानम्। यथा "भ्यसोऽभ्यम्" (७।१।३०) इत्यनेन भ्यसो भ्यमि कृते "बहुवचने झल्येत्" (७।३।१०२) इति एवं प्राप्नोति "अङ्गवृत्ते पुनर्वृत्तावविधि"रिति न भवति। "ओर्गुणः" (६।४।१४६) इत्यत्र गुण इति शब्दमनुक्त्वा 'ओरोत्' इति वचनं सम्यगपि गुण इति कथनं "संज्ञापूर्व्वकविधेरनित्यत्वम्" इति प्रदर्शनाय। एवं हि 'बाभ्रव्यः' इत्यत्र गुणः अनित्यत्वात् 'स्वायम्भुवः' इत्यत्र उवङ्। परिभाषाया अर्थस्तु परिस्फुटः। भवतु, 'लोलुवः' इत्यादिषु "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" (६।४।७७) इत्यनेन अचि उवङ् स्यात्। नात्र उवङ् सिध्यति लोलू+ऽ+अ इति स्थिते, स्थानिवद्भावलब्धेऽकारे परे सिध्यतीति चेत् न, यङोऽकारे लुप्ते यकारो लुप्यते, यकारावस्थानकाले नाप्यकारस्य प्रत्ययत्वम्, यकारे लुप्ते न तस्य स्थानिव्यवस्थानं ततः प्रागेव तस्य लोपात्, सुतरां स्थानिवद्भावलब्धेऽकारे न भवत्युवङादेशः यतः स्थानिनि दृष्टं हि कार्य्यं तावदतिदेशेन लभ्यते न तु तथाऽदृष्टमपि। अत्र "स्वभावमात्रेणापि अतिदेशो भवतीत्यदोषः।" ततः स्थानिवद्भावलब्धे अकारे 'लोलुवः' इति पदसिद्धिः।

क्ङिति च। १। १। ५।

म, वृ,। निमित्तसप्तम्येषा। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः, 'चितः' 'चितवान्' 'स्तुतः' 'स्तुतवान्' 'भिन्नः' 'भिन्नवान्' 'मृष्टः' 'मृष्टवान्'। ङिति खल्वपि—'चिनुतः' 'चिन्वन्ति' 'मृष्टः' 'मृजन्ति'।

गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते—"ग्लाजिस्थश्च ग्स्नुः" (३।२।१३९) 'जिष्णुः' 'भूष्णुः'।

इक इत्येव—'कामयते' 'लैगवायनः'।

"मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते।" संक्रमो नाम गुणवृद्धिप्रतिषेधनियमः। 'परिमृजन्ति' 'परिमार्ज्जन्ति' 'परिमृजन्तु' 'परिमार्ज्जन्तु'। लघूपधगुणस्याप्यत्र प्रतिषेधः। 'अचिनुवम्' 'असुनवम्' इत्यादौ लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकं ङिति यत्कार्य्यं तल्लकारे ङिति न भवतीति।

भा, स,।

१। क्ङिति प्रतिषेधे तन्निमित्तग्रहणम्।

क्ङिति प्रतिषेधे क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति तन्निमित्तग्रहणं कर्त्तव्यम्। किं प्रयोजनम्?

क्ङिति प्रतिषेध इति। क्ङितीति यदि परसप्तमी स्यात् ङिति परतो यदिगिति भवेत्। तदा "तस्मिन्निति निर्दिष्टे पूर्व्वस्य" (१।१।६६) इति परिभाषोपस्थितिः। ततो

२। उपधारौरवौत्यर्थम्।

उपधार्थं रौरवीत्यर्थं तन्निमित्तग्रहणम्। अन्यथा 'भिन्नः' 'भिन्नवान्' इत्यत्र "क्ङिति" इत्यत्र "तस्मिन्निति निर्दिष्टे पूर्व्वस्य" (१।१।६६) इति परिभाषोपस्थानात् उपधाया इको न गुणः प्राप्नोति, 'चितं' 'स्तुतम्' इत्यत्रैव स्यात्। ननु पुगन्तलघूपधस्याङ्गस्य गुण उच्यते तत्रात्र कित्परमिति कित्परत्वेन विशेषयिष्यामः। न खल्वत्र पुगन्ताङ्गस्य लघूपधस्य, किन्तर्हि पुकि अन्तः पुगन्तः लघ्वी उपधा लघूपधा (११९) अन्यथा अङ्गविशेषणे सति 'भिनत्ति' 'छिनत्ति' इत्यत्र गुणः प्रसज्जेत। रौरवोत्यर्थम्—"त्रिधा बद्धो वृषभो रोरवीति।"

निर्दिष्टशब्दस्य व्युत्पत्त्या अव्यवहितोच्चारणार्थत्वात् 'चितः' इत्यादिषु निषेधः स्यात् न तु व्यवहितोच्चारितेषु 'भिन्नः' 'छिन्नः' इत्यादिषु। सुतरां निमित्तग्रहणं कर्त्तव्यम्। यदि क्ङितीति भावसप्तमी, गुणवृद्धी इत्यनेन च सम्बन्धस्तदा क्ङिति सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इति सूत्रार्थः स्यात्। ततो विहितयोर्न निषेधः, अनभिनिर्वृत्तयोरेवेति परिभाषानुपस्थितिः। अतएव निमित्तसप्तम्येव।

उपधार्थमिति। 'भिन्नः' 'भिन्नवान्' इत्यत्र उपधाया इकः "सार्व्वधातुकार्द्धधातुकयोः" (७।३।८४) "पुगन्तलघूपधस्य च" (७।३।८६) इति यो गुणः प्राप्नोति, स "क्ङिती"ति निषेधान्न भवति।

रौरवीत्यर्थमिति। अत्र तिङ्निमित्तो गुणः, न तु यङ्निमित्तगुणप्रतिषेधः।

कित्परत्वेनेति। क्ङिति न गुणवृद्धी भवतः। कस्य? पुगन्तलघूपधस्य। एवमाकाङ्क्षायां, कित्परत्वेन विशेष्यते।

अङ्गविशेषण इति। लघ्वी उपधा यस्य इति अङ्गस्य विशेषणे 'भिनत्ति' 'छिनत्ति' इत्यत्र अङ्गगतस्येको गुणः प्राप्नोति। लघ्वी उपधा लघूपधेति निर्द्देशे समुदायग्रहणं भवति। ततो 'भिनत्ति' 'छिनत्ति' इत्यत्र अवयवस्य चेको व्यवहितत्वात् न गुणप्राप्तिरुपधात्वाभावात्तस्य।

यदि तन्निमित्तग्रहणं क्रियते अ-चङन्ते दोषः 'रियति' 'पियति' 'प्रादुद्रुवत्' 'प्रासुस्रुवत्,' अत्र न प्राप्नोति।

३। अचङन्तस्यान्तरङ्गत्वात् सिद्धम्।

अन्तरङ्गलक्षणत्वादिह इयङुवङौ: कृतयोरनुपधात्वाद्गुणो बहिरङ्गो भविष्यति। एवं न तन्निमित्तग्रहणेन कश्चिद्दोषः। इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि 'हतो' 'हथ:' 'उपोयते' 'औयत' 'लौयमानि:' 'पौयमानि:' 'नेनिक्त:' इति। नैतानि सन्ति प्रयोजनानि। 'हतो' 'हथ:' इत्यत्र "अदिप्रभृतिभ्य: शपः" (२।४।७२) इति यथा

अचङन्ते दोष इति। तन्निमित्तपक्षग्रहणे "सार्व्वधातुकमपित्" (१।२।४) इति ङित्त्वे क्ङितीत्यनेन गुणनिषेधः प्राप्नोति, तिपि तु लघूपधलक्षणस्य तिब्निमित्तस्य गुणो भवति। सुतरां रि पि गतौ धि धारणे इति तौदादिकानां गुणः प्राप्नोति। सुतरां 'रियति' 'पियति' 'धियति' इति न सिद्ध्येत्। "णिश्रिद्रुस्रुभ्य: कर्त्तरि चङ्" (३।१।४८) इत्यनेन 'अशिश्रियत्' 'प्रादुद्रुवत्' 'प्रासुस्रुवत्' इत्यत्रापि दोषः। तिपमाश्रित्य गुणो बहिरङ्ग:, अचङाश्रितौ इयङुवङौ अन्तरङ्गौ, सुतराम् अन्तरङ्गत्वादियङुवङो: कृतयो-र्बहिरङ्गो गुणोऽसिद्ध:।

अनुपधात्वादिति। धातोरिक इयङुवङि प्राप्ते रिय पिय धिय इत्याकारेण स्थितौ व्यवहितत्वादिकोऽनुपधात्वम्।

हतो हथ इत्यत्रेति। हन्+तस् हन्+थस् इत्यत्र "अनुदात्तोपदेशवनतितनोत्यादी-नामनुनासिकलोपो झलि क्ङिति" (६।४।३७) इति नकारस्य लोपः। ततः शपि कृते ह+अ इति स्थितौ "अतो गुणे" (६।१।९७) इत्यनेन पररूपमेकादेशः ततः ह इत्याका-रेणावस्थितिः। ततः 'अदिप्रभृतिभ्य: शपः' (२।४।७२) इति शपो निवृत्तौ शपः पित्त्वात् हस्य गुणत्वमापन्नोऽकारः क्ङितीति निषेधात् निवर्त्तते। न निवर्त्तते, हस्याकारस्य धातूपदेशावस्थायां स्थितत्वात्। यद्यप्यनिग्लक्षणगुणत्वान्न निषेधप्रसङ्गः तथापि परिहारान्तर-प्रदर्शनाय तथोक्तम्।

अदिप्रभृतिभ्य इति। अत्र भाष्यम् "प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्ति:

शब्निवर्त्यते तथा निषेधेन अकारोऽपि निवर्त्त्यते। न निवर्त्त्यते। कथम्? अयन्तु धातूपदेशावस्थायामकारः। 'उपोयते' 'औयत' 'लौयमानिः' 'पौयमानिः' इत्यत्र गुणवृद्धी बहिरङ्गे, अन्तरङ्गः प्रतिषेधः, असिद्धं बहिरङ्गमन्तरङ्गे। 'नेनिक्तः' इति पररूपेण व्यवहितत्वान्न भविष्यति।

उपधार्थेन तावन्नार्थः। "न धातुलोप" इत्यतो धातोरिति वर्त्तते। तेन क्ङित्परत्वेन धातुर्विशेष्यते। यदि क्ङित्परत्वेन धातुर्विशेष्यते 'चिनुतः' 'सुनुतः'

शक्या कर्त्तुम्।" अस्यैवाशयमनुसृत्योक्तम् "अदिप्रभृतिभ्य इति यथा शब्निवर्त्त्यते" इत्यादि। "कर्त्तरि शप्" (३।१।६८) इति सार्व्वधातुके अविशेषेण शप् प्राप्नोति सुतरां हन्+तस् इत्यत्रापि तस्य प्रवृत्तिः। अतः प्रसक्तोऽत्र शप्। ततः "अदिप्रभृतिभ्यः शपः" (२।४।७२) इति विशेषलक्षणपर्यालोचनया शपोऽनभिनिर्वृत्तिः। ततः प्रक्रिया-दशायामवस्थितः शपो निवृत्तिः क्ङितीति निषेधेन साध्यते। नन्वेवं सति 'भवतः' इत्यादौ कथं न तादृशः शपोऽकारो निवर्त्त्यते? शबभवतीत्यत्र गुणो भवतीत्यनुल्लेखात् नायं गुणनिषेधस्य विषयः।

उपोयत इति। "वेञो यकि सम्प्रसारणे कृते उभयपदाश्रितत्वाद्बहिरङ्गो गुणः। 'औयते'त्यादौ बहिरङ्गाश्रयत्वाद्बहिरङ्गा वृद्धिः।"

नेनिक्त इति। अत्र ने इति अभ्यासस्य कार्य्यित्वम्। तस्य च निज् इति पररूपेण व्यवहितत्वात् न निषेधविषयत्वम्। "निजां त्रयाणां गुणः श्लौ" (७।४।७५) इत्यनेन अभ्यासस्य गुणः।

धातोरिति। "न धातुलोप" इत्यत्र धातुशब्दस्योपसर्ज्जनत्वेऽपि धातौ धातुशब्दमात्रस्य स्वरितत्वादिहानुवृत्तिः।

यदीति। क्ङित्यनन्तरस्य धातोर्गुणवृद्धी न भवत इति वाक्यार्थत्वात् धातोर्विहितस्य विकरणस्याधातुत्वान्न गुणवृद्ध्योर्निषेधः।

'लुनीतः' 'पुनीतः' इति विकरणस्य न प्राप्नोति। नैष दोषः। धातोर्यो विहित इति धातुग्रहणं विहितविशेषणम्। यदि विहितविशेषणं तदा धातरेव न प्राप्नोति। नैवं विज्ञायते धातोर्विहितस्य क्ङितीति, किन्तर्हि धातोर्विहिते क्ङितीति अथवा "कार्य्यकालं संज्ञापरिभाषम्" यत्र कार्य्यं, तत्र द्रष्टव्यम्। "पुगन्तलघूपधस्ये"ति उपस्थितमिदं भवति "क्ङिति ने"ति। अथवास्मिन् योगे क्ङिद्ग्रहणमनवकाशं, तस्यानवकाशत्वात् गुणवृद्धी न भवतः। अथवा "वसिगृधिधृषिक्षिपेः क्नुः" (३।२।१४०) "इको झल्" (१।२।९) "हलन्ताच्च" (१।२।१०) इति क्नुसनोः कितोः करणात् ज्ञायते भवत्युपधालक्षणस्य प्रतिषेध इति, अन्यथा यद्यत्र गुणो न स्यात्, कित्करणमनर्थकं स्यात्। उपधालक्षणस्यापि गुणो भवतीति क्नुसनौ कितौ क्रियेते।

रोरवीत्यर्थेनापि नार्थः। न ह्यत्र कित् ङिद्वा दृश्यते। "प्रत्ययलोपे प्रत्ययलक्षणम्" (१।१।६२) इत्यनेन यङ्लुगन्तत्वात् प्रत्ययलक्षणेन ङित् दृश्यते। "न लुमताङ्गस्य" (१।१।६३) इति प्रत्ययलक्षणनिषेधः। अथवा "न लुमताङ्गस्ये"ति चेत् न उच्यते तथापि न दोषः, यतः लुमता लुप्तेऽङ्गाधिकारी न प्रतिनिर्द्दिश्यते किन्तर्हि योऽसौ

विहितविशेषणमिति। धातोर्यो विहितस्तस्य क्ङिति गुणवृद्धी न भवत इति वाक्यार्थे विहितस्यैव प्राप्नोति न तु धातोः।

धातोर्विहित इति। धातोर्विहिते क्ङित्यनन्तरो धातुर्विकरणो वा तस्य गुणवृद्धी न भवत इति तदा वाक्यार्थः।

अथवेति। "कार्य्यकालं संज्ञापरिभाषम्" इति परिभाषा। यदा कार्य्यं भवति तदा तदुपयोगिन्याः संज्ञायाः परिभाषायाश्चोपस्थितिर्भवति। एवं यदा यत्र गुणवृद्धी विधीयेते तदा तत्र क्ङिति नेत्युपतिष्ठते। तेन 'भिन्नः' इत्यादौ "पुगन्तलघूपधस्येति" गुणे प्राप्ते "कार्य्यकालं संज्ञापरिभाष"मित्यनेन क्ङिति नेत्यस्योपस्थानम्।

अनवकाशत्वादिति। निषेधस्यावश्यम्भावित्वात् गुणे प्रतिषेधो व्यवहितेऽपि प्राप्नोति।

न ह्यत्रेति। रोरु+तिप् इत्यत्र यङो लुकि तिपि कृते न पुनरत्र ङित् किद्वा दृश्यते।

लुमता लुप्यते तस्मिन् यत् अङ्गं तस्य यत् कार्य्यं तन्न भवतीति। अङ्गाधिकारप्रतिनिर्द्देशेऽपि न दोषः, "कार्य्यकालं सञ्ज्ञापरिभाष"मिति यत्र कार्य्यं तत्र द्रष्टव्यम्। सार्व्वधातुकार्द्धधातुकयोर्गुणो भवतीति "क्ङिति ने"ति तत्रोपस्थितं भवति। अथवा छान्दसमिदम्। "दृष्टानुविधिश्छन्दसि भवति।" अथवा बहिरङ्गो गुणोऽन्तरङ्गनिषेधः; असिद्धं बहिरङ्गमन्तरङ्गे। अथवा पूर्व्वस्मिन् योगे यदार्द्धधातुकग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणो भविष्यति।

इह कस्मान्न भवति? 'लैगवायनः' 'कामयते'।

४। तद्धितकाम्योरिक् प्रकरणात्।

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, न चैते इग्लक्षणे।

५। लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्गः।

लकारस्य ङित्त्वात् 'असुनवम्' 'अकरवम्' इत्यत्रादेशेषु ङिद्भावः प्राप्नोति।

तत्र द्रष्टव्यमिति। तदेव दर्शयति "सार्व्वधातुकार्द्धधातुकयोर्गुणो भवतीति क्ङिति नेति।" कार्य्यकाल निषेधपरिभाषाया उपस्थानम्।

आर्द्धधातुकग्रहणमिति। रोरवीति सार्व्वधातुकत्वात् गुणो भवति। कथम्? पूर्व्वसूत्रे यदार्द्धधातुकग्रहणं कृतं तस्यानवकाशत्वात् आर्द्धधातुक एव गुणनिषेधो न तु सार्व्वधातुक इति पर्य्यवस्यति।

लैगवायन इति। लिगोर्गडादित्वात् "गडादिभ्यः फक्" (४।१।९९) इति फक्। आदिवृद्ध्यनन्तरं "ओर्गुणः" (६।४।१४६) इति उकारस्य गुणः। गुणस्य इक्स्थानिकत्वेऽपि न निषेधः। इक इत्येवं विहितत्वाभावात्।

ङित्त्वादिति। लुङ्लङ्लृङ् ङिद्दर्शनात् तस्य ये आदेशा भवन्ति तेषां स्थानिवद्भावात् ङित्वात् ङिच्चेत्यं गुणवृद्ध्योर्निषेधः प्राप्नोति।

६ । लकारस्य ङित्त्वादादेशेषु स्थानिवद्भाव-प्रसङ्ग इति चेत् यासुटो ङिद्वचनात्सिद्धम् ।

यासुटो ङिद्वचनेन ज्ञाप्यते न ङिदादेशा ङिद्भवन्ति । यद्येवं ज्ञाप्यते कथम् "नित्यं ङितः" (३।४।९९) "इतश्च" (३।४।१००) इति । ङितो यत् कार्यं तद्भवति ; ङिति यत् कार्यं तन्न भवतीति । किं वक्तव्यमेतत् ? न । यासुटो ङिद्वचनादेव ज्ञायते समुदायस्य ङित्त्वे यासुडपर्य्याप्तः । अतः यासुट एव ङित्वं क्रियते । ङितो यत् कार्यं तत्स्यात्ङिति यत् कार्यं तन्मा भूदिति तस्य ङित्करणे प्रयोजनम् ।

यासुट इति । लकारस्य ङित्त्वात् न आदेशानां ङित्त्वम् । यदि तेषां ङित्त्वं स्यात् "यासुट् परस्मैपदेषूदात्तो ङिच्च" (३।१।१०३) इति ङित्करणमनर्थकं स्यात्, लकारस्य ङित्त्वादेव स्थानिवद्भावात् आदेशस्य यासुटोऽपि ङित्त्वं स्यात् । तस्माद्यासुटो ङित्करणं ज्ञापयति लकाराश्रयङित्त्वमादेशानां न भवतीति ।

ङितो यत्कार्य्यमिति । "नित्यं ङितः" (३।४।९९) इत्यत्र ङितः कार्यं लकारस्य विशेषणत्वेन लुङ्, लङ्, लृङ्, इति निष्पादनम् । तत् सिद्ध्यति, न तु ङिति यत्सम्प्रसारणादिकम् ।

ङिद्वचनादेवेति । यदि हि ङिति यत्कार्य्यं सम्प्रसारणादिकं तत्स्यात् यासुटो ङिद्वचनमनर्थकं स्यादिति पूर्व्वमुक्तम् । सुतरां ङिद्वचनमेवात्र ज्ञापकं "नित्यं ङितः" इत्यत्र ङिति यत्कार्य्यं तन्न भवतीत्यस्य ।

अपर्य्याप्त इति । यासुटि ङित्करणं सम्प्रसारणविधानेन चरितार्थम् । इदं ङित्करणं न समुदायस्य ङित्करणेन पर्य्याप्तं सुतरां "नित्यं ङितः" इत्यतो ङिदनुवर्त्तमानेऽपि यासुटो ङिद्वचनम् ।

तस्य ङित्करण इति । अनेनापर्य्याप्तत्वं दर्शयति । समुदायस्य ङित्त्वे यासुटस्तदकरणे लुङादिप्रदर्शनमात्रं फलं स्यात् न तु ङिति यत्सम्प्रसारणादिकं कार्य्यं तत् स्यादिति तस्य यासुटो ङित्करणे प्रयोजनम् ।

दीधीवेवीटाम् । १ । १ । ६ ।

म, वृ, । दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः । 'आदीध्यनम्' 'आदीध्यकः' 'आवेव्यनम्' 'आवेव्यकः' । इटः खल्वपि—'कणिता श्वः' 'रणिता श्वो' । वृद्धिरिटो न सम्भवतीति लघूपधगुणस्यात्र प्रतिषेधः ।

भा, स । किमर्थमिदमुच्यते ? 'आदीध्यनम्' 'आदीध्यकः' 'आवेव्यनम्' 'आवेव्यकः' इत्यत्र गुणवृद्धी मा भूतामिति ।

अयं योगः शक्योऽकर्त्तुम् । कथम् ?

१ । दीधीवेव्योश्छन्दोविषयत्वाद्-
दृष्टानुविधित्वाच्च छन्दसः ।
अदीधेददीधयुरिति
गुणादर्शनादप्रतिषेधः ॥

दीधीवेव्यौ छन्दोविषयौ धातू । भवति हि छन्दसि दृष्टानुविधिः । 'अदीधेत्'

छन्दन्दोविषयाविति । नैतौ धातू भाषायां प्रयुज्येते ।

दृष्टानुविधिरिति । दृष्टमेवानुविधीयते इति दृष्टानुविधिः । 'आदीध्यनम्' 'आदीध्यकः' 'आवेव्यनम्' 'आवेव्यकः' इति प्रयोगा न हि छन्दसि दृश्यन्ते दृश्यते च तत्र गुण एव सुतरां नास्त्यत्र दृष्टानामनुविधानमिति वृथैव निषेधारम्भः । यद्यपि भाषायामपि दृष्टमेवानुविधीयते "सिद्धे शब्दार्थसम्बन्धे" इति न्यायात् तथाप्यत्र विज्ञानादिप्रयोजनवशात् लक्षणमिष्यमशब्दानामदृष्टानामपि व्यवहारो लोकप्रसिद्धत्वात् छन्दोवद्दृष्टानुविधित्वं नात्यैकान्तिकमिति सिद्धान्ति "दृष्टानुविधिश्छन्दसि" इति ।

अदीधेदिति । अत्र णिलादगुणो न विरुध्यते । अदीधयुरित्यत्र प्रत्ययस्य ङित्त्व-

'अदीधयुः' इति तत्र गुणदर्शनात् अनर्थकः प्रतिषेधः। तथाहि "प्रजापतिर्वै यत् किञ्चन मनसा अदीधेत्" "होत्राय वृतः कृपयन्नदीधेत्" "अदीधयुर्दाशराज्ञे वृतासः"।

'अदीधेत्' इति युक्तमुदाहरणं न तु 'अदीधयुः' इति। कथम्? सार्वधातुकाश्रय-ङित्त्वनिमित्ते प्रतिषेधे "जुसि च" (७।३।८३) इति जुसि गुण आरभ्यमाणः 'क्ङिति च' (१।१।५) इत्येनं यथा बाधते तथा "दीधीवेवीटाम्" इत्येनमपि। नैष दोषः, यत एकत्र प्रत्ययाश्रयः, अन्यत्र प्रकृत्याश्रयः। अथवा येन नाप्राप्ते तस्य बाधनं भवति, अस्मिन् पुनः प्राप्ते चाप्राप्ते च।

यदि पुनरयं योगो नारभ्यते, कथं 'दीध्यत्' इति?

२। दीध्यदिति श्यन्व्यत्ययेन।

मिति गुणो न युक्तः, "जक्षित्यादयः षट्" (६।१।६) इति दीधीवेव्योरभ्यस्तसंज्ञा। "सिजभ्यस्तविदिभ्यश्च" (३।४।१०९) इति झेर्जुस्।

प्रत्ययाश्रय इति। "क्ङिति च" इत्यत्र प्रत्ययाश्रयः अत्र तु दीधीवेव्योरिति प्रकृत्याश्रयः।

तस्य बाधनमिति। 'क्ङिति' नेत्येतस्मिन् नाप्राप्ते जुसि गुण आरभ्यते सुतरां तस्य निषेधस्य बाधनं जुसि गुणेन। अत्र तु प्रकृतिप्रत्यययोरुभयोर्ग्रहणेन प्राप्ताप्राप्तत्वम्। 'दीधीवेव्यो'रिति प्रकृत्याश्रयो निषेधः 'क्ङिति चे'ति प्रत्ययाश्रयनिषेधः। सुतरां जुसि गुणः प्रकृतिप्रत्ययाश्रयनिषेधं बाधते, सिद्ध्यति च युक्तत्वेन 'अदीधयुः' इत्युदाहरणम्।

दीध्यदिति। लेट् तिप् "इतश्च लोपः परस्मैपदेषु" (३।४।९७) इति इकारलोपः। ततः दीधी+त् इति स्थिते "लेटोऽडाटौ" (३।४।९४) इति अडागमेन सिद्ध्यति 'दीध्यत्' इति पदम्।

श्नन्व्यत्ययेन दीध्यदिति भविष्यति ।

इटश्चापि ग्रहणं शक्यमकर्त्तुम् । कथम् 'अकथिषम्' 'अरणिषम्' 'कणिता श्वः' 'रणिता श्वः' इति । "आर्द्धधातुकस्येड्वलादेः" (७।२।३५) इत्यत्र "नेड्वशि कृति" (७।२।८) इत्यतो इडित्यनुवर्त्तमाने पुनरिड्ग्रहणस्येदं प्रयोजनम् इट् इडेव स्यात् यदन्यत् प्राप्नोति तन्मा भूत् । किमन्यत् प्राप्नोति ? गुणः । यदि नियमः क्रियते, तदा पिपठिषतेः 'पिपठीः' इत्यत्र "र्वोरुपधाया दीर्घ इकः" (८।२।७६) इति दीर्घत्वं न

श्नन्व्यत्ययेनेति । श्नसो ङित्त्वाद्गुणाभावः । "यीवर्णयोर्दीधीवेव्योः" (७।४।५३) इत्यनेन यकारादौ दीधीवेव्योर्लोपात् 'दीध्यत्' इति पदं पूर्व्वोक्तदिशा सिद्धम् । श्यव्यत्ययेनेति पाठान्तरे तु श्यस्य ङित्त्वान्न गुणः । "एरनेकाचोऽसंयोगपूर्व्वस्य" (६।४।८२) इति यणादेशः ।

अकणिषमिति । सिपो हि अमिप् सुतरां पित्त्वात् सिजन्ताङ्गस्य लघूपधो गुणः प्राप्नोति ।

कणितेति । तिपो डादेशे तासप्रत्ययः । तस्य पित्त्वाद्गुणः सम्भवति ।

नेड्वशि कृतीति । "नेड्वशि कृति" इत्यत्र नकारस्य निवृत्तिः ततः इडनुवर्त्तनम् "आर्द्धधातुकस्येड्वलादेः" इत्यत्र "नेड्वशी"त्यत इडनुवर्त्तमाने इतीड्ग्रहणस्य भाष्ये प्रत्याख्यातत्वात् अवश्यं प्रत्याख्यानसम्पादकं भाष्यमेकादेशयुक्तिघटितमिति विवरणकारः ।

पिपठीरिति । पिपठिषतेः क्विप् । "अतो लोपः" (६।४।४८) इत्यकारलोपः । ततः पिपठिष् इत्यत्र "पूर्व्वत्रासिद्धम्" (८।२।१) इति षत्वस्यासिद्धत्वात् "ससजुषो रुः" (८।२।६६) इति सस्य रुत्वम्, "पूर्व्वत्रासिद्धे न स्थानिवत्" इति वचने अल्लोपस्य स्थानिवत्त्वाभावः । इडेव इट् स्यादिति नियमेन यदि गुणादिप्रतिषेधेन इड्रूपेणैवावस्थितिः निष्पाद्यते तदा "र्वोरुपधाया दीर्घ इकः" (८।२।७६) इत्यनेन पिपठिर् इति रेफान्तधातोरुपधाया इको दीर्घत्वमनेन नियमेन बाध्यते

प्राप्नोति। नैष दोषः। नियम्यतेऽत्राङ्गं कार्य्यं, नैतदाङ्गं कार्य्यम्। अथवा दीर्घस्यासिद्धत्वात् न भविष्यति नियमः।

हलोऽनन्तराः संयोगः ।१।१।७।

म० वृ०। भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति। समुदायः संज्ञी जाताविदं बहुवचनम्। तेन द्वयोर्बहूनाञ्च संयोगसंज्ञा सिद्धा भवति। 'अग्निः' इति गनौ 'अश्वाः' इति शवौ 'कर्णः' इति रणौ 'इन्द्रः' 'चन्द्रः' 'मन्द्रः' इति नदराः 'उष्ट्रः' 'राष्ट्र' 'भ्राष्ट्रम्' इति षटराः, तिलान्स्त्यावपतीति नसतवयाः।

हल इति किम्? 'तितउच्छत्रम्' "संयोगान्तस्य लोपः" (८।२।२३) इति लोपः स्यात्।

अनन्तरा इति किम्? 'पचति पनसम्' "स्कोः संयोगाद्योः" (८।२।२९) इति लोपः स्यात्।

नैष दोष इति। "अङ्गस्य" (६।४।१) इत्यनुवर्त्तनात् "आर्द्धधातुकस्येड्वलादेः" (७।२।३५) इत्यत्र अङ्गाधिकारगतगुणसम्पर्कीयो नियमोऽवगम्यते। "र्वोरुपधाया दीर्घ इकः" (८।२।७६) इत्यत्रत्यं दीर्घत्वं न ह्यङ्गाधिकारगतं सुतरां नियमेन न बाध्यते।

दीर्घस्यासिद्धत्वादिति। दीर्घत्वं हि पूर्वत्र असिद्धं सुतरां कृतेऽपि अकृतवदिति तत्र नियमस्याप्रसरः। ततः "घास्तइष्या अविकृतरूप एवेट्, प्रयोग एव तु विकृतः।"

भा. स.। अनन्तरा इत्यत्र अविद्यमानमन्तरं येषामिति आहोस्वित् अविद्यमाना अन्तरा एषामिति। प्रथमे 'अप्सु' इति 'अपसु' इत्यवग्रहे संयोगसंज्ञा न प्राप्नोति। द्वितीये न कश्चिद्दोषः, यतः अन्तरा मध्ये अविद्यमाना अन्ये वर्णा इति तस्यार्थः। प्रथमेऽपि न दोषः। कथम्? इह संज्ञाकरणे नैव दोषो न प्रयोजनम्।

१। संयोगसंज्ञायां सहवचनं यथान्यत्र।

सहभूतानां संयोगसंज्ञा स्यान्न त्वेकैकस्येति संयोगसंज्ञायां सहग्रहणं कर्त्तव्यम्। ततो हलोऽनन्तराः संयोगः।'' सहेति, वक्तव्यमिति। यथा "सह सुपा'' (२।१।४) "उभे अभ्यस्तम्'' (६।१।५) सहेति, अन्यत्रापि सहभूतकार्य्येच्छायां सहग्रहणम्। एकैकस्य संयोगसंज्ञायां किञ्च स्यात्?

अन्तरा इति। अन्तरं अन्तरा वात्र नञा बहुव्रीहेर्विषय इति संशयः।

प्रथम इति। अविद्यमानमन्तरं येषामिति पक्षे।

अवग्रह इति। अर्द्धमात्राकालोऽवग्रहः। अर्द्धमात्राकालं स्थित्वा वर्णान्तरमुच्चार्य्यते सुतरां वर्णात् वर्णान्तरोच्चारणे अन्तरं विवरं वर्णशून्यकाल उपस्थीयते। एवं संयोगत्वव्याहतत्वात् न संयोगसंज्ञा।

द्वितीये इति। अविद्यमाना अन्तरा एषामिति पक्षे।

नैव दोष इति। संयोगसंज्ञायां "संयोगे गुरु" (१।४।११) इति गुरुत्वात् "गुरोरनृतः" इति (८।२।८६) प्लुतेन भाव्यम्। संयोगसंज्ञायामक्रियायां प्लुतो न भवेत्। 'अप्सु' इत्यस्याधिकरणवृत्तेः न चात्र "दूराद्धूते च" (८।२।८४) इत्यस्य सम्बन्धः। "विचार्य्यमाणानाम्" (८।२।९७) इत्यादौ तु "वाक्यस्य टेः" (८।२।८२) इत्यनुवर्त्तते न तु "गुरोरनृतः" इति। अप्सु भवोऽप्सव्यः—"दिगादिभ्यो यत्'' (४।३।५४) इति यत्, "अपो योनियन्मतुषु सप्तम्या अलुग्वक्तव्यः। *।'' इति सप्तम्या अलुक्। एवं सिद्धेऽप्सव्यशब्दे स्यादेव दोष इति चेत्, एवंविधे विषये पदकारा अवग्रहं न कुर्व्वन्तीति न दोषः। "अप्सुयोनिः'' इत्यादावपि नास्ति समस्तात् पूर्व्वमवग्रहः। सुतरां दोषाभावात् प्रयोजनाभावात् तदेतौ नापि संज्ञाकरणम्।

एकैकस्य संयोगसंज्ञायां सत्यां 'निर्यायात्' 'निर्व्वायात्' इत्यत्र "वान्यस्य संयोगादेः" (६।४।६८) इति एत्वम्, 'सस्रजीष्ट' इत्यत्र "ऋतश्च संयोगादेः" (७।२।४३) इति इट्। 'संक्रियते' इत्यत्र "गुणोऽर्त्तिसंयोगाद्योः" (७।४।२९) इति गुणः, 'दृषत्करोति' 'समित्करोति' इत्यत्र "संयोगान्तस्य लोपः" (८।२।२३) इति लोपः, 'मक्ता' 'वस्ता' इत्यत्र "स्कोः संयोगाद्योरन्ते च" (८।२।२९) इति लोपः, 'निर्यातः' 'निर्व्वातः' इत्यत्र "संयोगादेरातो धातोर्यण्वतः" (८।२।४३) इति निष्ठानत्वम्, प्रसज्येत।

नैष दोषः। 'निर्यायात्' 'निर्व्वायात्' इत्यत्र "वान्यस्य संयोगादे"रिति सूत्रस्य संयोगौ आदी यस्य इत्यर्थात् न दोषः। एवमन्यत्र संयोगादिशब्दस्यार्थात्परिहारः। 'दृषत्करोति' 'समित्करोति' इत्यत्र संयोगान्तस्येति संयोगौ अन्तौ अस्येत्यर्थात्,

---

निर्यायादिति। अत्र एकैकस्य संयोगसंज्ञायां रेफयुक्तयकारः संयोगः सुतरामेत्वप्राप्तिः। समुदायस्य संज्ञित्वपक्षे "अचो रहाभ्यां द्वे" (८।४।४६) इति यकारस्य द्वित्वे तस्यासिद्धत्वात् "वान्यस्य संयोगादेः" (६।४।६८) इति एत्वं न प्राप्नोति।

दृषत्करोतीति। ककारसन्निधौ दकारस्य संयोगत्वात् संयोगान्तलोपः स्यात्।

मक्तेति। "तकारे झलि परतः ककारः संयोगो भवति आदिश्चेति लोपप्रसङ्गः।"

आदी इति। द्वौ आदी इति वचनमयुक्तम्। न कुत्राप्यानन्तर्य्येण स्थितौ द्वौ आदी भवितुं समर्थौ। एकस्य मुख्यमादित्वमन्यस्य गौणमिति समाधेयम्। कथं पुनरत्र संयोग आदिर्यस्येति एकत्वमनुपलभ्य संयोगौ आदी यस्येति द्वित्वमुपलभ्यते। एकत्वे सति संयोगादेरित्यनुक्त्वा, संयोगादित्युक्ते संयोगात् परो य आकारस्तस्यान्यस्यैत्वमित्यर्थलाभः स्यात्, सुतरां "वान्यस्य संयोगा"दिति सूत्रयेत्।

संयोगान्ताविति। संयोगस्य लोप इत्युक्ते संयोगस्य पदस्येत्युपस्थितेः "अलोऽन्त्यस्ये"त्यनेन अन्त्यग्रहणं स्यात्। एवं सति यदन्तग्रहणं कृतं तेन ज्ञापयति अत्र संख्याभेदस्य ग्रहणं भवतीति।

'यक्ता' 'वक्ता' इत्यत्र स्कोः संयोगाद्योरित्यत्र संयोगयोरादौ संयोगाद्योरित्यर्थात्, 'निर्यातः' 'निर्वातः' संयोगौ आदौ यस्येत्यर्थात् दोषासम्भवः।

कथं कृत्वा एकैकस्य संयोगसंज्ञा प्राप्नोति? "प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा" इति। तद्यथा वृद्धिगुणसंज्ञे प्रत्येकं भवतः। "गर्गाः शतं दण्ड्यन्ताम्" इत्यस्ति पुनः "समुदाये वाक्यपरिसमाप्तिः" इति। सत्येतस्मिन् दृष्टान्ते यदि प्रत्येकमित्युच्यते इहापि सहग्रहणं कर्त्तव्यम्। तत्र प्रत्येकमित्यनुक्तेऽपि प्रत्येकं गुणवृद्धी संज्ञे भवतः, इहापि नार्थः सहग्रहणेन।

अथ यत्र बहूनामानन्तर्यं किन्तत्र द्वयोर्द्वयोः संयोगसंज्ञा भवति, आहोस्विदविशेषेण। कश्चात्र विशेषः?

२। समुदाये संयोगादिलोपो मस्जेः।

समुदाये संयोगसंज्ञायां 'मङ्क्ता' 'मङ्क्तुम्' इति मस्जेः संयोगादिलोपो न सिद्ध्यति। 'निर्म्लेयात्' 'निर्म्लायात्' 'निर्ग्लेयात्' 'निर्ग्लायात्' इत्यत्र "वान्यस्य संयो-

---

संयोगयोरिति। स्कोर्हल्त्वात् तत्समीपवर्त्तिनोरपि हलोर्हल्त्वात् संयोगयोरिति द्विवचननिर्देशः कृतः।

संयोगाविति। संयोगादित्युक्ते संयोगात् परः आकारस्तदन्ताद्धातोर्नत्वमिति सिद्धौ आदिग्रहणं द्वित्वसंख्याश्रयणार्थम्।

द्वयोर्द्वयोरिति। "हलोऽनन्तराः संयोगः" इत्यत्र हल इति बहुवचनं जातिनिर्देशात्। सुतरां हल इति द्वाभ्यां द्वयोरिति वचनं न विरुध्यते।

मङ्क्तेति। "मस्जिनशोर्झलि" (७।१।६०) नुमागमः। ततः समुदाये संयोगसंज्ञायां नसजानां संयोगसंज्ञा न तु द्वयोः सजयोः। एवं सति न भवति सकारस्य लोपः।

निर्ग्लेयादिति। रेफगकारलकाराणां संयोगसंज्ञायामवादिर्न लभ्यते रेफं विहाय च गकारलकारसमुदायो न संयोगः, सुतरां "वान्यस्य संयोगादेः" इत्यस्य न प्राप्तिः।

गादिः'' (६।४।६८) इत्येत्वं न 'स्वरिषीष्ट' इत्यत्र ''ऋतश्च संयोगादेः'' (७।२।४३) इति इट् न, 'संस्वर्य्यते' इत्यत्र ''गुणोऽर्त्तिसंयोगाद्योः'' (७।४।२९) इति गुणो न; 'गोमान् करोति' 'यवमान् करोति' इत्यत्र संयोगान्तस्य लोपो (८।२।२३) न, 'निर्ग्लानः' 'निर्म्लानः' इत्यत्र ''संयोगादेरातो धातोर्यण्वतः'' (८।२।४३) इति निष्ठानत्वं न।

अस्तु तर्हि द्वयोर्हलोः संयोगसंज्ञा।

३। द्वयोर्हलोः संयोग इति चेत् द्विर्वचनम्।

चेत् द्वयोर्हलोः संयोग इति द्विर्वचनं न सिद्ध्यति। इन्द्रमिच्छति 'इन्द्रीयति' इन्द्रीयतेः सन् 'इन्दिद्रीयिषति' इत्यत्र ''न न्द्राः संयोगादयः'' (६।१।३) इति दकारस्य द्विर्वचनं न प्राप्नोति।

४। न वाज्विधेः।

अज्विधित्वात् न वा एष दोषः। न न्द्राः संयोगादयो द्विरुच्यन्ते, अजादेरिति वर्त्तते।

स्वरिषीष्टेति। स्व इत्यत्र द्वयोः संयोगत्वमनादृत्य समुदायग्रहणे न संयोगादित्वं लभ्यते, एवं संस्वर्य्यते इत्यत्रापि ज्ञेयम्।

गोमान् करोतीति। अत्र गोमा+न्+त् करोतीत्येवं स्थिते नकारतकारसमुदायत्वात् न संयोगान्तलोपः।

निर्ग्लान इति। रकारगकारलकारसमुदायत्वात् निर्ग्लैधादित्यभावादिभ्यां न निष्ठानत्वम्।

इन्दिद्रीयिषतीति। इन्द्रीयतेरित्यत्र नदौ द्रौ इति द्वौ संयोगौ तत्र दकारस्य संयोगादित्वात् द्विर्वचननिषेधप्रसङ्गः।

अज्विधित्वादिति। ''न न्द्राः संयोगादयः'' इत्यत्र अजादेरिति वर्त्तते तेन प्रतिषेधविधिरजाश्रयः। अचादौ यस्येति अजादिः। अजादेरनन्तरस्याव्यवहितस्यैव निषेधः। इन्द्रशब्दस्थो दकारस्तु नकारेण व्यवहितः सुतरां द्विर्वचनं प्राप्नोति।

यद्येवं बहूनामपि द्वयोर्द्वयोः संयोगसंज्ञा किं गतमेतता सूत्रेण ? आहोस्वित् अन्यतरस्मिन् पक्षे भूयः सूत्रं कर्तव्यम् ? गतम् । बहूनां संयोगसंज्ञायाम् "अविद्यमानमन्तरमेषा"मिति विग्रहः, यदा हि द्वयोर्द्वयोः 'अविद्यमाना अन्तरा एषा'मिति । द्वयोश्चैवान्तरा कश्चिद्विद्यते वा न वा ? एवमपि बहूनामेव प्राप्नोति । एषामिति येषां निर्देशः तेषामन्येन व्यवधानेन भवितव्यम् ।

अस्तु तर्हि समुदाये संज्ञा । ननु चोक्तं 'समुदाये संयोगादिलोपो मस्जे'रिति । नैष दोषः । "अन्त्यात् पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्" इत्येतद्वक्ष्यति । अथवा

बहूनामिति । अन्तरं छिद्रम् । अविद्यमानं छिद्रं बहूनां चेत् तदा द्वयोः संयोगसंज्ञा न सम्भवति बहूनामेव ।

द्वयोरिति । मध्यवाचिना अन्तरेत्यव्ययेन सह बहुव्रीहौ तु द्वयोर्मध्ये आधेयो भवतीति द्वयोर्द्वयोरेव संयोगसंज्ञा भवति ।

द्वयोश्चैवान्तरेति । अत्र सम्बन्धमात्रविवक्षया षष्ठी । ननु "अन्तरान्तरेण युक्ते" (२।३।४) इति द्वितीया । अयं षष्ठ्यपवादो योगो नियतावधिकत्वे । यत्र अन्यसहितमसंभवत्वान्न नियतावधित्वं तत्र सम्बन्धमात्रे षष्ठीति तत्त्वम् ।

यानिति । अविद्यमानमन्तरमेषाम्, अविद्यमाना अन्तरा एषामिति एषां पदेन बहुवचननिर्देशात् यानिति निर्देशः । एवं बहुत्वनिर्देशे बहूनामेव संयोगे संयोगसंज्ञा, न तु द्वयोरिति न बोद्धव्यम् । एवं सति 'शिक्षा' इत्यत्र द्वयोः संयोगसंज्ञा न स्यात् । बहुवचनमविवक्षितमिति मन्तव्यम् । हल इति जातौ बहुवचनम् ।

अन्त्यात् पूर्व इति । "मिदचोऽन्त्यात् परः" (१।१।४७) अचां सन्निविष्टानामन्त्यादचः परतो मिद्भवति । अत्र तु अन्त्यात् पूर्वः नुम् भवति, 'मग्नः' इति अनुषङ्गलोपार्थम् 'मङ्क्ता' 'मङ्क्तुम्' इति संयोगलोपार्थम् । अन्त्यादचः परे नुमि सति "अनिदितां हल उपधायाः क्ङिति" (६।४।२४) इति अनुपधात्वात् नलोपो न प्राप्नोति, संयोगादिलोपे तस्यासिद्धत्वादनुपधात्वमेव नकारस्य । उपधाभूतस्य नकारस्यानुषङ्ग इति प्राचां संज्ञा ।

द्वयोरपि बहूनामपीत्यविशेषेण संयोगसंज्ञा, तत्र द्वयोर्या संज्ञा तदाश्रयो लोपो भविष्यति। निर्ग्लेयादित्यादिषु अङ्गेन संयोगादिं विशेष्य अङ्गस्य संयोगादेरिति सिद्धेरदोषत्वम्। एवं सर्व्वमाङ्गं परिहृतम्। गोमान् करोतीत्यादिषु पदेन संयोगान्तं विशेष्य पदस्य संयोगान्तस्येति सिद्धेरत् लोपः। 'निर्ग्लान:' 'निर्म्लान:' इत्यत्र धातुना संयोगादिं विशेष्य धातोः संयोगादेरिति निष्ठानत्वं स्यात्।

५। स्वरानन्तर्हितवचनम्।

स्वरैरनन्तर्हिता हलः संयोगसंज्ञा भवन्तीति वक्तव्यम्। व्यवहितानां मा भूत् —'पचति पनसम्'। न च वक्तव्यम् अनन्तरशब्देनैव व्यवधानानवगमः;

६। दृष्टमानन्तर्य्यं व्यवहितेऽपि।

व्यवहितेऽपि अनन्तरशब्दो दृश्यते, तद्यथा 'अनन्तराविमौ ग्रामौ'। तयोश्चैवान्तरा नद्यश्च पर्व्वताश्च भवन्ति।

अविशेषेणेति। बहूनामपि द्वयोर्द्वयोरपि भवति बहुष्वनन्तरेष्वित्यविशेषः। "कार्य्यार्थत्वात् संयोगसंज्ञाया विरोधाभावात्, एकया संज्ञया सर्व्वेषामनुग्रहासिद्ध्या द्विर्व्वचनेन वैषम्यादविशेषेणेत्युक्तम्। बहूनां सन्निधौ बहूनामेव संयोगसंज्ञेत्यस्मिन् पक्षे आश्रीयमाणे प्रसज्जेद्दोषोऽन्त्यात् पूर्व्व इति परिहृतः।"

अङ्गेन संयोगादिमिति। 'निर्ग्लेयात्' इत्यत्र त्रयो हलः। कार्य्यार्थं हि संज्ञा। त्रिषु न कार्य्यम्। अङ्गावयवः पदावयवः धात्ववयवः संयोगः, कार्य्यार्थमत्राङ्गावयवसंयोगमाश्रितवान्। निर्+ग्लेयात् इत्यत्र अङ्गस्य संयोगात् कार्य्यं भवति।

पनसमिति। 'पनसम्' इत्यत्र सकारगतेनाचा सह सकारस्य संयोगसंज्ञायां "स्कोः संयोगाद्योरन्ते च" (८।२।२९) इति सलोपः प्रसज्यते।

अनन्तराविति। मध्यगता नद्यादयो यद्यपि व्यवधायकाः तथापि ग्रामसम्बन्धमात्रपक्षेण जना वदन्ति अनन्तरौ ग्रामाविमाविति।

कथमत्र तदा अनन्तरशब्दः ?

७। आनन्तर्य्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम् ।

एकस्य हलः संयोगसंज्ञा मा भूदित्यानन्तर्य्यवचनम् । यदि स्यात् 'ईर्ष्य' 'उर्ण्विव' इत्यत्र "इजादेश्च गुरुमतोऽनृच्छः" (३।१।३६) इत्याम् प्रसज्येत ।

८। न वाऽतज्जातीयव्यवायात् ।

सर्व्वत्र हि अतज्जातीयकं व्यवधायकं भवति । अतज्जातीयव्यवधानात् न वा एष दोषः । 'किमनन्तरे एते ब्राह्मणकुले' इति पृच्छति 'नान्तरे' वृषलकुलमनयोरन्तरे, इत्युत्तरम् । ननु कथमनन्तराविमौ ग्रामाविति । ग्रामशब्दोऽयं बह्वर्थः, तद्यथा ग्राम-

---

कथमत्रेति । यदि अन्तरशब्दो व्यवहितेऽपि भवति, तदा कथं "हलोऽनन्तरा संयोगः" इत्यत्र अनन्तरशब्दः । तदेव कथयति एकप्रतिषेधार्थमिति ।

अतज्जातीयकमिति । लोकदृष्टान्तेन सिद्ध्यति व्यवधानमतज्जातीयेन । हलचोरतज्जातीयत्वात् व्यवधानं भवति हलोरचा । यथा ब्राह्मणकुलयोर्व्यवधानं न ब्राह्मणकुलेन, किन्तर्हि वृषलकुलेन ।

ग्रामशब्द इति । 'अनन्तराविमौ ग्रामौ' इत्यत्र अतज्जातीयैरस्ति व्यवधानं, तत् कथम् अनन्तराविति प्रयोगः । ग्रामशब्देन बहुजातीयानां संग्रहो भवतीति, नास्त्यत्र दोषः । ग्रामः शालासमूहे, यथा ग्रामो दग्धः । "शालासमुदायरक्षणाय सर्व्वतो मार्गप्रतिरोधकं यत्परितः त्रिप्यते तदुच्यते वाटपरिक्षेपः" । वाटपरिक्षेपे यथा 'ग्रामं प्रविष्टः', मनुष्येषु यथा 'ग्रामो गतः' 'ग्राम आगतः' । 'ग्रामो लब्धः' इति प्रयोगे तदन्तर्व्वर्त्तिनामरण्यानां सीम्नां स्थण्डिलानां संग्रहो भवति । ततो ग्रामशब्दार्थे नद्यादीनामन्तर्भावात् तेषां व्यवधायकत्वाभावात् ग्रामयोरानन्तर्य्यमुच्यते ।

शब्दः शालासमूहे, वाटपरिक्षेपे, मनुष्येषु, सारण्यके, ससीमके, सस्थण्डिल्यके, वर्त्तते। सुतरां सिद्ध्यति सर्व्वत्र स्वतज्जातीयकं व्यवधायकं भवतीति।

मुखनासिकावचनोऽनुनासिकः।१।१।८।

म, वृ,। मुखसहिता नासिका मुखनासिका तया य उच्चार्य्यते वर्णः सोऽनुनासिकसंज्ञो भवति। "आङोऽनुनासिकश्छन्दसि" (६।१।१२६) 'अभ्र आँ अपः' 'गभीर आँ उग्रपुत्रे' 'चन आँ इन्द्रः [अपः]'।

मुखग्रहणं किम्? अनुस्वारस्यैव हि स्यात्।

नासिकाग्रहणं किम्? क-च-ट-त-पानां मा भूत्।

अनुनासिकप्रदेशाः—"आङोऽनुनासिकश्छन्दसि"(६।१।१२६) इत्येवमादयः।

भा, स,। किमिदं मुखनासिकावचनम्? मुखञ्च नासिका च मुखनासिकं। मुखनासिकं वचनमस्य सोऽयं मुखनासिकावचनः। एवं सति मुखनासिकवचन इति प्राप्नोति। निपातनाद्दीर्घमथवा मुखनासिकमावचनमस्येति, आवचनमीषद्वचनम्

मुखनासिकमिति। "द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम्" (२।४।२) प्राण्यङ्गत्वात् समाहारद्वन्द्वः "सनपुंसकम्" (२।४।१७) इति नपुंसकत्वे ह्रस्वत्वम्।

किञ्चिन्मुखवचनं किञ्चिन्नासिकावचनम्। अथवा मुखद्वितीया नासिका मुखोपसंहिता वा नासिका मुखनासिका मुखनासिका वचनमस्येति।

अथ मुखग्रहणं किमर्थम्? केवलं नासिकाग्रहणेन यमानुस्वाराणामेवानुनासिकत्वं प्राप्नोति।

अथ नासिकाग्रहणं किमर्थम्? केवलं मुखग्रहणेन क-च-ट-त-पानामेव प्राप्नोति।

किञ्चिन्मुखवचनमिति। "भागस्य मुखेनोच्चारणात् भागस्य नासिकया।"

मुखद्वितीयेति। मुखसहाया नासिकेत्यर्थः। मुखसहितया नासिकयेत्यर्थः।

मुखोपसंहितेति। मुखोपसन्निहिता नासिका। एवं सान्निध्यवचनेन मुखनासिकयोरन्तरालस्थानं निर्दिश्यते।

वचनमिति। उच्यते इति वचनः "कृत्यल्युटो बहुलम्" (३।३।११३) इति बाहुलकात् कर्मणि ल्युट्। उच्यतेऽनेनेति वचनं करणे ल्युट्। करणे ल्युडेव भाष्ये परिगृहीतः। पक्षेऽस्मिन् मुखनासिकेति पदमिरपेक्षत्वेन प्रथमं वचनशब्दं गृहीत्वा "नपुंसकं लिङ्गसर्वनाम" इति नपुंसकम्, ततः पदान्तरसम्बन्धादुपजायमानमपि स्त्रीत्वं बहिरङ्गत्वान्न भवति (२० पृ.)।

नासिकाग्रहणेनेति। "मुखनासिकावचनोऽनुनासिक" इत्यनुक्त्वा 'नासिकावचनोऽनुनासिकः' इत्युक्ते इत्यर्थः।

यमानुस्वाराणामिति। यमः समानाकारः। वर्गाणां प्रथमद्वितीयतृतीयचतुर्थवर्णानां पञ्चमे परे पूर्ववर्णसमानाकारं वर्णान्तरं यमसंज्ञम्। यथा 'पलिक्क्नीः' 'चख्ख्नतुः' 'अग्ग्निः' 'अघ्घ्नन्'। अत्र क-ख-ग-घानां नकारे परे तत्सदृशा-क-ख-ग-घागमः यमः। चेत् यमानुस्वाराणां ग्रहणं स्यात् "विड्वनोरनुनासिकस्यात्" (६।४।४१) इत्यादिषु अनुनासिकानुवादेषु यमानुस्वाराणामसम्भवात् स्यादप्रतिपत्तिः।

मुखग्रहणेनेति। "मुखनासिकावचनोऽनुनासिकः" इत्यनुक्त्वा 'मुखवचनोऽनुनासिक' इत्युक्ते इत्यर्थः। क-च-ट-त-पानामनुनासिकत्वेऽनिष्टप्रसङ्गः 'प्राक्' इत्यत्र

प्रासादवासिन्यायेनोभयवचनसिद्धत्वात् मुखग्रहणं शक्यमकर्त्तुम्। तद्यथा केचित् प्रासादवासिनः, केचिद्भूमिवासिनः केचिदुभयवासिनः। ये पुनरुभयवासिनः तेषा-मेकतरग्रहणेनापरेषामपि ग्रहणं भवति। एवं मुखनासिकोभयवचनानां केवल-नासिकाग्रहणेन सिद्धं भविष्यति। एवमुभयवचनतासिद्धत्वेऽपि, यमानुस्वाराणामपि ग्रहणं प्राप्नोति। उभयवचनो न तु केवलनासिकावचन इति न दोषः, नापि तेषां ग्रहणे प्रयोजनम्।

सतोऽनुनासिकस्य संज्ञया भवितव्यं संज्ञया चानुनासिको भाव्यतेऽत इतरेतराश्रयं भवति, इतरेतराश्रयाणि च कार्य्याणि न प्रकल्पन्ते। उक्तं (१०२ पृ.) "सिद्धन्तु नित्यशब्दत्वात्" इति। नित्याः शब्दाः, नित्येषु शब्देषु सतोऽनुनासिकस्य संज्ञा क्रियते न संज्ञयाऽनुनासिको भाव्यते। यदि नित्याः शब्दाः, किमर्थं शास्त्रम्? "किमर्थं शास्त्रमिति चेन्निवर्त्तकत्वात् सिद्धम्।" निवर्त्तकं हि शास्त्रम्। तद्यथा आङ् अवि-शेषेणानुनासिक उपदिष्टः, सर्व्वत्र तस्यानुनासिकबुद्धिरुपजायते सा पुनः "आङोऽनु-नासिकश्छन्दसि" इति शास्त्रात् छन्दस्यचि परत आङोऽनुनासिकस्य प्रसङ्गेऽनुनासिकः साधुर्भवतीति निवर्त्तते।

कस्य 'पक्व' इत्यत्र चस्य 'तप्तः' इत्यत्र पस्य अनुनासिकत्वात् (६।४।३७) लोपः स्यात् 'ओदनमपक्' इत्यत्र "अनुनासिकस्य क्विझलोः क्ङिति" (६।४।१५) इति दीर्घो भवेत्।

प्रासादवासिन्यायेनेति। प्रासादवासिनः प्रासादवासिग्रहणेन गृह्यन्ते भूमिवासिनो भूमिवासिग्रहणेन गृह्यन्ते, उभयवासिनस्तु प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च।

प्रयोजनमिति। एषां हि नासिक्यत्वात् न तु तन्नागमावस्थादिति न प्रयोजनमित्युक्तम्। अत्र पुनः दर्शनत्रयं ज्ञेयम्। अनुनासिकस्य पूर्व्वो भागो मुखेन परो भागो नासिकया इति प्रथमम्, परो भागो मुखेन पूर्व्वो भागो नासिकया इति द्वितीयम्, कृत्स्नस्य मुखेन नासिकया इति तृतीयम्। अत्रैव प्रासादवासिन्यायो द्रष्टव्यः अन्यत्र तु केचित् प्रासाद-वासिनः केचिद्भूमिवासिनः, इति एकेनान्यस्य ग्रहणमसम्भवम्।

तुल्यास्यप्रयत्नं सवर्णम् । १ । १ । ९ ।

म, वृ, । तुल्यशब्दः सदृशपर्य्यायः । आस्ये भवमास्यं ताल्वादि स्थानम् । प्रयतनं प्रयत्नः स्पृष्टतादिवर्णगुणः । तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति ।

चत्वारः आभ्यन्तरप्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते, (१) स्पृष्टता, (२) ईषत्स्पृष्टता, (३) संवृतता, (४) विवृतता चेति । अ अ अ इति त्रयोऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिकनिरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधा भिद्यन्ते । तथेवर्णः, तथोवर्णः तथा ऋवर्णः, ऌवर्णस्य दीर्घो न अस्ति, तं द्वादशप्रभेदमाचक्षते । सन्ध्यक्षराणां ह्रस्वा न सन्ति तान्यपि द्वादशप्रभेदानि । अन्तःस्था द्विप्रभेदा रेफवर्ज्जिता यवलाः सानुनासिका निरनुनासिकाश्च । रेफोष्मणां सवर्णा न सन्ति । वर्ग्यो वर्ग्येण सवर्णः । 'दण्डाग्रम्' 'खट्वाग्रम्' ।

आस्यग्रहणं किम् ? क--च--ट--त-पानां भिन्नस्थानानां तुल्यप्रयत्नानां मा भूत्, किञ्च स्यात् ? 'तप्तं' 'तप्तम्' इत्यत्र "झरो झरि सवर्णे" (८।४।६५) इति पकारस्य तकारे लोपः स्यात् ।

प्रयत्नग्रहणं किम् ? इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां मा भूत् । किञ्च स्यात् ? 'अरुश्चोतति' इत्यत्र

"झरो झरि सवर्णे" (८।४।६५) इति शकारस्य चकारे लोपः स्यात्।

ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या। *। होतृ + ऌकारः 'होतॄकारः' उभयोर्ऋवर्णस्य ऌवर्णस्य चान्तरतमः सवर्णो दीर्घो नास्तीति ऋकार एव दीर्घो भवति।

सवर्णप्रदेशाः—"अकः सवर्णे दीर्घः" (६।१।१०१) इत्येवमादयः।

भा, स,। तुलया सम्मितं तुल्यम्। आस्यञ्च प्रयत्नश्च आस्यप्रयत्नम्। तुल्यास्यञ्च तुल्यप्रयत्नञ्च सवर्णसंज्ञं भवति। किं पुनरास्यम्? लौकिकमास्यम् ओष्ठात् प्रभृति प्राक् काकलकात्। अस्यन्ति वर्णाननेनेति आस्यम् अथवा अन्नम् एतदास्यन्दत इति वा

तुलयेति। "नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु" (४।४।९१) इति तुलाशब्दात् सम्मिते यत्। एवं व्युत्पत्तावपि प्रवीणादिवत् सदृशपर्य्यायोऽयं रूढिशब्दः।

आस्यञ्चेति। तुल्यौ स्थानप्रयत्नौ यस्येति द्वन्द्वगर्भो बहुव्रीहिः। अयमेव पक्षः प्रथमं परिगृहीतः। ततः तुल्यः आस्यं प्रयत्नः एषामिति त्रिपदो बहुव्रीहिः, ततः तुल्यः आस्यं तुल्यास्यः—मयूरव्यंसकादित्वात् समासः, तुल्यास्यः प्रयत्नः एषामिति अग्रे तुल्यास्यशब्दयोस्तत्पुरुषस्ततो बहुव्रीहिः, अथवा आस्यं प्रयत्नः आस्यप्रयत्नः, तुल्यः आस्यप्रयत्नः एषाम् इति आस्यप्रयत्नशब्दयोस्तत्पुरुषः ततो बहुव्रीहिः इति पक्षचतुष्टयम्।

लौकिकमिति। लोके यत् आस्यमिति प्रसिद्धम्।

काकलकादिति। ग्रीवाया उन्नतप्रदेशः काकलकम्।

अस्यन्तीति। अस्यन्ति उच्चारयन्ति वर्णाननेनेति आस्यम्, असु क्षेपणे इति धातोः "कृत्यल्युटो बहुलम्" (३।३।११३) इति बाहुलकात्करणे ण्यत्।

अन्नमिति। अन्नं कर्तृ एतत् आस्यम् आस्यन्दते द्रवीकरोतीति आस्यम्। आङ्पूर्वात् स्यन्दतेः "अन्येष्वपि दृश्यते" (३।२।१०१) इति डः।

भाष्यम् । प्रयतनं प्रयत्नः । प्रयत्नः यपूर्व्वाद्यततेर्भावसाधनो नङ् प्रत्ययः । लौकिकमास्यं चेत् सर्व्वेषां तत्तुल्यं किमास्यग्रहणेन ? वक्ष्यत्येतत् प्रयत्नविशेषणमास्योपादानमिति ।

१ । सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्न-सामान्यात् ।

प्रयत्नसामान्यात् समानप्रयत्नानां जबगडदशां सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति ।

२ । सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम् ।

सिद्धम् । कथम् ? आस्ये तुल्यो देशः प्रयत्नश्च तेषां सवर्णसंज्ञा भवतीति वक्तव्यम् ।

सर्व्वेषामिति । सर्व्वे वर्णा आस्य एव उच्चार्य्यन्ते, सुतरां व्यर्थमास्यग्रहणम् ।

प्रयत्नविशेषणमिति । न हि केवलं प्रयत्नग्रहणे सिद्ध्यति सवर्णसंज्ञा तथा सति समानप्रयत्नानां क-च-ट-त-पानां सवर्णत्वं स्यात् ।

ज-ब-ग-ड-दशामिति । शकारस्य विवृतत्वात् अप्रसङ्गेऽपि तस्यात्र ग्रहणं प्रत्याहारपाठवशात्, सुतरां ज-ब-ग-ड-दानामिति तत्त्वम् ।

भिन्नदेशेष्विति । तन्मपक्षे न हि आस्यं प्रयत्नविशेषणं सुतरां मुखप्रयत्नयोः समानत्वात् भिन्नस्थानानामपि सवर्णसंज्ञा प्राप्नोति ।

देश इति । देशः स्थानम् । स्थानं यथा—अकुहविसर्ज्जनीयाः कण्ठाः, इचुयशाः तालव्याः, ऋटुरषा मूर्द्धन्याः, लृतुलसा दन्त्याः, उपूपध्मानीया ओष्ठ्याः, ए ऐ कण्ठतालव्यौ, ओ औ कण्ठोष्ठ्यौ, वकारः दन्तोष्ठ्यः, जिह्वामूलीयः जिह्वामूलस्थानः, अनुस्वारो नासिक्यः ।

प्रयत्न इति । प्रयत्नो द्विविधः, आभ्यन्तरः बाह्यश्च । तत्र प्रथमः—स्पृष्टता, ईषत्स्पृष्टता, संवृतता, विवृतता चेति । द्वितीयस्तु एकादश संवाराद्यो मूले एव वक्ष्यन्ते ।

एवमपि सर्व्वेषां तत्तुल्यं क्रियाश्रयत्वेन। प्रयत्नविशेषणमास्योपादानम्। एवमाकारादयश्च ये संवारविवारश्वासनादघोषवद्घोषवदल्पप्राणतामहाप्राणता इति प्रयत्नास्ते ज्ञापिता भवन्ति। तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिद्धा भवति। एवं सत्यवर्णस्यास्याद्बाह्यस्थानत्वान्न सवर्णसंज्ञा प्राप्नोति। सर्व्वमुखस्थानमवर्णमेके इच्छन्ति। आस्ये येषां तुल्यो देश इति न ततः सिद्ध्यति। सिद्ध्यति व्यपदेशिवद्भावेन।

स्पृष्टता स्पर्शानां; ईषत्स्पृष्टता अन्तःस्थानाम्, अकारस्य संवृतता, शास्त्रकार्य्यार्थं विवृतत्वप्रतिज्ञानमित्युक्तम्। ऊष्मणां स्वराणां विवृतता ईषद्विवृतता वा। वर्णोत्पत्तेः प्रागेव जिह्वाग्रोपाग्रमध्यमूलानि ताल्वादि सम्यक् स्पृशन्ति, ईषत् स्पृशन्ति, समीपे दूरे चावतिष्ठन्ते इति स्पृष्टतादीनां चतुर्णामाभ्यन्तरत्वम् आस्यान्तर्गततत्तत्कार्य्यकारित्वात्। वर्णोत्पत्तेः पश्चात् गलबिलस्य सङ्कोचात् संवारः विकाशात् विवारः गलबिलस्य श्वासप्रयत्नकालाह्रासः प्राणवायोर्घाततारतम्येन नादादय इति बाह्यत्वम्। आस्यबहिर्भूतदेशे कार्य्यकारित्वात् वर्गाणां प्रथमद्वितीयाः श-ष-स-विसर्ज्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः, श्वासानुप्रदाना अघोषा वर्गयमानां प्रथमे अल्पप्राणा इतरे सर्व्वे महाप्राणाः, वर्गाणां तृतीयचतुर्थाः अन्तःस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठाः, नादानुप्रदाना घोषवन्तो वर्गाणां तृतीया अन्तःस्थाश्चाल्पप्राणाः, यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः।" संक्षेपतस्तु विवाराः श्वासा अघोषाश्च, इतरे संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः, वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणा इति।

आस्ये येषामिति। यदि न अवर्णस्य आस्यात् बाह्यं स्थानम् किन्तर्हि सर्व्वमुखस्थानं तदा आस्यमेव तदुच्चारणस्थानं भवति न तु आस्ये कश्चिद्देश इति न तस्य सवर्णसंज्ञासिद्धिः।

व्यपदेशिवदिति। बुद्धिकृतभेदाश्रयणं व्यपदेशः, यथा राहोः शिरः। आस्यतद्देशयोर्बुद्धिकृतभेदाश्रयणेन सिद्ध्यति।

आस्ये येषां तुल्यो देश इति कृते सूत्रं भिद्यते। अस्तु यथान्यासमिति चेत् "सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्"। नैष दोषः। आस्ये भवमास्यमिति नैतल्लौकिकमास्यम्। तत्र आस्यं स्थानं करणञ्च। एवमपि प्रयत्नो न विशेषित इति चेत्, न हि प्रयतनं प्रयत्नः, प्रारम्भो यत्नस्य प्रयत्नः। एवमपि प्रश्लिष्टावर्णयोरेङो-रवर्णेन विवृततरावर्णेन चैचोश्च सवर्णसंज्ञा प्राप्नोति। एङोरैचोश्च ततो मिथः सवर्णसंज्ञा प्राप्नोति। नैतौ तुल्यस्थानौ। उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति। अभेदका उदात्तादयः।

अथवास्तु प्रयतनमेव प्रयत्नः, तदेव च तद्धितान्तमास्यम्। यत्समानं तदाश्रीयते।

आस्ये भवमिति। "शरीरावयवाद्यत्" (५।१।६) इति यत्। यस्येति लोपे "हलो यमां यमि" (८।४।६४) इति यलोपः। यलोपे वक्तव्ये स्थानिवद्भावनिषेधात् न चाका-लोपस्य स्थानिवद्भावः।

स्थानं करणमिति। "स्थानं ताल्वादि, करणं स्पृष्टतादि, जिह्वाया अग्रोपाग्रमध्य-मूलानि वा।"

न विशेषित इति। प्रयत्नो हि आस्ये भवः, सुतरां तद्धितान्तास्यशब्दग्रहणादेव तद्ग्रहणसिद्धेः न कर्तव्यं प्रयत्नग्रहणम्।

प्रारम्भो यत्नस्य इति। यत्नस्येत्यत्र जातावेकवचनम्। ततो निर्धारणे षष्ठी। यत्नानां मध्ये योऽसौ वर्णोत्पत्तेः प्राक् आरभ्यमाणः सोऽयं प्रयत्नः। अथवा प्रकृष्टो यत्नः प्रयत्नः प्रारम्भे यत्नो वा प्रयत्नः, वर्णोच्चारणप्रारम्भकाल एव आभ्यन्तरप्रयत्नानामारभ्यमाण-त्वात्।

तदेव चेति। तत्पूर्वोक्तमेव तद्धितान्तम् आस्यम्।

सव्समान इति। वर्णानां स्पृष्टत्वस्य समानत्वात् विवारादिबाह्यप्रयत्नभेदेऽपि सवर्णसंज्ञा। सुतरामत्र भेदमुपेक्ष्य समानग्रहणम्।

किं सति भेदे? भेदे सतीत्येव। समाने सति स्यादिति चेत् सवर्णसंज्ञावचनमनर्थकं स्यात् सुतरां भेदे सति आश्रयणीया। सति भेदे किञ्चित् समानं कृत्वा चेत् सवर्णसंज्ञा भविष्यति, ञकारझकारयोः षकारढकारयोः शकारछकारयोः सवर्णसंज्ञा प्राप्नोति। एतेषां हि सर्व्वं समानं करणवर्ज्जम्। एवं सति आस्ये च प्रयत्नश्चेति न द्वन्द्वः किन्तर्हि

किं सति भेद इति। वर्ग्याणां स्पृष्टत्वस्य समानत्वात् यदि विवारादिभेदेऽपि सवर्णसंज्ञाग्रहणं भवति तदा समानन्यायात् विवारादिसमानत्वे स्पृष्टतादिभेदेऽपि सवर्णसंज्ञाग्रहणं भवति।

भेदे सतीति। यदि भेदेऽपि सवर्णसंज्ञाग्रहणं न स्यात् तदा "झरो झरि सवर्णे" (८।४।६५) इत्यत्र 'झरो झरि' इत्येव ब्रूयात्। तत्र सवर्णग्रहणेन यथासंख्यातानुदेशो (१।३।१०) न भवति, तेन 'शिण्ढि' इत्यत्र ढकारे डकारस्य सवर्णमात्रे लोपो भवति। ढकारडकारयोरस्ति वाह्यप्रयत्ने भेदः। यदि सर्व्वसमानत्वे सवर्णत्वं स्यात् ढकारे डकारलोपोऽत्र न भवेत्।

सवर्णसंज्ञेति। सर्व्वसमानत्वे स्वस्यैव स्वेन सवर्णत्वं स्यादिति सवर्णसंज्ञाग्रहणानर्थक्यम्।

किञ्चित्समानमिति। भेदे सति सवर्णसंज्ञाग्रहणं स्पृष्टत्वादिसमानत्वे विवारादिभेदे यथा तथा विवारादिसमानत्वे स्पृष्टतादिभेदे सवर्णसंज्ञा प्राप्नोति, सुतरां ञकारझकारयोः षकारढकारयोरघोषत्वादिसमानत्वे स्पृष्टतादिभेदे सवर्णत्वम्।

करणवर्ज्जमिति। ञकारझकारौ हि वर्ग्यौ सुतरां तयोः स्पृष्टत्वं, शकारछकारयो- रूष्मणो विवृतत्वं सुतरां करणे भेदः। किमिदं करणं पूर्व्वमेवोक्तम्।

न द्वन्द्व इति। द्वन्द्वे हि 'आस्ये प्रयत्न' इत्याकारेण एकस्मिन्नेव स्थाने ययोस्तुल्यप्रयत्न इति नाप्नोयते। सुतरां तत्र वाह्यप्रयत्नानामपि ग्रहणत्वात् दोषसम्भावना। आस्ये प्रयत्न इति समासे तु न दोषः, तेन प्राधान्येनाभ्यन्तरप्रयत्नस्य ग्रहणात्। आभ्यन्तरप्रयत्नानां वर्णोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलैस्ताल्वादिस्थानसम्पर्कः, अतएव एकस्मिन्नेव स्थाने प्रयत्नसम्पर्कः। न तथा वाह्यप्रयत्नेषु तेषां हि वर्णोत्पत्तेः पश्चात् मूर्द्ध्नि प्रतिहते निवृत्ते प्राणवायौ सम्भावना।

तुल्य आस्ये प्रयत्न एषामिति अथवा तुल्य: आस्ये तुल्यास्य इति पूर्वं तत्पुरुष:, ततः तुल्यास्य: प्रयत्न एषामिति बहुव्रीहि:, अथवा आस्ये प्रयत्न: आस्यप्रयत्न: तुल्य आस्यप्रयत्न एषामिति परस्तत्पुरुषस्ततो बहुव्रीहि: ।

३। तस्य।

यो यस्य तुल्यास्यप्रयत्न: स तस्य सवर्ण इति यथा स्यादिति तस्येति ग्रहणं कर्त्तव्यम्। अन्यथान्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्ण: स्यात् ।

४। तस्यावचनं वचनप्रामाण्यात्।

यद्यन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्ण: स्यात् सवर्णसंज्ञावचनमनर्थकं स्यादतो वचनप्रामाण्यात् तस्येति न वक्तव्यम् ।

५। सम्बन्धिशब्दैर्वा तुल्यम्।

तुल्यास्यप्रयत्नं सवर्णमित्यत्र यत् प्रति यत् तुल्यास्यप्रयत्नं तत् प्रति तत् सवर्णसंज्ञमिति सम्बन्धिशब्दावेतौ, तद्यथा मातरि वर्त्तितव्यं पितरि शुश्रूषितव्यमित्युक्ते या यस्य माता, यश्च यस्य पितेति सम्बन्धवशाद्गम्यते ।

६। ऋकारऌकारयो: सवर्णविधि:।

ऋकारऌकारयो: सवर्णसंज्ञा विधेया, होतृ+ऌकार: 'होतृकार:' इति सवर्णदीर्घो यथा स्यात्। नास्ति प्रयोजनं, यत: "अक: सवर्णे दीर्घ:" (६।१।१००) इत्यत्र "ऋति ऋ वा वचनं ऌति ऌ वा वचनम्" इति वक्ष्यति।

आस्ये प्रयत्न इति । "अमूर्द्धमस्तकात् स्वाङ्गादकामे" (६।३।१२) इत्यनेनात्र कथं न अलुक् समास: ? न ह्यास्यशब्द: स्वाङ्गवाची ।

ऌति वा वचनमिति । "ऌति वा वचन"मित्यत्र "अक: सवर्णे दीर्घ:" इत्यतो दीर्घ इत्यनुवर्त्तते । दीर्घश्च नास्ति ऌकारस्य दीर्घ: सुतरामृकारस्यान्तरतम्याद्दीर्घॠकारो भविष्यति ।

तत्सवर्णे यथा स्यात् 'दध्य्ॢकार:' 'मध्व्ॢकार:' इत्यत्र मा भूत्। "ऋति ऋ वा वचनम्" इत्यत्रत्यस्य ऋतीत्यस्य ऋत इति पञ्चम्यन्तं पाठं कृत्वा ऋति लृकारे वा ऋत इत्येव सिध्यति।

एवं सति ऋकारलृकारयो: सवर्णत्वं न वक्तव्यं भवति। अवश्यवक्तव्यमन्यथा ऋकारलृकारयोरच्त्वाभावात् "ऊकालोऽज्झ्रस्वदीर्घप्लुत:" (१।२।२७) इति प्लुतो न स्यात्। होतृ+ऋकार: 'होतॄकार:' 'होतृ३कार:', 'होतृ+ॢकार:' 'होतॢकार:', 'होतॢ३कार:' इति प्लुतसिद्ध्यर्थम् ऋकारस्य लृकारस्याच्त्वं वक्ष्यामि। अच्त्ववचन-सवर्णसंज्ञावचनयो: सवर्णसंज्ञावचनमेव न्याय्य:। यत: सवर्णसंज्ञायां दीर्घत्वम् ऋकार-ग्रहणेन लृकारग्रहणञ्च भवति। ऋकारग्रहणे न लृकारग्रहणे "उरण् रपर:" (१।१।५१) इत्यत्र लृकारस्यापि रत्वं प्राप्नोति। लृकारस्य लपरत्वं वक्ष्यामि। ऋकारलृकारयो:

तत्सवर्ण इति। सवर्णसंज्ञामविधाय दीर्घ इति वचने येनापि केनाप्यचा ॢति दीर्घकार्य्यं स्यात्।

ऋत इति। 'होतृ+ॢकार:' इत्यत्र ऋकारे परतो लृकारोऽस्ति। अत्र उभयो-र्दीर्घ एकादेशो न स्यादच्प्रसङ्गोऽतो दीर्घऋकार एव। सुतरां सवर्णसंज्ञामविधायापि लृकारस्थाने सिद्धो दीर्घऋकार:।

अच्त्वाभावादिति। ऋकारे हि मध्ये द्वौ रेफौ तयोरेका मात्रा अभितोऽज्भक्ते-रपरैका मात्रा इति विमात्रोऽयम् ऋकार:। एवम् लृकारे मध्ये द्वौ लकारौ तयोरेका मात्रा अभितोऽज्भक्तेरेका मात्रा इति विमात्रोऽयम् लृकार:। रेफलकारयोरीषत्-स्पृष्टत्वम्। रेफलकारयोरीषत्स्पृष्टत्वम् ऋकारलृकारयोर्वर्णसामान्ययोर्विवृत-त्वम् सुतरां ताभ्यां तयोरग्रहणादनच्त्वम्।

ऋकारग्रहणञ्चेति। ऋकारेण लृकारग्रहणे सति "ऋत्यक:" (६।१।१२८) इत्यत्र 'खट्वऋश्य:' 'मालऋश्य:' इत्यपि यथा सिद्धं भवति तथा 'खट्वलृकार:' 'मालॢकार:'-इति। "वा सुप्यापिशले:" (६।१।९२) इत्यत्र 'उपर्कारीयति' 'उपार्कारीयति' इत्यपि यथा सिद्धं भवति 'उपल्कारीयति' 'उपाल्कारीयति' इति।

लपरत्वमिति। लपरत्वं व्याख्यानादिति भाव:। व्याख्यानं हि लण्सूत्रस्याका-

सवर्णसंज्ञा न प्रवक्तव्या, अन्यथा "उरण् रपरः" इत्यत्र लृकारग्रहणं कर्त्तव्यं भवति, सवर्णसंज्ञायां तदेव रेफबाधनार्थं भविष्यति।

ऋकारग्रहणेन लृकारग्रहणे "रषाभ्यां नो णः समानपदे" (८।४।१) इत्यत्र "मातृणां" "पितृणाम्" इत्येतदर्थम् "ऋवर्णान्नस्येति वाच्यम्" इति ऋकारग्रहणं कृतं, तेन 'क्लृप्यमानं पश्य' इत्यत्र णत्वं प्राप्नोति। अत्र असत्यामपि सवर्णसंज्ञायाम् 'प्रक्लृप्यमानं पश्य' इत्यत्र "कृत्यचः" (८।४।२९) इत्यनेन कथं न णत्वं प्राप्नोति। चु-टु-तु-ल-शर्व्यवाये नेति वक्ष्यामि। अपर आह "निर्भिन्न मध्यमैर्वर्णैर्लृवर्णैश्च व्यवाये नेति वक्ष्यामि" इति। "वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्ते" इति लृकारे लकारः, सुतरां लकारमाश्रित्य प्रतिषेधो भविष्यति। एवं सति रषाभ्यां णत्वे ऋकारग्रहणं व्यर्थम्, ऋकारे योऽसौ रेफः तदाश्रयेण णत्वं स्यात्।

रेफ प्रत्याहारात् रपर इत्यत्र लकारस्यापि प्राप्तिरिति आन्तरतम्येन ऋकारस्य रकारः लृकारस्य लकार इति।

चु-टु-तु-ल शरिति। "अट्कुप्वाङ्नुम्व्यवायेऽपि" (८।४।२) इत्येतदाश्रित्येवमुक्तम्। अट् कु पु इत्येतेषामन्यतमा हि चु-टु-तु-ल शरः। अत्र शर्षु षकारोऽपि यद्यपि परिगृहीतः तथापि रषाभ्यामित्यत्र षकारस्य विद्यमानत्वान्न दोषः।

भिन्नेति। अत्र लृवर्णैरित्युक्त्वा लकारग्रहणं परित्यक्तमिति विशेषः।

वर्णैकदेशा इति। वर्णैकदेशा इत्यस्य ग्रहणपक्षोऽग्रहणपक्षोऽपि विद्यते। अग्रहणपक्षे कुम्भादेराकृतिगणत्वाभावः। अनुबन्धनिर्दिष्टयोर्ऋकारलृकारयोर्न सादृश्यं भेदेनानुबन्धनिर्देशात् अनुबन्धकार्येषु परस्परस्यानुपादानाच्च।

नाज्झलौ । १ । १ । १० ।

अ॰ सू॰ । अच् हल् च अज्झलौ तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः । अवर्णहकारौ—'दण्डहस्तः', इवर्णशकारौ—'दधिशीतम्', सवर्णदीर्घत्वं न भवति । 'वैपाशो मत्स्यः' 'आनडुहं चर्म' इति "यस्येति च" (६।४।१४८) लोपो न भवति ।

भा॰ स.

१ । अज्झलोः प्रतिषेधे शकारप्रतिषेधो अज्झल्त्वात् ।

शकारो हि अच् हल् च । सुतरामज्हल्त्वात् अज्झलोः प्रतिषेधे शकारस्य इकारेण सवर्णसंज्ञाप्रतिषेधः प्राप्नोति । कथं तावदच्त्वम् ? सवर्णग्रहणेन इकारः शकारमपि गृह्णातीति शकारस्याच्त्वं हलुपदेशात् हल्त्वम् । तत्र को दोषः ?

शकारो हीति । शकारोऽचोपलक्षणं, शकारेण शर्ग्रहणं भवति, तेन शरां अर्भिः सावर्ण्यमत्र निषिध्यते । इकारेण शकारः, ऋकारेण षकारः, लृकारेण सकारो गृह्यते । न च वक्तव्यम्, "नाज्झलौ" इत्यनेनैव निषेधसूत्रेण एभिरेषां ग्रहणं न स्यात् । निषेधवाक्यं हि प्राप्तिमाश्रित्योपतिष्ठते । सुतरां निषेधवाक्यारम्भात् प्राक् शकारादिभिः शरां ग्रहणमवश्यम्भावि । अनेन निषेधवाक्येन अथाच अज्झलोः सावर्ण्यं निषिद्धं स्यात् न तस्मिन् सूत्रे । यतो नेदं सूत्रं स्वतः निषेधसूत्रकं भवितुमर्हति । सुतरामनयाऽज्झल्पदेन अज्झलोः सावर्ण्यं, न तु शरां अर्भिः ।

२। तत्र सवर्णलोपे दोषः ।

तत्र सवर्णलोपे दोषः । 'परश्शतानि कार्य्याणि' "झरो झरि सवर्णे" (८।४।६५) इति लोपो न प्राप्नोति ।

३। सिद्धमनच्त्वात् ।

अनच्त्वात् सिद्धमेतत् । कथमनच्त्वम् ? "स्पृष्टं करणं स्पर्शानाम् ।" "ईषत्स्पृष्टमन्तःस्थानाम् ।" "विवृतमूष्मणाम् ।" ईषदित्यनुवर्त्तते । "स्वराणाञ्च" विवृतमित्यनुवर्त्तते ईषदिति निवृत्तम् । सुतरामूष्मणामीषद्विवृतत्वात् अचां विवृतत्वात् शकारस्य नाच्त्वम् सवर्णत्वाभावात् ।

४। वाक्यापरिसमाप्तेर्वा ।

अथवा सिद्धमेतत् वाक्यापरिसमाप्तिः । इष्यतेऽत्र वाक्यापरिसमाप्तिर्यतः इह पूर्व्वं

परश्शतानीति । शतात्पराणि परश्शतानि "कर्त्तृकरणे कृता बहुलम्" (२।१।३२) इति बाहुलकात् सुप्सुपेति वा समासः, ततः पारस्करादित्वात् (६।१।१५७) सुट् । सुटि सकारस्य श्चुत्वम् (८।४।४०), ततः "अनचि च" (८।४।४७) इति द्विर्वचनम् । झरो झरीत्यनेन सवर्णलोपाप्राप्तौ त्रिशकारकश्रवणप्रसङ्गः । "नाज्झलौ" इत्यनेन सूत्रेण "शरोऽचि" (८।४।४९) "अनचि च" (८।४।४७) इत्यत्र सवर्णत्वनिषेधात् । शकारस्य द्विर्वचनम् । "अनेन निषेधवाक्येन अत्रत्य अज्झलोः सावर्ण्यं निषिद्धं स्यात्" इति पूर्व्वमुक्तम् ।

अनच्त्वादिति । अज्झलोः प्रयत्नभेदात् नास्ति सवर्णसंज्ञायाः प्राप्तिः । सूत्रप्रत्याख्यानपरमिदं वाक्यम् ।

वाक्यापरिसमाप्तेरिति । 'विवृतमूष्मणाम्' इत्यत्र ईषच्छब्दस्यानुवर्त्तनपक्षं परिगृह्य परिहारान्तरं वक्ष्यते । "अणुदित् सवर्णस्य चाप्रत्ययः" (१।१।६८) इत्यनेन हि सवर्णसंज्ञाग्रहणं भवति । न चास्मिन् सूत्रे तस्य निष्पादनम् । सूत्रेऽस्मिन् निष्पन्ने सति

वर्णानामुपदेशः, उपदेशादनन्तरम् इत्संज्ञा, इत्संज्ञानन्तरं "आदिरन्त्येन सहेता" (१।१।७१) इति प्रत्याहारः, प्रत्याहारानन्तरं सवर्णसंज्ञा, सवर्णसंज्ञानन्तरं "अणुदित् सवर्णस्य चाप्रत्ययः" (१।१।६९) इति सवर्णग्रहणम्। एतेन सर्व्वेण समुदितेनान्यत्र सवर्णानां ग्रहणं भवति। सुतराम् इकारः शकारं न गृह्णाति। चेदिकारः शकारं न गृह्णाति ईकारमपि न गृह्णीयात्। सुतरां न सिद्ध्येत् 'अकः सवर्णे दीर्घः' (६।१।१००) इति दीर्घत्वमपि। नैष दोषः। अकः सवर्णे इत्यत्र प्रत्याहारग्रहणादीकार-मपि गृह्णाति।

अस्यापवादविषयं परिहाय इष्टविषये सवर्णसंज्ञानिर्व्वाहार्थं तस्य प्रवृत्तेः। यथा "अस्य च्वौ" (७।४।३२) इत्यादिषु। सुतराम् उपदेशानन्तरम् इत्संज्ञेत्यादि वाक्याना-मिहापरिसमाप्तेः इकारशकारयोः सावर्ण्यग्रहणं न भवति। नाज्झलावित्यनेनाक्षर-समाम्नायिकानामेव सावर्ण्यमुद्दास्य न तु सर्व्वेषामिति दीर्घशकारयोः सावर्ण्य-वारणाय अकः सवर्णे इत्यत्र अस्तीत्यनुवर्त्तनं युक्तम्। चतुर्द्दशसूत्र्या पठितवर्णानां मध्ये अचां हल्वर्णेन सावर्ण्ये प्राप्ते नाज्झलाविति सूत्रं प्रवृत्तम्। न त्वाकारो-ऽक्षरसमाम्नाये पठितः। तस्य ग्रहणं भवति ग्रहणकशास्त्रेण। नाज्झलाविति निषे-धस्य अक्षरसमाम्नायपठितवर्णमात्रविषयत्वात् आकारस्य तत्पठितत्वाभावेन न निषे-धस्य विषयः, सुतरां 'विश्वपाभिः' इत्यत्र ग्रहणकशास्त्रबलादाकारेण गृहीतो हकारः परिगृहीतो भवति। ततो "हो ढः" (८।२।३१) इति ढत्वप्रसङ्गः। एतद्दोष-निवारणाय "नाज्झला"वित्यत्र आकारप्रश्लेषः कृतः, तेन आकारेण हलः सावर्ण्य-निषेधः। आकारप्रश्लेषस्य ज्ञापकस्तु "कालसमयवेलासु" (३।३।१६७) इत्यत्र 'वेलासु" इति निर्द्देशः अन्यथा इण्मध्यवर्त्तिना हकारेण आकारस्यापि ग्रहणात् इणः परतया सकारस्य षत्वं स्यात्।

प्रत्याहारग्रहणादिति। अक इत्यत्र प्रत्याहारग्रहणात् प्रत्याहारग्रहणान्तरं भवति सवर्णसंज्ञाग्रहणं, सवर्णसंज्ञाग्रहणानन्तरन्तु, सवर्णग्रहणं, सुतरामवाप्ति वाक्यपरिसमाप्तिः। ततोऽनेकारेण पुनरीकारस्य ग्रहणम्।

अपर आह "अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्" "तत्र सवर्णलोपे दो[illegible] परिहारद्वयमपि "सिद्धमनच्त्वात्" "वाक्यापरिसमाप्तेर्वा।" अस्मिन् पक्षे वाग्रहणेन अस्तु वा शकारस्य शकारेण सावर्ण्यग्रहणम्। ननु 'परश्शतानि' इत्यत्र "झरो झरी"ति लोपो न प्राप्नोति, ततो भवति त्रिशकारकम्, न तु द्विशकारकम्, सुतरां लोपे ह्यलोपे च भेदो भवति। न भवति, यतो विभाषा द्विर्वचनम्। एवमपि भेदो यतोऽसति लोपे कदाचित् द्विशकारकम्, कदाचित्त्रिशकारकम्, लोपे तु द्विशकारकमेव। स्याद्भेदो यदि नित्यलोपः स्यात्, विभाषा तु सलोप इति न भेदः।

इति श्रीभाष्यसङ्क्रमन्यां प्रथमाध्यायस्य प्रथमे पादे

चतुर्थमाह्निकम्।

वाग्रहणेनेति। पूर्व्वत्र वा ग्रहणं परिहारान्तरविकल्पप्रदर्शनाय, अत्र तु तेन परिहारद्वये ह्यपरितुष्यता पुनरिकारादिभिः शकारादीनां सावर्ण्यग्रहणम्। सुतरां शकारस्याच्त्वात् शकारस्य शकारेण सावर्ण्यग्रहणमित्युक्तम्।

असति लोप इति। झरो झरीत्यनेनासति लोपे द्विर्व्वचनस्य विकल्पविषयत्वात् कदाचित् द्विशकारकत्वं कदाचित् त्रिशकारकत्वम्।

यदि नित्यलोप इति। "यरोऽनुनासिकेऽनुनासिको वा" (८।४।४५) इत्यतो वेत्यनुवर्त्तमानात् यथा "अनचि च" (८।४।४७) इति द्विर्व्वचनं यथा वैकल्पिकं, तथा "झयो होऽन्यतरस्याम्" (८।४।६२) इत्यतोऽन्यतरस्यामित्यनुवर्त्तनात् "झरो झरि सवर्णस्य" (८।४।६५) इत्यस्य लोपोऽपि वैकल्पिकः। सुतरां न कश्चिद्भेदः।

इति श्रीतत्त्वसङ्कलन्यां प्रथमाध्यायस्य प्रथमे पादे

चतुर्थमाह्निकम्।